CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

केशव मिश्र 12·2

शास्त्री जी

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शुद्धाद्वैतवेदान्तसम्मतं ब्रह्मस्वरूपम्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शुद्धाद्वैतवेदान्तसम्मतं ब्रह्मस्वरूपम्

वैद्यनाथ शर्मा

परिमल पब्लिकेशन्स
दिल्ली

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रकाशक :
परिमल पब्लिकेशन्स
27/28, शक्ति नगर
दिल्ली-110007

© लेखक

प्रथम संस्करण 1993

मूल्य : 100.00 रुपये | 120

मुद्रक : ए० आर० प्रिन्टर्स, डी – 102, न्यू सीलमपुर, दिल्ली-53

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

समर्पणम्

जयनारायणाख्यस्य पितुः पादावनुस्मरन् ।
पवित्रानामदेव्याश्च मातुश्चरणपङ्कजम् ॥1॥

नत्वा तत्कृपयैवाहं प्रवृत्तो ब्रह्मचिन्तने ।
अन्यथा क्वातिमन्दोऽहं क्व च ब्रह्मनिरूपणम् ॥2॥

सोऽयं समर्प्य भक्त्या निबन्धः पितृपादयोः ।
सुमनोऽञ्जलिनानेनप्रीयेतां पितरौ मम ॥3॥

अथवा

उत्पन्नो भूमिहाराख्ये विप्रवंशेऽतिनिर्मले ।
वैद्यनाथोऽर्पयामीमं निबन्धं पितृपादयोः ॥4॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रार्थना

प्रार्थये (त्वां) दयासिन्धो पश्चात्तापं करोमि च ।
यशस्ते पूर्णचन्द्राभं निष्कलंकं कलंकितम् ॥1॥

प्रक्षालनन्तु दूरेस्तु मण्डनस्य कथैव का ।
लिप्तवान् पूर्णचन्द्राभे लेखन्या ते मुखे मसीम् ॥2॥

क्व च त्वं क्वातिमूर्खोऽहं कीदृशी मेऽनभिज्ञता ।
निबन्धलेखनव्याजाद् दूषितं ते यशोऽमलम् (निन्दितम्) ॥3॥

कीदृशोभ्रान्तमस्तिष्को निस्त्रपश्चास्मि कीदृशः ।
अमावास्या मयाऽकारि शरद्राकायशस्तव ॥4॥

चित्रं चित्रं महच्चित्रं न भूतं न भविष्यति ।
निबन्धगुंजया ब्रह्महेमाद्रिस्तोलितो मया ॥5॥

मल्लिकामालिका ह्येषा सुगन्धाढ्या मनोहरा ।
गुम्फिता वाक् प्रसूनैर्या कण्ठे ते क्षुष्णमेल्यते ॥6॥

अनेन मन्निबन्धेन शुद्धब्रह्माभिधायिना ।
सच्चिदानन्दविश्वात्मन् प्रसीदत्वं ममोपरि ॥7॥

त्वतो विश्वं समुद्भूतमन्ते त्वय्येव लीयते ।
त्वयि सर्वं च भात्येतद् मृत्तिकायां घटो यथा ॥8॥

तमहं त्वां हृषीकेश शुद्धं चिदचिदात्मकम् ।
याचे 'त्वत्कृपया जीवन् संसृतेर्मुक्तिमाप्नुयाम् ॥9॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अज्ञता (मूर्खता) अष्टकम्

यन्नाद्यावधिसंजातं भविता न भविष्यति ।
तदहं कर्तुमिच्छामि मूर्खता ऽतोऽधिका हि का ॥1॥

अज्ञेयं चाप्रमेयं च विमृग्यं योगिनामपि ।
निबन्धे बद्धुमिच्छामि मूर्खताऽतोऽधिका हि का ॥2॥

ब्रह्मादीनां दुरापं यद् वेदा यद् वक्तुमक्षमाः ।
तदहं वक्तुमिच्छामि मूर्खताऽतोऽधिका हि का ॥3॥

अरूपस्योपरूपस्य ब्रह्मणो विश्वरूपिणः ।
इहे रूपयितुं रूपं मूर्खताऽतोऽधिका हि का ॥4॥

श्रुतिभिर्नेति नेतीति मनोवाचामगोचरम् ।
भणितं भणितुं चेष्टे मूर्खताऽतोऽधिका हि का ॥5॥

अजादिभिर्यद् विबुधैः सुदुष्करं यदप्यहो कर्तुमुशन्ति बालिशाः ।
अजातबोधाः शशिनं स्तनन्धया न किं जिघृक्षन्ति करेण बालकाः ॥6॥

अनेन मन्निबन्धेन शुद्धाद्वैतनिरूपिणा ।
सच्चिदानन्दविश्वात्मा श्रीकृष्णः संप्रसीदताम् ॥7॥

यस्य कस्यापि चैकस्य विदुषो मनसो मुदे ।
निबन्धो यद्ययं मे स्यात् सफलः स्यात् श्रमो मम ॥8॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वंशपरिचयः

वजहानामके ग्रामे मीरजापुर (नीरजापुर) मण्डले ।
प्रदेशे चोत्तरे रम्ये जाह्नव्या (गङ्गाया) उत्तरे तटे ॥1॥

आसीद् गौतमगोत्रीयो जगद्देवाख्यभूसुरः ।
सदाचाररतो धीमान् साङ्गवेदविशारदः ॥2॥

तत्सुतः श्रीगणेशाख्यो धरणीतलभूषणः ।
विद्याचुञ्चुर्वदान्यश्च मनीषी विश्वविश्रुतः ॥3॥

तत्तनूजोऽभवच्छ्रीमाननूचानो महायशाः ।
जयनारायणः साक्षान्नारायण इवापरः ॥4॥

येनाप्रतिमबोधेन ज्ञातज्ञेयात्मवस्तुना ।
भूमेर्हारायमाणेन यशसा भूषिता मही ॥5॥

मया तत्तनयेनायं वैद्यनाथेन शर्मणा ।
निबन्धो लिखितो भूयात् सर्वेषां मंगलप्रदः ॥6॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आभार:

सर्वतः प्राक् भृशमाभारमावहामि तस्य परब्रह्मपरमात्मनो भगवतो वासुदेवस्य यस्य करुणाकरस्य नैसर्गिकानुकम्पया मादृशोऽप्यज्ञो जन एतादृशे पवित्रतमे ब्रह्मस्वरूपविचारणाख्ये कर्मणि संयोजितः, सम्पादितं च यथा कथंचित् स्वमत्यनुसारेण सर्वथा दुष्करमप्येतत् कार्यमणुमात्रमिति। अनन्तरं सकलशास्त्रपारावारीणानां विद्वद्वरेण्यानामधिगतपरमार्थानां श्रीमद् हरिरामशुक्लमहोदयानां नितान्तमस्म्याभारी येषां बहुमूल्यं निर्देशमवाप्य निबन्धोऽयं मया लिखितः।

भारतशासनस्य शिक्षामन्त्रालयाधिकारिभ्यो विनीतभावेनानेकशो धन्यवादा विज्ञाप्यन्ते, येषामकम्पानुकम्पयाऽनुसन्धानछात्रवृत्तिं प्राप्य भृशमुपकृतोऽहम्। एवं च सारनमण्डलान्तर्गत 'विश्वम्भरपुरलोहद्वा ग्रामवास्तव्येन पं० श्री रामशर्मणा भिषग्वरेण टंकणकार्ये मदीया मुद्राशतद्वयीप्रदाननेनार्थिकीसहायता कृताऽतस्तस्मै अनेकान् धन्यवादान् समर्पयामि।

वाराणसेयसंस्कृतविश्वविद्यालयस्य वल्लभवेदान्ताध्यक्षेभ्यः पं० श्री सत्यनारायणमिश्रमहोदयेभ्यः कोटिशो धन्यवादा दीयन्ते येषामनुकम्पया मयाचार्यपरीक्षोत्तीर्णा नियोजितश्चाहं तदुत्साहितोऽस्मिन्ननुसंधानकर्मणि प्रतिभुत्वमपि मदीयं तैरेवाङ्गीकृतम्। अतस्तेषामुपकृतिभारं हृदयेनावहामि।

पटनामण्डलान्तर्गतविहटाग्रामवास्तव्येन पं० कन्हैयालालशर्मणा ममायं निबन्धो यत्र तत्रावलोकितः संशोधितश्चेति तस्मान् अपि कोटिशो धन्यवादाः।

टंकणकार्येऽपेक्षितवस्तुजातस्यानयनादिकं समये समये चोचितपरामर्शप्रदाने स्वयं शोधकर्मणि संलग्नेनापि चि० पिनाकपाणिशर्मणा ममात्मजेन कृतमिति तमनेकाभिः शुभाशीर्भिरभिवर्धयामि।

एतेषां सर्वेषां महानुभावानां सर्वविधकल्याणं कामयेऽहम्,

वैद्यनाथ शर्मा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विनयावनतिः

पञ्चसप्ततिवर्षीयः अ. व्याधिसमाकुलः ।
यत्किञ्चिच्चलिखन्न्यूनं, तन्न्यूनन्नेति मन्यताम् ॥1॥
वैनतेयो न यस्यान्तं गन्तुं कल्पशतैरपि ।
समर्थो (प्रभवेत्) नभसस्तत्र वराकामशकास्तु के ॥2॥
वागीशो मूकतामेति यत्स्वरूपनिरूपणे ।
मूको वागीशतां याति यत्कृपातो नतोऽस्मितम् ॥3॥
खञ्जस्य गच्छतो मार्गे स्खलनं जायते मुहुः ।
साहाय्यं क्रियते सद्भिः परिहासस्तथेतरैः ॥4॥
उत्थातुमुपवेष्टुं वा यस्मिन् शक्तिर्न विद्यते ।
स वराको दयापात्रं विदुषां तु विशेषतः ॥5॥
मयात्यन्तानभिज्ञेन ह्यसम्बद्धप्रलापिना ।
निबद्धः स्यान्निबन्धोऽयं सुधियां मनसां मुदे ॥6॥
अयमतिकृशकायो मन्दमत्या निबद्धः,
सकलगुणविहीनो दोषपूर्णस्तथापि ।
मम भवतु निबन्धः सज्जनानां सुखाय,
'वमतिमुवमपारां श्रोत्रयोर्बालवाणी ॥7॥
निबन्धोऽयं यथा मे स्यात् स्यात्तथैव विनिर्णयः ।
नाहं तत्र दयां याचे ह्यन्याय्यं सद्विगर्हितम् ॥8॥
अनौद्धत्यप्रकाशार्थं विनयोऽयं प्रदर्शितः ।
गतस्मयजनानां हि प्रकृतिर्विनयात्मिका ॥9॥
'मुक्तिकाबिन्दु' दोषेण निबन्धो नैव शोधितः ।
अतोऽप्यशुद्धिबाहुल्यं भविष्यति न संशय ॥10॥
शुद्धं विधाय तत्सर्वं पठिष्यन्ति विपश्चितः ।
इतीयं प्रार्थना मेऽस्ति 'सर्वेषां सर्वदाऽस्तु शम्' ॥11॥

ॐ

शान्तिः शान्तिः शान्तिः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विषय-सूची

	पृष्ठाङ्क
समर्पणम्	v
प्रार्थना	vi
अज्ञात (मूर्खता) अष्टकम्	vii
वंशपरिचयः	viii
आभारः	ix
विनयावनतिः	x
मंगलाचरणम्	1
अवतरणिका	2
सांख्यतत्त्वविमर्शः	8
योगदर्शन-दर्शनम्	13
न्यायवैशेषिकदर्शनयोर्ब्रह्मविषयिणीधारणा	15
उपनिषत्सु ब्रह्मस्वरूपम्	17
श्रीशाङ्करसिद्धान्तसंक्षेपः	26
श्रीमद्रामानुजीय सिद्धान्तसारः	28
शुद्धाद्वैतवेदान्तविमर्शः	31
शुद्धाद्वैतवेदान्तसम्मतो जीवविषयोसिद्धान्तः	119
संक्षेपतः सर्ववेदान्तसिद्धान्तसमन्वयः	129
सर्ववेदान्तसिद्धान्तसमन्वयः	147
वेदान्तदर्शनजन्य ब्रह्मज्ञानस्यैहिकोपयोगिता	169
उपसंहृतिः	174
क्षमापनम्	174

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ श्रीकृष्णः शरणं मम ॥

नमो वेदान्तवेद्याय ब्रह्मणे परमात्मने ।
सच्चिदानन्दरूपाय श्रीकृष्णाय मुहुर्मुहुः ॥1॥

नौमीड्यं राधिकाराध्यं यशोदोत्सङ्गभूषणम् ।
मायाच्छन्नमविच्छिन्नं श्रीकृष्णाख्यमहं महः ॥2॥

निर्गुणं निष्क्रियं ब्रह्म ये ब्रुवन्ति ब्रुवन्तु ते ।
सगुणं सक्रियं सर्वं त्वमेवासीति मे मतिः ॥3॥

यत् 'सर्वं खल्विदं ब्रह्म' वेदेन प्रतिपादितम् ।
तत्तु साक्षात् त्वमेवासि[1], त्वद्भिन्नं नापरं क्वचित् ॥4॥

मात्रा यशोदया यद्वन् निबद्धस्त्वमुलूखले ।
निबद्धो भव तद्वन् मे निबन्धे प्रेमबन्धने ॥5॥

विश्वेश्वरं विबुधवन्द्यमनन्तशक्तिं,
मायाधिपं विगतमायममेयमूर्तिम् ।
अस्यां नितान्तकृशकायनिबन्धरज्जौ,
बद्धुं यते करुणया स्वयमेधि बद्धः
(स्वयमस्तु बद्धः) ॥6॥

षट्पदीयं मया नाथ पादपद्मे तवाप्यते ।
प्रपन्नं पतितं दीनं पाहि मां करुणानिधे ॥7॥

---

(1) एते चांशकलाः पुंसः 'कृष्णस्तु भगवान् स्वयम्' (श्रीमद्भाग० 1.3.28);
'कृष्णो ब्रह्मैव शाश्वतम्' (कृष्णोपनिषत् 12),
'कृष्णात् परं किमपि तत्त्वमहं न जाने' (स्वामी श्रीमधुसूदनसरस्वती) ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अवतरणिका

शुद्धाद्वैतं परब्रह्म श्रीकृष्णं भुक्तिमुक्तिदम् ।
प्रणम्यैतन्निबन्धेन तत्स्वरूपं निरूप्यते ।।

अस्ति तावद्विदितचरमेवैतत्तत्रभवतां भवतां विद्वद्वरेण्यानां, श्रद्धया समुपासितगुरुवेदान्तवचनानां, श्रुतिपारदृश्वनां यद् इह खलु न केवलं भूमण्डले, अपितु समस्तब्रह्माण्डगोलकेऽप्यस्त्ययमेक एवाभिलाषविषयः सर्वप्राणिनां यदिष्टं मे भूयादनिष्टं च माभूयादिति । अर्थात् 'आत्यन्तिकदुःखनिवृत्तिपूर्वकात्यन्तिकसुखोवलब्धिमेवेच्छति सर्वोऽपि प्राणिवर्ग' इति ।

'दुःखादुद्विजते सर्वः सर्वस्य सुखमीप्सितम्' इत्यस्मिन् सर्वमान्ये सकलजीवसाधारण्ये सिद्धान्ते नास्ति कस्यापि काचिदपि विप्रतिपत्तिरिति । एतस्यै एव 'आत्यन्तिकदुःखनिवृत्तिपूर्वकाक्षय्यसुखोपलब्धये' सकलजीवनिकायोऽहर्निशं प्रबलप्रयत्नपरायणो दरीदृश्यते । किन्तु नास्त्येतदपि तिरोहितं प्रेक्षावतां मनीषिवर्याणां यदुपर्युक्तस्याभिलष्यमाणस्यार्थस्य समुपलब्धिः चतुर्विधपुरुषार्थान्तर्गतपरमपुरुषार्थपदवाच्यमोक्षैकसमधिगम्यैव नान्ययेति ।

यावज्जन्ममरणपरम्परारूपसंसृतेरात्यन्तिकविरामो मोक्षो न भवति तावद्दुःखपरम्पराया अप्यात्यन्तिकनिवृत्तिः शाश्वतसुखोपलब्धिश्च आकाशकुसुमवत् सर्वथाऽसम्भाव्यैव । नास्त्यत्र कस्यापि कश्चित् सन्देहलेशोऽपि । आयातमेतदनेन यत्—'सर्वेषां प्राणिनामस्त्ययमेक एवाभिलाषविषयो मोक्ष एव ।' परं स मोक्षः कथमुपलब्धुं शक्यते, कथं वा सम्पादनीयः, किञ्च तत्र साधनमित्येवास्त्यत्र निबन्धे विवेचनीयं, साध्यस्य साधनाधीनत्वनियमात् ।

तत्र परमप्रमाणभूता श्रुतिस्तु सडिण्डिमघोषमुद्घोषयति 'ऋते ज्ञानान्नमुक्तिरिति' । ज्ञानातिरिक्तं साधनान्तरं नास्तीत्यर्थः । स्मृतिरपि 'ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति' (गी० 4.39), 'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते' (गी० 4.38), 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा (गी० 4.37) 'ज्ञानी त्वात्मैव मे मतम्' (गी० 7.18) एवं विधान्यनेकानि वचनानि श्रुतिस्मृतिप्रतिपादितानि समुपलभ्यन्ते । तथा हि—

'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति ।।' —श्वे० 6.20

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'तमेव विदित्वेति' मन्त्रस्य सन्दर्भप्रदर्शनावसरे श्रीमच्छङ्कराचार्याः स्वकीये भाष्ये प्रतिपादयन्ति यत्—'पूर्णानन्दाद्वितीयब्रह्मात्मपरिज्ञानादेव परमपुरुषार्थ-प्राप्तिर्नान्येनेति'। विवेकचूडामणावपि तैरुक्तम्—'आत्मैक्यबोधेन विना विमुक्तिर्न सिध्यति ब्रह्मशतान्तरेऽपि'(विवेक० 6)। न्यायसूत्रेऽपि 'दुःखजन्मप्रवृत्ति-दोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' (न्या० सू० 1.1.2) न्यायसूत्रस्यास्यायमभिप्रायो यत् मिथ्याज्ञानापायादेवापवर्गस्ततस्तु दुःख-स्यात्यन्तिकी निवृत्तिरिति। मिथ्याज्ञाननिवृत्तिश्च सत्यज्ञानैकनिवर्त्यत्वात् मिथ्या-ज्ञानस्य सत्यज्ञानाधीनैव सत्यञ्च 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० 2.1.1) अर्थात् ब्रह्मज्ञानादेव मिथ्याज्ञाननिवृत्तिः ततश्चापवर्ग इति। फलितमेतद् यद् 'दुःखस्या-त्यन्तिकनिवृत्तिर्वा अपवर्गो वा प्रत्यगभिन्नाद्वितीयब्रह्मज्ञानादेव भवितुमर्हति नान्यथेति।'

संक्षेपेण सप्रमाणमेतत् प्रतिपादितं यद्दुःखस्यात्यन्तिकनिवृत्तिः परमपुरुषार्थ-मोक्षैकसाधनीभूतब्रह्मज्ञानादेव भवितुमर्हति। नास्ति कश्चिदपर उपायो दुःख-स्यात्यन्तिकनिवृत्तेरिति। (अत्र कण्डिका परिवर्तनम्) शाश्वतानन्दोपलब्धिरपि तस्माद् ब्रह्मज्ञानादेव भवति नान्यथेत्यस्मिन् विषयेऽपि किञ्चिद् विविच्यते। तथा हि—

'एष ह्येवानन्दयाति' (तै० 2.7), 'रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति, को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्' (तै० 2.7) 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' (तै० 2.9) 'आनन्दो ब्रह्मेति व्यजानात्, आनन्दादेव खल्विमानि भूतानि जायन्ते, आनन्दादेव जातानि जीवन्ति, आनन्दं प्रयन्त्यभिसंविशन्ति' (तै० 3.6), 'विज्ञानमानन्दं ब्रह्म' (बृ० 3.9.28) इत्यादि शतशः सहस्रशः श्रुतयो ब्रह्मण आनन्दमयत्वमानन्दप्रदत्वञ्च प्रति-पादयन्ति।

एवञ्च परावरज्ञैः श्रीवेदव्यासैरपि 'आनन्दमयोऽभ्यासात्' (ब्र० 1.1.12), 'अथातो ब्रह्मजिज्ञासा' (ब्र० 1.1.1) इत्यादिभिरनेकैर्ब्रह्मसूत्रैर्ब्रह्मण आनन्दमयत्वं तज्ज्ञानस्य च आनन्दप्रदत्वं स्पष्टमेवाभिहितम्।

ब्रह्मज्ञानातिरिक्तानां कर्मादीनां, तज्जन्यफलानां स्वर्गादिसुखानां च क्षयित्वं, क्षणिकत्वं दुःखसंभिन्नत्वञ्च श्रुत्यादिभिर्बहुशः प्रतिपाद्यते। तद्यथा—'यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्रपुण्यचितो लोकः क्षीयते' (छा० 8.1.6) तस्मिन् यावत् संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते' (छा० 5.10.5) 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' (गी० 9.21), 'आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(गी० 8.16) इत्यादिश्रुतिस्मृतिभिः स्पष्टमेव 'पुण्योपार्जितस्वर्गादिब्रह्मलोक-पर्यन्तानां लोकानां तत्रत्यानामिन्द्रियजन्यवैषयिकसुखानाञ्च क्षयित्वं क्षणिकत्वञ्च स्फुटं प्रतिपाद्यते ।

विपरीतमेतस्य ब्रह्मज्ञानजन्यं सुखन्तु शाश्वतमक्षय्यमात्यन्तिकमतीन्द्रियं केवलबुद्धिग्राह्यमलौकिकमनिर्वचनीयमनुत्तममनुपमेयमनुभवगम्यञ्च भवति ।

तथा हि—

'बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत् सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते' ॥—गीता 5.21

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ —गी० 6.28)

'मामुपेत्य पुनर्जन्मदुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥ —गी० 8.15

मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते । (गी० 8.16)

ब्रह्मज्ञानमाहात्म्यविषयकोऽयमधस्तनः श्लोकः प्रसिद्ध एवास्ति, को नाम न जानाति विद्वान् यत्—

'स्नातं तेन समस्ततीर्थसलिले सर्वाऽपि दत्तावनिर्य-
ज्ञानाञ्च कृत सहस्रमखिलादेवाश्च संपूजिताः ।
संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ,
यस्य ब्रह्मविचारेण क्षणमपि स्थैर्यं मनः प्राप्नुयात् ॥

उपरिष्टादुपवर्णितेन सन्दर्भेण यद्यपि संक्षेपेणैतत् समुपदर्शितं यत् समस्त-प्राणिवर्गस्याभीष्टं या आत्यन्तिकदुःखध्वंसपूर्वकात्यन्तिकसुखोपलब्धिरस्ति सा केवलेन ब्रह्मज्ञानेनैव भवितुमर्हति नान्यथा तथापि तद् ब्रह्मज्ञानं केन प्रकारेण सम्पादयितुं शक्यते इत्येतदपि सम्यगालोचनीयमस्त्येव । श्रुतिस्त्वेवम् उपदिशति यत्—'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान् नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्'(मु० 1.2.12) तत्रापि बहुतिथं निर्व्यलीकेन शुद्धेन चेतसा गुरोः शुश्रूषया, पूर्वानेकजन्मोपार्जित-पुण्यपुञ्जोपलब्धया भगवत्कृपयैव च यस्य कस्यचिद्भाग्यशालिन एव ब्रह्मज्ञानं जायते, यतो भगवता श्रीकृष्णेन स्वयमेव गीतायामुक्तं यत्—

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥ —गी० 6.45

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥ —गी० 7.19

इति गीतोक्तश्लोकद्वयेन स्पष्टमेव प्रतीयते यत् 'वासुदेव एव सर्वमिति' ज्ञानार्थं बहूनां जन्मनां सततप्रयत्नशीलताऽपेक्ष्यते। साधारणेनाल्पायासेनातीव-दुर्लभमस्तीति। अन्यच्च—

आसुप्तेरामृतेः कालं नयेद् वेदान्तचिन्तया।
स्वल्पो नावसरो देयः कामादीनां कदाचन॥

अतो ब्रह्मज्ञानार्थं भगीरथप्रयत्नस्यावश्यकतास्ति। नास्तीदं ब्रह्मज्ञानं किमप्येतादृशमापणीयं वस्तु यदल्पेनानल्पेन वा मूल्येन समुपलब्धुं शक्येत।

अस्ति छान्दोग्योपनिषदि सप्तमाध्याये प्रथमखण्डे देवर्षिनारदसनत्कुमारयोः सम्वादरूपैकाख्यायिका तत्र ब्रह्मात्मजेन देवर्षिनारदेन अधीतसकलविद्येन वेदशास्त्रपारावारीणेनापि स्वीयमात्मविषयकमज्ञानं सनत्कुमारस्य समक्षं समुपस्थापितं विनिवेदितञ्चात्मन आत्मज्ञानाभावत्वं सशोकत्वञ्च। तथा हि— 'सोऽहं भगवो मन्त्रविदेवास्मि नात्मविच्छ्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति, सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयत्विति (छा० 7.1)। एतेन नारदकर्तृक स्वीयात्मज्ञानराहित्यविनिवेदनेन सुस्फुटं प्रतिभाति आत्मज्ञानस्य दुर्ज्ञेयता। नास्त्यत्र मनागपि सन्देहः। अन्यथा अधीतसकलर्ग्वेदादेर्नारदस्य को नाम शोकावसरः, किन्नाम च आत्मज्ञानराहित्यम् इति। उक्तञ्च मुक्तिकोपनिषदि—

अधीत्य चतुरो वेदान् धर्मशास्त्राण्यनेकशः।
ब्रह्मत्वं न जानाति दर्वीपाकरसं यथा॥
—मु० 65, 66।

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।
यमेवैषवृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥
—क० 1।2।23।

यद्यप्यात्मज्ञानार्थं श्रवणमनननिदिध्यासनान्यावश्यकानीति सर्वैरप्याचार्यैरङ्गीक्रियते तथापि सत्सु श्रवणादिषु दुश्चरितादीनि विघ्नकारीणीति तानि समनोयोगं सर्वथा हेयानि, अन्यथा केवलेन विज्ञानेनाप्यात्मज्ञानोपलब्धिर्दुर्लभैव। उक्तञ्च—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥
—क० 1.2.24

सारांशस्त्वयं यत् सर्वेषामप्याचार्याणां वेदादिप्रमाणग्रन्थेषु बद्धादराणां नास्ति किञ्चिदपि वैमत्यं मुक्तेर्ज्ञानसाध्यत्वविषये तथाप्यात्म याथात्म्यज्ञानमेव तत्साधकं नत्वन्यथाभूतस्यात्मनोऽन्यथाज्ञानमिति । उच्यतेऽपि—

अन्यथा सन्तमात्मानं योऽन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चौरेणात्मापहारिणा ॥

भगवता श्रीमच्छङ्कराचार्येणापि 'अथातो ब्रह्मजिज्ञासा' (ब्र० 1.1.1) इति सूत्रस्थ स्वकीये भाष्ये प्रतिपादितं यद्—'आत्मनः स्वरूपविषये सन्ति बह्व्यो विप्रतिपत्तयः । केचिद् देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना लोकायतिकाश्च प्रतिपन्नाः । 'इन्द्रियाण्येव चेतनान्यात्मेत्यपरे । मन इत्यन्ये । विज्ञानमात्रं क्षणिकमित्येके । शून्यमित्यपरे । अस्ति देहादिव्यतिरिक्तः संसारी कर्त्ता भोक्तेत्यपरे । भोक्तैव केवलं न कर्तेत्येके । अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित् । आत्मा स भोक्तुरित्यपरे । तत्राविचार्य यत्किञ्चित् प्रतिपद्यमानो निःश्रेयसात् प्रतिहन्येतानर्थं चेयात्' । अतः ब्रह्मस्वरूपविमर्शः श्रुतिप्रतिपादितदिशा सावधानेन पक्षपातशून्येन मनसा विप्रतिपत्तिनिरसनपूर्वकं सयुक्तिकं सप्रमाणं च कर्तव्य एव ।

शुद्धाद्वैतवेदान्तसिद्धान्तप्रवर्तकानां श्रीमद्वल्लभाचार्याणां तदनुयायिनां च ब्रह्मविषयिणी धारणा कीदृशीति प्रस्तुतनिबन्धस्यास्ति मुख्यः प्रतिपाद्यो विषयः । तथाप्यन्येषामप्याचार्याणां श्रीमच्छङ्कराचार्य, श्रीमद्रामानुजाचार्यादीनामपि सिद्धान्ताः प्रसङ्गवशात् तथ्यातथ्यविचारणार्थं निबन्धेऽस्मिन् यत्र तत्र प्रदर्शयिष्यन्ते, अनभिमतपरमतनिराकरणपूर्वकस्वमतस्थापनस्यैव निर्णयपदवाच्यत्वात् । यतिष्यते च यावच्छक्तियथासंभवं सिद्धान्तानां समन्वयविषये ।

ब्रह्मज्ञानस्य न केवलं मुक्तिसाधकत्वमेवास्ति प्रयोजनम्, अपितु व्यावहारिकेऽपि जगति तज्ज्ञानस्यास्ति महत्यावश्यकता, अन्यथा 'एषोऽहमन्योऽयम्' इतिभ्रान्त्या पशुबुद्धिमाश्रित्य जायमानो व्यवहारः परस्परं द्वेषादिकं समुत्पाद्य व्यावहारिके जगति महतीं दुर्निवारां दुरवस्थां जनयिष्यति । द्वैतबुद्धिपरिणामस्तु साम्प्रतं सर्वज्ञ सर्वैरनुभूयत एव, नानादुःखज्वालावलीढेव प्रतिभाति सम्पूर्णा पृथिवी । सर्वत्र हाहाकारध्वनिरेव श्रूयते । कथन्नैवं स्यात् 'द्वितीयाद्वै भयं भवति'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अतो द्वैतज्ञाननिरसनाय ब्रह्मस्वरूपनिर्धारणं परमावश्यकं प्रतिभाति। उक्तञ्च—

'देहमुद्दिश्य पशुवद्वैरं कुर्यान्नकेनचित्।
एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः॥

—श्रीमद्भा० 11.18.31

यथेन्दुरुदपात्रेषु भूतान्येकात्मकानि च॥

—श्रीमद्भा० 11.18.32

ज्ञाते सति ब्रह्मस्वरूपे तु शोकमोहयोः समूलमुन्मूलतं भवति। उक्तमेतदीशावास्योपनिषदि—

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥ —ईशा० 7

ब्रह्मस्वरूपविषये सर्वैरप्यास्तिकाचार्यैः प्रतिपादितेषु सिद्धान्तेषु आपाततः प्रतीयमानः परस्परभेदोऽपि सम्यग् विविच्यापाकरणीय एव। अन्यथा 'बहवो यत्र नेतारस्तद्वृन्दमवसीदतीतिन्यायश्चरितार्थो भविष्यति।

क्वचित् प्रतिपाद्यविषयस्यामैदे, एकत्वे चापि नाममात्रे विवादो दरीदृश्यते यथा साम्प्रतं शिवविष्ण्वादिनामाश्रित्य साम्प्रदायिकोऽसाम्प्रतिको विवादः। अतोऽविचारितप्रतीयमानभेदमपाकृत्य सर्वसिद्धान्तसमन्वयप्रयासोऽपि यावद्बुद्धिबलोदयं विधातुं यतिष्यते।

निष्कर्षस्त्वयम् यन्निबन्धेऽस्मिन् सर्ववेदान्तसिद्धान्तमूलभूतानामुपनिषदां तन्मूलकानामन्येषामपि स्मृतिपुराणादिवचनानां संग्रहः एवञ्च तत्तदाचार्याणामभिमतसंक्षिप्तसिद्धान्तदिग्दर्शनम्, वेदान्तशास्त्रस्यैहिकामुष्मिकोपयोगिता, सर्ववेदान्तसिद्धान्तसमन्वयस्थापनप्रयासः इत्यादि विषयाणां समावेशो भविष्यति। यद्यपि पल्वलकमठेन स्वपृष्ठे मन्दराचलधारणवन्मदीयोऽयं दुःसाहसोहासास्पद एव तथापि बालबुद्धिर्विश्रृंङ्खला।

अजादिभिर्यद् विबुधैः सुदुष्करं तदप्यहो कर्तुमुशन्ति बालिशाः।
अजातबोधाः शशिनं स्तनन्धया न किं जिघृक्षन्ति करेण बालकाः॥

विद्वांसः पाठकाः सर्वे प्रकृत्यैवातिकोमलाः।
क्षमिष्यन्ते ममाज्ञस्य कृपयाऽनर्गलं वचः॥

इत्यलमनल्पजल्पनेन। शम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सांख्यतत्त्वविमर्शः

यद्यपि निबन्धस्यास्य मुख्यं प्रयोजनं 'शुद्धाद्वैतवेदान्तसम्मतं ब्रह्मस्वरूपवर्णनमेवास्ति तथापि ब्रह्मस्वरूपविषयेऽन्येषामाचार्याणां दर्शनकाराणां च कीदृशो विचारः सिद्धान्तंश्च कीदृशोऽस्तीत्यपि विवेचनीयमेवास्ति । अन्यथा परमतनिराकरणपूर्वकस्वमतस्थापनरूपनिर्णयस्यासमीचनत्वमेवापतेत ।

तत्र तावत् सत्स्वनेकेषु सम्प्रदायेषु विविधविधविभिन्नमतेषु प्रथमतो दर्शनकाराणामेव मतं विवेचनीयमस्ति, प्राधान्यात्तेषाम् । दर्शनान्यपि यद्यपि नास्तिकास्तिकभेदेन अन्यान्यपि कतिपयानि चार्वाकादीनां सन्त्येव तथापि तानि तूपेक्ष्याण्येव, प्रकृतनिबन्धस्य बहिर्भूतविषयत्वात् । मुख्यतया षड्दर्शनान्येव दर्शनपदवाच्यत्वेन प्रसिद्धानि सन्ति । तद्यथा—

> कपिलस्य कणादस्य गौतमस्य पतञ्जलेः ।
> व्यासस्य जैमिनेश्चापि दर्शनानि (शास्त्राण्याहुः) षडेव हि ॥

अतः सर्वतः प्रथमं पूर्ववर्तितामाश्रित्य कपिलमुनिप्रणीत सांख्यमतमेव विवेक्तुमारभ्यते ।

सांख्याः (सांख्यमतावलम्बिनः) सन्ति द्विविधाः । एश्वरवादिनिरीश्वरवादिभेदात् । तत्र निरीश्वराणां मतै ब्रह्मविचारस्यावसर एव नास्ति तथापि तैर्यथा निरीश्वरत्वं साध्यते स्थाप्यते च, तत् समीचीनमसमीचीनं वेत्यस्माभिरपि विवेचनीयमेवास्ति ।

सांख्यमतावलम्बिनोऽपि 'प्रमेयसिद्धिः प्रमाणाद्धि' इति प्रमाणबलादेव प्रमेयसिद्धि कुर्वन्ति । तेषां मते च प्रमाणं त्रिविधं भवति । तथा हि—

> दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।
> त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥ सां० का० 4

तत्राप्तवचनपदेन वेदा एव गृह्यन्ते, अपौरुषेयत्वेन ब्रह्मणो निःश्वसितत्वेन च तेषामभ्रान्तवादित्वात् । यद्यपि पातञ्जलयोगदर्शनादावीश्वरस्य सत्ताङ्गीकृतास्ति 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' (यो० सू० 1.24) 'तत्र निरतिशयं सर्वज्ञबीजम्' (यो० सू० 1.26) 'पूर्वेषामपि गुरुः कालेनानवच्छेदात्' (यो० सू० 1.26) एवं विधैः कतिपयैः सूत्रैः (तपः-स्वाध्याये-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्वरप्रणिधानानि क्रियायोगः समाधिसिद्धिरीश्वरप्रणिधानात्) तथापि निरीश्वरवादिभिः सांख्यैस्तानि पातञ्जलसूत्राणि प्रमाणत्वेन गृह्यन्ते न वेति त एव जानन्तु, किन्त्वस्माभिस्तु स्पष्टमेव प्रतीयते यत्तो नैतानि सूत्राणि प्रमाणत्वेन मन्यन्त इति। अस्तु, वेदप्रामाण्यप्राधान्यमानिनस्तु तेऽपि सन्त्येव, अतः श्रुतिवचनैराप्तप्रतिपादितस्मृतिवचनैश्च तेषां निरीश्वरवादितां निराकर्तु संक्षेपेण यत्यते।

तत्र तावत् तेषां मतं प्रदर्श्य पुनर्निराकरिष्यते—

'संख्यायन्ते तत्त्वान्यत्रानेनेति सांख्यम्' इति व्युत्पत्तिः। महर्षिश्रीकपिलमुनिप्रणीतस्य सांख्यदर्शनस्य षट्स्वास्तिकदर्शनेषु महत्त्वपूर्ण-स्थानमस्तीति को नाम न जानाति विद्वान्। तत्र जगज्जीवादिविषये बहुशो विचार्य सिद्धान्तितं यत् प्रकृतिपुरुषयोर्वास्तविकस्वरूपज्ञानमन्तरेण दुःखत्रयान्मुमुक्षा आकाशकुसुमायितैवेति नात्र कश्चित् सन्देहः। ईश्वरकृष्णकृत प्रथमकारिकायामेवैतत् प्रतिपादितं यत्—

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।
दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात्॥ —(सां० का० 1)

एवं दृष्टोपायानामकिञ्चित्करत्वं संसाध्यानुश्रविकोपायानामप्य शुद्धिक्षयातिशययुक्तत्वाद् अनैकान्तिकत्वमनात्यन्तिकत्वञ्च संसाधितम्। तथाहि—

'दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः' (सां० का० 2)

षड्दर्शनटीकाकृद्भिः श्रीवाचस्पतिमिश्रैरस्मिन् विषये वैदग्ध्यपूर्णाविचारणा विहिता सातु तत एवावगन्तव्या। तैरुक्तं यत् 'आनुश्रविकोऽपि कर्मकलापो दृष्टेन तुल्यं वर्तते ऐकान्तिकात्यन्तिकदुःखत्रयप्रतीकारानुपायत्वस्यो भयत्रापि तुल्यत्वात्'। एवञ्चैतदप्युक्तं तैर्यत् कारिकास्थानुश्रविकपदं साम्नान्येनाभिहितमपि केवलं कर्मकलापाभिप्रायमिति, विवेकज्ञानस्याप्यानुश्रविकत्वात्। तथा च श्रूयते—आत्मा वाऽरे ज्ञातव्यः' प्रकृतितो विवेक्तव्यः (बृ० 2।4।5) 'न स पुनरावर्तते' (छा० 8।15) इति।

'तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्' सांख्यनयेऽविशुद्धिक्षयातिशयराहित्याद्धेतो 'र्व्यक्ताव्यक्तज्ञविज्ञानात्' दुःखत्रयध्वंसरूपं कैवल्यं भवति। तदेव च मोक्ष इत्यभिधीयते। अत्र व्यक्तपदेन महदहंकारपञ्चतन्मात्राण्येकादशेन्द्रियाणि, आकाशादीनि पञ्चमहाभूतानि च त्रयो विंशतिस्तत्वानि गृह्यन्ते। अव्यक्तपदेन च प्रकृतिः। ज्ञपदेन च पुरुषो गृह्यते स च प्रतिक्षेत्रं भिन्न इति। एवं पञ्चविंशतिस्तत्वानि सन्ति। तत्राचेतनाऽपि प्रकृतिः पुरुषाणां भोगापवर्गसिद्धये प्रवर्तते। यद्यपि चेतनानधिष्टिताचेतनप्रवृत्तिः प्रायो न दृश्यते तथापि यथा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वत्सविवृद्धयर्थमचेतनमपि क्षीरं प्रवर्तते तथैव जडापि प्रकृतिः प्राणिनां भोगापवर्गार्थं प्रवर्ततेऽतः प्रकृतेरेव सकाशात् महदादीनि तत्त्वानि साक्षात् परम्परया च जायन्ते। सा च प्रकृतिरनापा जीवाश्चाप्यनापा एव। तत्र जीवाः प्रतिशरीरं भिन्नाः। विवेकख्यातिं यावत् ते बुद्धिधर्मान् सुखदुःखादीन्यात्मन्यध्यस्य भोगभागिनो भवन्ति जातायाञ्च सत्त्वपुरुषान्यताख्याता वात्मनः कूटस्थनित्यतामकर्तृत्वाभोक्तृत्वे च परिज्ञाय ऐकान्तिकात्यन्तिकदुःखत्रयध्वंसरूपं कैवल्यं प्राप्य मुक्ता भवन्ति। उक्तञ्च—

'विवेकख्यातिपर्यन्तं ज्ञेयं प्रकृतिचेष्टितम्'। इति

सृष्टिसर्जनात्मककर्मणि न कापीश्वरस्यावश्यकतास्तीति तेषां सांख्यमतावलम्बिनां सिद्धान्तः। अत एव कदाचित् ते सांख्यमतावलम्बिनो नेश्वर हृस्यसत्तामङ्गीकुर्वन्ति। यद्यपि तेऽपि 'प्रमेयसिद्धिः प्रमाणाद्धि' इति प्रमाणत्रयबलादेव प्रमेयसिद्धिं कुर्वन्ति 'दृष्टनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्। त्रिविधं प्रमाणमिष्टम्, प्रमेयसिद्धिः प्रमाणाद्धि (सां० का० 4)। तत्रैतस्मिन्प्रमाणत्रयेऽपि श्रुतिवचनानां प्राधान्यं दृष्टानुमानप्रमाणापेक्षयेत्यपि स्वीकुर्वन्ति। वाचस्पतिमिश्रमहोदयैरपि व्याख्यातं यत् 'तच्च श्रुतिवचनं स्वतं प्रमाणम्, अपौरुषेयवेदवाक्यजनितत्वेन सकलदोषाशङ्काविनिर्मुक्तैर्युक्तं भवति। एवञ्च वेदमूलं स्मृतीतिहासपुराणवाक्यजनितमपि ज्ञानं युक्तम्। सत्यप्येवं 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति' (तैं० 3.1) 'पुरुष एवेदं सर्वं यद्भूतं यच्चभाव्यम्' (ऋ० 10.90.2) 'पादोऽस्य विश्वाभूतानित्रिपादस्यामृतं दिवि' (ऋ० 10.90.3) 'यथा सुदीप्तात्पावकात् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः' (मु० 2.1.1) 'महतः परमव्यक्तमव्यक्तात्पुरुषः परः, पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः' (क० 1.3.11) 'स हैतावानास' (वृ० 1.4.3) 'सोऽवेदहं वाव सृष्टिरस्म्यहं हीदं सर्वमसृक्षीति ततः सृष्टिरभवत्' (वृ० 1.4.5) इत्याद्यनन्ताः श्रुतयः एवञ्च 'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते। इति मत्वा भजन्ते मां बुधा भावसमन्विताः' (गी० 10.80) 'अहमादिश्च मध्यञ्च भूतानामन्त एव च' (गी० 10.20) 'सर्गाणामादिरन्तश्च मध्यञ्चैवाग्मर्जुन' (गी० 10.32) 'यच्चापि सर्वभूतानां वीजं तदहमर्जुन। न तदस्ति विना यत् स्यान्मयाभूतं चराचरम्' (गी० 10.39) 'अथवा बहुनैतेन किं ज्ञातेन तवार्जुन। विष्टम्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' (गी० 10.42) 'त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम्। वेत्ताऽसि वेद्यञ्च परञ्च धाम त्वया तत विश्वमनन्तरूप'(गी०11.38)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'बहिरन्तश्चभूतानामचरं चरमेव च। सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत्' (गी० 13।15) 'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा' (गी० 7।6) इत्यादिस्मृतिवचनानि एवञ्च—'कृष्ण-कृष्ण महायोगिस्त्वमाद्यः पुरुषः परः। व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः' (श्रीमद्भा० 10।10।29) 'न चान्तर्नबहिर्यस्य न पूर्वं नापि चापरम्, पूर्वापरं बहिश्चान्तर्जगतो यो जगच्चयः (भा० 10।9।13) 'खं वायुमग्निं सलिलं महीञ्च ज्योतींषि सत्त्वानि दिशो द्रुमादीन्। सरित् समुद्रांश्च हरेः शरीरं यत् किञ्च भूतं प्रणमेदनन्यः' (भा० 11।2।41) 'यथोर्णनाभिर्हृदयादूर्णां संतत्यवक्त्रतः, तया विहृत्य भूयस्तांग्रसत्यैवं महेश्वरः' (भा० 11।9।21) 'जगतामादिभूतस्त्वं, जगत्त्वं जगदाश्रयः। सर्वभूतेष्वसंयुक्त एको भाति भवान् परः' (अध्यात्मरा० बालकाण्ड 1।5।52) 'ओंकार वाच्यस्त्वं राम वाचामविषयः पुमान्। वाच्यवाचकभेदेन भावानेव जगन्मयः' (अ० रा० बा० 5।53) 'कार्यकारणकर्तृत्वफलसाधनभेदतः। एको विभासि राम त्वं मायया बहुरूपया (अ० रा० बा०) 5।54) इत्यादिश्रुतिमूलकपुराणवचनानि च सांख्यसिद्धान्तानुसारिभिः प्राय उपेक्षितानीवेति प्रतीयते। किं बहुना, सांख्यशास्त्रप्रवर्तकमहर्षि कपिलदेवोऽपि देवहूत्यामवतीर्णो भगवानेव साक्षात् इत्यत्र नास्ति कस्यचिन्मनागपि सन्देहः। देवहूतिं प्रति महर्षिकर्दमस्य वचनमेतद् यद्—'माखिदो राजपुत्रीत्थमात्मानं प्रत्यनिन्दिते। भगवांस्तेऽक्षरो गर्भमदूरात् संप्रपत्स्यते ।। (भा० 3।24।2) 'तस्यां बहुतिथे काले भगवान् मधुसूदनः। कार्दमं वीर्यमापन्नो जज्ञेऽग्निरिव दारुणि ।। (भा० 3।24।6)

भगवन्तं परं ब्रह्म सत्त्वेनांशेन शत्रुहन्।
तत्त्वसंख्यानविज्ञप्त्यै जातो विद्वानजः, स्वराट् ।।
(भा० 3।24।10)

वेदाहमाद्यं पुरुषमवतीर्णं स्वमायया।
भूतानां शेवधिं देहं बिभ्राणं कपिलं मुने ।।
(भा० 3।24।16)

एष मानवि ते गर्भं प्रविष्टः कैटभार्दनः।
अविद्यासंशयग्रन्थिं छित्त्वा गां विचरिष्यति ।।
(भा० 3।24।18)

स एव भगवानद्य हेलनं नगणय्यनः।
गृहेषु जातो ग्राम्याणां यः स्वानां पक्षपोषणः ।।
(भा० 3।24।29)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मामात्मानं स्वयं ज्योतिः सर्वभूतगुहाशयम् ।
आत्मन्येवात्मना वीक्ष्य विशोकोऽभयमृच्छसि ॥
(भा० 3.24.39)

वासुदेवे भगवति सर्वज्ञे प्रत्यगात्मनि ।
परेण भक्तिभावेन लब्धात्मामुक्तबन्धनः ॥
(भा० 3.24.45)

आत्मानं सर्वभूतेषु भगवन्तमवस्थितम् ।
अपश्यत् सर्वभूतानि भगवत्यपि चात्मनि ॥
(भा० 3.24.46)

कपिलस्तत्त्वसंख्याता, भगवानात्ममायया ।
जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणाम् ॥
(भा० 3.25.1)

य आद्यो भगवान् पुंसामीश्वरो वै भवान् किल ।
लोकस्य तमसान्धस्य चक्षुः सूर्य इवोदितः ॥
(भा० 3.25.9)

बिसृज्य सर्वानन्यांश्च मामेवं विश्वतोमुखम् ।
भजन्त्यनन्यया भक्त्या तान् मृत्योरतिपारये ॥
(भा० 3.25.40)

नान्यत्र मद्भगवतः प्रधानपुरुषेश्वरात् ।
आत्मनः सर्वभूतानां भयं तीव्रं निवर्तते ॥
(भा० 3.25.41)

मद्भयाद्वाति वातोऽयं सूर्यस्तपति मद्भयात् ।
वर्षतीन्द्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ॥
ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः ।
क्षेमाय पादमूलं मे प्रविशन्त्यकुतोभयम् ॥
एतावानेव लोकेऽस्मिन् पुंसां निःश्रेयसोदयः ।
तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरम् ॥
—भापू० 3.25.42-44

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः ।
प्रत्यग्धामा स्वयं ज्योतिर्विश्व येन समन्वितम् ॥
(भा० 3.26.3)

स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः ।
यदृच्छयैवापगतामभ्यपद्यत लीलया ॥
(भा० 3.26.4)

दैवात् क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् ।
'आधत्त'वीर्यं साऽसूत महत्तत्व हिरण्मयम् ॥
(भा० 3.26.19)

विश्वमात्मगतं व्यञ्जन् कूटस्थो जगदङ्कुरः ।
स्वतेजसाऽपिबत्तीव्रमात्मप्रस्वापनं तमः ॥
(भा० 3.26.20)

एवञ्चेत् साक्षाद् भगवान् कपिलमुनिरेव प्रकृतेः परस्य परमपुरुषस्य सत्तामङ्गी करोति, तन्नजाने कथं तत्सिद्धान्तावलम्बिनः केचन सांख्यानिरीश्वरवादिता-मवलम्बन्त इति संक्षेपः ।

योगदर्शन-दर्शनम्

महर्षिपतञ्जलिविषयेऽस्तीयं प्रसिद्धिः 'योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन । योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि । तत्र पदसाधुत्वप्रदर्शनपरव्याकरणग्रन्थेषु यथा पातञ्जलमहाभाष्यस्य सर्वोपरिस्थानं वर्तते यथा च शरीरमलशोधकेषु वैद्यकग्रन्थेषु चरकसंहितायाः प्राधान्यमस्ति, मन्ये तथैव चित्तमलापकरणे योगदर्शनस्यापि मूर्धन्यत्वस्येवेति । तत्र स्वरूपावस्थितिरूपस्य कैवल्यस्यावाप्तिर्योगेन प्रतिपादिता । योगश्च 'योगश्चित्तवृत्तिनिरोधः' इति प्रथमेनैव सूत्रेणोक्तः । अग्रे च कास्ता वृत्तयः कथञ्च तासां निरोध इति सर्वमपि सरलया भाषया सुस्पष्टं प्रतिपादितम् । चित्तवृत्ति (प्रमाणविपर्ययविकल्पनिद्रास्मृति) निरोधसाधनेषु सत्स्वन्येष्वपि केषुचित् प्रथमम् 'अभ्यासवैराग्याभ्यां तन्निरोध इत्युक्तम् । गीतायामपि—

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ गी० 6.34

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्येवमर्जुनेन सन्देहे समुपस्थापिते भगवता श्रीकृष्णेनापि चित्तवृत्तिनिरोधसाधनत्वेनाभ्यासवैराग्ये एव निर्दिष्टे तथा हि—

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ।। गीता० 6.35

तदनन्तरमभ्यासवैराग्योर्लक्षणं 'तत्र स्थितौ यत्नोऽभ्यासः', 'दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञावैराग्यमिति' सूत्रद्वयेन प्रतिपादितम् । तेषु सर्वेषु चित्तवृत्तिनिरोधसाधनेषु मुख्यतया 'ईश्वरप्रणिधानाद्वा' (समाधिपाद 23) अनेन सूत्रेणेश्वरप्रणिधानस्यैव प्राधान्यमङ्गीकृतम् । अनेनैतत्सुस्पष्टं भवति यद् योगसूत्रकारेण सांख्यदर्शनाभिमतपञ्चविंशतितत्त्वातिरिक्तेश्वरस्य पृथक्सत्ता स्वीक्रियत इति । न केवलं सत्तैव स्वीक्रियतेऽपि तु तत्रेश्वरे निरतिशयसर्वज्ञबीजत्वमपि प्रतिपादितम् 'तत्र निरतिशयं सर्वज्ञबीजम्' (यो० समाधिपा० 25) 'पूर्वेषामपि गुरुः कालेनानवच्छेदात्' इत्यनादित्वं, तस्यवाचकत्वेन च 'तस्य वाचकः प्रणवः' (यो० स० 27) इति प्रणवमभिधाय तस्य प्रणवस्य जपस्तथा तदर्थभूतस्येश्वरस्य ध्यानं कर्तव्यतया निर्दिष्टं 'तज्जपस्तदर्थभावनम्' (यो० स० 28) इति । तेन जपेन तदर्थभावनेन च प्रत्यक्चेतनायाः समुपलब्धिरन्तरायाणामभावश्च भवति । 'ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च' (यो० स० 29) अत एव सांख्यदर्शनापेक्षया योगदर्शनस्य वैशिष्ट्यं पार्थक्यञ्च भवति । साधनपादेऽपि क्रियायोगत्वेन 'तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः' (यो० सा० 1) इतीश्वरप्रणिधानस्य समाधिभावनार्थं क्लेशतनूकरणार्थञ्चावश्यकता प्रतिपादिता । 'समाधिसिद्धिरीश्वरप्रणिधानाद्' इति समाधिसिद्धावीश्वरप्रणिधानस्य कारणता चोक्ता । क्रियायोगान्तर्गतयोस्तपःस्वाध्याययोः फलं केवलं यथासंख्येन कायेन्द्रियसिद्धिस्तथेष्टदेवतासंप्रयोगश्च जायते, किन्त्वीश्वरप्रणिधानेन समाधिसिद्धिर्भवतीत्युभयापेक्षयेश्वरप्रणिधानस्य प्राधान्यमिति प्रतीयते ।

सारांशस्त्वयं यद् योगदर्शनस्यापि समाधिसिद्धये कैवल्योपलब्धये चेश्वरप्रणिधानमर्थाद् ब्रह्मचिन्तनम् इत्येकमेव प्रधानं साधनमस्ति । अन्यानि च साधनानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिभूतान्यस्यैव प्रधानसाधनस्येश्वरप्रणिधानरूपस्योपकाराणीति ।

पातञ्जलयोगदर्शने जगज्जीवादिविषये नातिस्पष्टतया किमप्यभिहितम् तथापि सूत्रस्वारस्यादेतत्प्रतीयते यत् सांख्यदर्शनाभिमतानि पञ्चविंशतितत्त्वानि प्रधानादीनि योगदर्शनस्याप्यभिमतान्येव, यद्यपि साधारणतया विचा-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रेण बुद्धावेवं प्रतिभासते यद् ईश्वरसत्तास्वीकारेणैकं तत्त्वान्तरमपि योगसम्मतमिति तथापीश्वरेऽपि पुरुषविशेषत्वमेवाङ्गीकृतं न तु पुरुषभिन्नत्वमिति नेश्वरस्य तत्त्वान्तरत्वमिति। पुरुषत्वजातेरुभयत्र जीवेश्वरयोरनुस्यूतत्त्वात्। अनेनैतत् समायाति यद् यथा घटपटादिपदार्थेषु भिन्नेष्वपि पृथिवीत्वेनैकविधत्वमेव एवं जीवेश्वरयोरपि भेदाभाव एव। अन्तरन्तु केवलमेतावदेव यज्जीवा अल्पज्ञा अल्पशक्तयोभवन्तीश्वरस्तु सर्वज्ञः सर्वशक्तिसम्पन्नश्चेतीश्वरनाममहिम्नाऽपि प्रतीयते।

यस्येश्वरवाचकशब्दस्योकारात्मकस्य जपात् प्रत्यक्चेतनाधिगमोऽन्तरायाभावश्च जीवानां जायते स ईश्वरः स्वयं कीदृशशक्तिसम्पन्नोऽस्तीति किमुवक्तव्यम्। पुरुषु सर्वशरीरेषु शेत इति पुरुष इति व्युत्पत्त्यापि सर्वशरीरेषु एकस्यैवेश्वरस्य समन्वयः प्रतीयते। अत एवोक्तं पुरुषसूक्ते 'पुरुष एवेदं सर्वं' इति।

फलितं त्वेतद् यज्जीवेनात्मनानुप्रविश्य केवलमेक ईश्वर एव प्रतिशरीरं शरीरान्तःकरणादिभेदाद् उपाधिभेदेन भिन्न इव जीवरूपेण प्रतिभाति न तु तत्र वास्तविको भेद इति। 'तदा द्रष्टुः स्वरूपेऽवस्थानम्' इति जीवानां स्वरूपावस्थानरूपं कैवल्यं सुसङ्गतं भवति।

फलतो योगदर्शनस्यापि 'सर्वंखल्विदं ब्रह्म' इत्यस्मिन् विषये नास्ति काचिद् विप्रतिपत्तिः। अत एकमेवाद्वितीयमिति सिद्धान्तस्तेषामपि सम्मत एव। अनेन प्रकारेणाद्वितीयसिद्धान्ते (न) योगशास्त्रस्य समन्वयः विस्पष्ट एवेत्यलम्।

न्यायवैशेषिकदर्शनयोर्ब्रह्मविषयिणीधारणा

न्यायदर्शनं वैशेषिकदर्शनं चेमे उभे अपि दर्शने ईश्वरवादिनी। न्यायदर्शने समस्तब्रह्माण्डे प्रत्यक्षानुमानोपमानाप्तवचनैर्यानि वस्तूनि विविधविधानि समुपलभ्यन्ते सिध्यन्ति च चेषां सर्वेषां द्रव्यगुणकर्मसामान्यविशेषसमवायाभावेषु सप्तपदार्थेष्वेवान्तर्भावो भवति। तत्र पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसीति नवविधेषु द्रव्येष्वेकमात्मनामकं द्रव्यं स्वीक्रियते यस्य लक्षणं च 'ज्ञानाधिकरणमात्मेति' निगद्यते।

तद्दर्शनानुयायिनां नैयायिकानां मते स आत्मा द्विविधो भवति जीवात्मा परमात्मा च। तत्र जीवात्मानः प्रतिशरीरं भिन्ना अल्पज्ञा अल्पशक्तयश्च भवन्ति; किन्तु परमात्मा ईश्वरापरनामधेय एकः सर्वज्ञः सर्वशक्तिमान् नित्यश्चेति।

स परमात्मैवास्य सकलप्रपञ्चस्य रचयिताऽस्ति। न तद्भिन्नः कश्चिदन्योऽस्य निर्माणे मनसाऽपि चिन्तयितुं क्षमो भवितुमर्हति। जानातीच्छति ततो यतत

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति नियममनुसृत्येश्वरातिरिक्तानां सर्वेषामसर्वज्ञत्वादसर्वशक्तिमत्त्वाच्च यत्नाभावे सति सुतरां रचनाया असंभाव्यत्वं सिद्धमेव ।

स परमात्मा तु सर्वज्ञत्वात् सर्वं भूतं भावि वर्तमानं च संशयविपर्ययादिदोषरहित यथा तथा जानाति, जीवानां कायिकवाचिकमानसिकसकलकर्माण्यपि जानात्यस्तद्भोगार्थं शरीरेन्द्रियविषयरचनाविषयिणीच्छा संजायते तदनन्तरं च सर्वशक्तिमत्त्वाद् विविधविधान्यनेकानि ब्रह्माण्डानि यथेच्छ क्षणेन निर्मिमीते ।

न च पूर्वं तु यावदेतदेव न सिध्यति यदीश्वरनामकं किमपि वस्तु विद्यते न वा तावत्तस्य गुणगणगरिम्णो गानं शशविषाणसौन्दर्यवर्णनमिव हास्यास्पदमेवेति चेन्न कार्यस्य सकर्तृकत्वनियमात् । तत्रेत्थमनुमानप्रयोगः—क्षित्यङ्कुरादिकं कार्यं कर्तृजन्यं कार्यत्वाद् घटवत् ।

एव चाप्तवचनत्वाद्वेदार्थप्रामाण्यवादित्वेन "यतो वेति" श्रुतिवाक्यैरपि प्रमाणयन्ति परमात्मनः सतां तत्स्थान् सर्वज्ञत्वसर्वशक्तिमत्त्वादिगुणगणनिकायांश्च ।

इति तेषां नैयायिकानां मत ईश्वरसिद्धिप्रकारः संक्षेपेण प्रदर्शितः । चेतनानधिष्ठितरथादिगत्यभावदर्शनेन कश्चिच्चेतन एवास्य कर्ता भवितुमर्हति नत्वचेतना प्रकृतिरिति ।

अवशिष्यते यत् तेषां मतं 'सर्वं खल्विदं ब्रह्म' इति शुद्धाद्वैतवेदान्तेन समन्वेति न वा । तत्र विशेषविचारणा तु समन्वयप्रकरणे सामूहिकरूपेण विधास्यते, किन्तु प्रसङ्गवशादत्रापि किमप्यवगन्तव्यमेवास्ति ।

यदवधि यावन्मदीया मन्दमतिः प्रसरति, प्रतीयते यत् तावत्तु न्यायदर्शनमपि 'एकमेवाद्वितीयं ब्रह्म' (छां० 6 2.1) 'सर्वंखल्विदं ब्रह्म' (छा० 3.14.1) इति शुद्धाद्वैतवेदान्तसिद्धान्तेन सर्वथा सम्मतमेवेति । तथा हि—

'नैयायिकैः 'एकत्वादिव्यवहारहेतुः संख्या सा चैका' इति मन्यते 'सा चैका' इत्यत्राप्येकत्वं व्यावहारिकमेव नैसर्गिकं वेति मन्तव्यमेकमन्यर्थकत्वस्यापि सापेक्षत्वाद् द्वित्वादिकमपि पारमार्थिकं स्यादेवातः प्रतीयते यत्तेषां मतेऽपि नानात्वं मायिकं प्रतिभासते । वस्तुतत्वे कस्यैव पदार्थस्य सप्तविधत्वमनेकत्वं च काल्पनिकं व्यावहारिकं च सुस्फुटमेव । यथा वा एकैव द्रव्यत्वजातिर्नवद्रव्येषु पृथिव्यादिषु वर्तत एवमेवैकैव पदार्थत्वजातिः सप्तस्वपि पदार्थभेदेषु वर्तते । फलत एक एव पदार्थः पूर्वं सप्तधा कल्प्यते तदनन्तरं क्रमशस्तेषामपि भेदप्रभेदीनाश्रित्य प्रपञ्चाकारो भवति । मूलतस्त्वेकः पदार्थ एवास्ति, तस्यैव विस्तरोऽयं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रपञ्चः। सारांशस्त्वयं यन्मूलतः पदार्थ एकः सन्नेव सप्ततत्त्वमेकैकांशो भेदप्रभेदा-नाश्रित्यानेकत्वं प्रपञ्चत्वं च भजते । स एवैकः पदार्थोऽनिर्वचनीयो 'ब्रह्मेत्युच्यते' । अर्थाद् इदं सर्वं ब्रह्मेवेति। अनेन प्रकारेण द्वितीयत्वं, सर्वस्यापि ब्रह्ममयत्वं च' न्यायनयेऽपि सिध्यत्येवेति ।

न्यायसिद्धान्तमुक्तावलीनामके ग्रन्थे प्रथमः श्लोको यो मंगलाचरणात्मकः पठितस्तेनापि शुद्धाद्वैतवेदान्तसिद्धान्तस्य संगतिः सम्यक् प्रतीयते न्यायदर्शनेन। तथा हि—शुद्धाद्वैतवेदान्ते गोपीजनवल्लभो नन्दनन्दनः श्रीभगवान् कृष्ण एव साक्षात् परब्रह्मेति मन्यते, मुक्तावल्यामपि "नूतन-जलधर-रुचये..." इति नूतनजलधररुचिर्गोपवधूटीदुकूलचौरः संसारवृक्षस्य बीजभूतत्वेन भगवान् श्रीकृष्ण एव स्वीकृतः। अतोऽपि शुद्धाद्वैतवेदान्तेन सहैकमत्यं प्रतीयते न्यायदर्शनस्य ।

भवतु नाम परमाणुवादमाश्रित्य विरोधाभासः, परन्तु शुद्धाद्वैतवेदान्ते सर्व-कर्तृसर्वशक्तिब्रह्मणा सह स वादोऽपि नाति प्रतिकूल इति। ब्रह्मण इच्छामात्रेण सर्वं भवितुमर्हतीति सर्वं सुसम्पन्नमेव। मुख्यांशे सेश्वरत्नास्तिकत्वयोर्नास्ति काचित् विसंवादितेति । शम् ।

वैशेषिकदर्शनस्यापीश्वरविषयकः सिद्धान्तः प्रायः स एवास्ति यो न्यायदर्शन-स्यास्तीति ततो विस्तरभिया अतिसीमचर्वितचर्वणस्यानौचित्यमिति धिया च विरम्यते ।

उपनिषत्सु ब्रह्मस्वरूपम्

'तं त्वौपनिषदं पुरुषं पृच्छामीति' वाक्यात् प्रतीयते यत् ब्रह्मणो यथात्म्यज्ञानं वस्तुत उपनिषद्भ्य एव जायते। अन्येऽपि ग्रन्थास्तन्मूलकत्वात् तद्व्याख्यानभूता एव ब्रह्म प्रतिपादका कथ्यन्ते। अत उपनिषत्सु ब्रह्मणः किं रूपं प्रतिपादितमिति विवेचनीयमेव। तत्र सर्वाभ्यो मुख्याभ्य उपनिषद्भ्यः किञ्चित् किञ्चिदुधृत्य प्रदर्श्यते ।

तत्रेशावास्योपनिषदि प्रथममन्त्र एव विस्पष्टं प्रतिपादितं यद् 'ईशाऽऽवास्य-मिदं सर्वं यत् किञ्च जगत्यां जगत्' (ईशा० 1) अर्थात् जगत्यां ब्रह्माण्डे यत् किञ्चिदपि वस्तु विद्यते तत् सर्वम् ईशा ब्रह्मणा आवास्यमाच्छादनीयम्। तद्व्यतिरिक्तं किमप्यन्यद्वस्तुन जडजीवात्मकमस्तीत्यर्थः। सर्वं ब्रह्ममयं जगदिति भावार्थः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कठोपनिषद्यस्त्येकाख्यायिका यमनचिकेतःसंलापात्मिका । तस्यामाख्यायिकायां यमराजेन 'तृतीयं वरं नचिकेतो वृणीष्व' (क० १.१.१०) इत्येवं पृष्टः सन् नचिकेतास्तृतीयवरत्वेन येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके ।

एतद्विद्यामनुशिष्टस्त्वयाहं, वराणामेषवरस्तृतीयः (क० 1.1.20) इति वरं याचितवान् । यत एष तृतीयो वरो 'वराणामेषवरः' वरणीयानां सर्वेषां वरः श्रेष्ठः इति । अथवा वराणां त्रयाणां मध्ये तृतीयोऽयं वरो मया याच्यते । इति ।

अतः परं बहुधा प्रलोभितोऽपि स स्वनिश्चयान्न चचाल । अतस्तमात्मज्ञानाधिकारिणं विज्ञाय यमेन बहुधात्मज्ञानमुपदिष्टम् । तस्य सर्वस्योपवर्णनमसाम्प्रतं भविष्यतीति द्वित्रा एव मन्त्रा अत्र समुपन्यस्यन्ते । तथा हि—

'न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ।।
—क० 1.2.18

भावार्थ स्त्वस्यमन्त्रस्यायं यत्—'भो नचिकेता यस्यात्मनो विषये प्रेते सत्यस्तिनास्तीत्यात्मिका विचिकित्सा त्वयोद्धाटिता, स तु सर्वविक्रियारहितोऽजो नित्यः शाश्वत उपचयापक्षयादिविकाररहित आकाशवच्छरीरे हन्यमानेऽपि मृतेऽपि न हन्यते न वा म्रियत इति । किन्तु तद्दर्शनं तु न सर्वेषां सुलभम् 'कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्' (क० 2.1.1) तथा च—

अणोरणीयान् महतो महीयानात्मास्यजन्तोर्निहितो गुहायाम् ।
तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः ।।
—क० 1.2.20

एवञ्च—

अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्यतन्मृत्युमुखात् प्रमुच्यते ।।
—क० 1.3.15

एतेषां मन्त्राणां विस्पष्टीकरणं यद्यपि प्रतिपाद्यविषयस्य पुष्टये नितान्तमावश्यकं प्रतीयते तथापि विस्तरभियादिग्दर्शनमात्रमेव किञ्चिद्विधीयते । तथा हि—यद्वस्तु शब्द, स्पर्श, रूप, रस, गन्ध, गुण विशिष्टं भवति, तत् तदिन्द्रियैः श्रोत्रत्वगक्षिरसनघ्राणाख्यैरवगन्तुं शक्यते । इदन्त्वशब्दास्पर्शादिस्वरूपत्वान्नेन्द्रियजन्यज्ञानगोचरं भवितुमर्हति । अत एव सर्वप्रमाणप्रवराभिरुपनिषद्भिरीश्वरनिः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्वासभूताभिरपौरुषेयत्वात् सकलदोषविनिर्मुक्ताभिरेव प्रतिपाद्यत्वाद् 'औपनिषदः पुरुषः' इत्यभिधीयते। 'निचाय्यतन्मृत्युमखात् प्रमुच्यते' तमेव पुरुषं विदित्वाऽमृतत्वं लभत इत्यर्थः। न चेयन्द्रियाग्राह्यत्वे सति कथं नाम तन्निचयनं स्यादिति चेन्न।

एष सर्वेषु भूतेषु गूढोत्मान प्रकाशते।
दृश्यते त्वग्रया बुद्धया सूक्ष्मया सूक्ष्मदर्शिभिः॥ —(क० 1.3.12)

मनसैवेदमाप्तव्यं नैह नानास्ति किञ्चन।
मृत्योः स मृत्यु गच्छति य इह नानेव पश्यति॥ —(क० 2.1.11)

इति सुसंस्कृतहृदया मनसा चावगन्तुं शक्यते। यत्तु—

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह।
'यन्मनसा न मनुते येनाहुर्मनो मतम्'॥

इत्यादिश्रुतयस्त्वसंस्कृतमनोबुद्धिविषया, अथवा निःशेषेण ज्ञातुमशक्यत्वाद् ब्रह्मणः, 'अणोरणीयान् महतो महीयानिति' सूक्ष्मातिसूक्ष्मत्वात् परममहत्वाच्च तस्यांशिकमेव ज्ञानं भवितुमर्हति न तु पूर्णतयेति वा।

अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः।
ईशानो भूतभव्यस्य स एवाद्य 'स उश्वः' एतद्वैतद्॥
—(क० 2.1.13)

अनया श्रुत्या जीवात्मनो भूतभविष्यतोर्विद्यमानत्वमीशित्वञ्च भूतभविष्यतोः प्रतिपाद्य तस्य नित्यत्वं 'स एवाद्य उ श्वः' इति वाक्यात् प्रतिपादितं भवति। अतो नचिकेतसो 'नास्तीति चैके' इति संदेहो निराकृतः। एवञ्च 'एतद्वैतद्' इति वचनाद् ब्रह्मजीवात्मनोरभेदोऽपि दर्शितो भवति।

यदेवेह तदमुत्र यदमुत्र तदन्विह।
मृत्योः सः मृत्यु माप्नोति य इह नानेव पश्यति॥
—(क० 2.1.10)

श्रुतिरियन्तु कण्ठरवेण सुस्फुटं ब्रह्मजीवात्मनोरैक्यं समुद्घोषयति।

यद्यपि श्रुतिभिर्जीवात्मनां ब्रह्माभिन्नत्वं प्रतिपाद्यते, मन्यन्ते च श्रद्धालवस्तथैव, तथापि तस्य स्वल्पोप्याभासो यावन्न जायते तावत् केवलं शाब्दिकपरोक्षज्ञानमात्रेण मिथ्याज्ञानस्यापायाभावान्न परमपुरुषार्थलाभो भवितुमर्हतीति सदया भगवतीश्रुतिर्मुहुर्मुहुर्ब्रह्मणः स्वरूपं बहुभिः प्रकारैर्वर्णयति समुद्बोधयति च यद् ब्राह्मणः स्वरूपं चक्षुरादिभिरिन्द्रियैर्नैव ग्रहीतुं शक्यते। तद्दर्शनन्तु

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

केवलया सुसंस्कृतबुद्धया सदाचारादिना च तथा। ब्रह्मनिष्ठगुरूपसदनादिनैव भवितुमर्हति, नान्यथा। तथा हि—

'परीक्ष्यलोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान् नास्त्यकृतः कृतेन। तस्माद्गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्'। —(मु० 1.2.13)

तत्र तत्त्वदर्शिनो गुरोः सकाशादुपदेशमवाप्य सदाचारादिसम्पन्नः सन् परब्रह्मणोऽनुकम्पया तत् स्वरूपमवगन्तुं शक्नोति। केवलेन श्रवणादिना तु तत् स्वरूपोलम्भोदुराप एव। उक्तञ्च—

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥
—(क० 2.2.23)

अन्यच्च—

नाविरतो दुश्चरितान्नाशान्तो नासमाहितः।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्॥
—(क० 1.2.24)

यथा दाहकत्वशक्तिविरहितो लौहो यत्सम्पर्काद्दाहकत्वं लभते सोऽग्निरित्यभिधीयते तथैव त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंघातरूपो जडोऽचेतनोऽपि देहश्चेतनवत् प्रतिभाति यत् सम्पर्कात् स चेतन एवात्मेत्यवगन्तव्यम्।

येन रूपं रसं गन्धं शब्दान् स्पर्शांश्च मैथुनान्।
एतेनैव विजानाति किमत्र परिशिष्यते। एतद्वैतत्।
स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति॥
—(क० 2.1.3-4)

इत्येवं बहवो मन्त्राः कठोपनिषदि ब्रह्मस्वरूपनिदर्शका उपलभ्यन्ते। तेषां सर्वेषां प्रदर्शनेनालम्। अस्मिन् विषयेऽन्यासामप्युपनिषदां कीदृग् विचारोऽस्तीत्यपि विचारणीय एव।

श्वेताश्वतरोपनिषदि ब्रह्मणः सर्वव्यापकत्वं सर्वरूपत्वादिकञ्च प्रतिपादितं यथा—

तिलेषु तैलं दधनीव सर्पिरापः स्रोतःस्वरणीषु चाग्निः।
एवमात्मात्मनि गृह्यतेऽसौ सत्येनैनं तपसा योऽनुपश्यति॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम् ।
आत्मविद्या तपोमूलं तद्ब्रह्मोपनिषत्परम् ।।(श्वे० 1.15-16)

सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी स भगवांस्तस्मात् सर्वगतः शिवः ।। (श्वे० 3.11)

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सभूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ।।

पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ।।

सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ।।(श्वे० 3.14-16)

अपाणिपादो जवनो ग्रहीता,पश्यत्यचक्षुः सशृणोत्यकर्णः ।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ।।
(श्वे० 3.19)

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद् ब्रह्म तदापस्तत्प्रजापतिः ।। (श्वे० 4.2)

क्रमशः एतैः कतिपयैरन्यैश्च मन्त्रैर्ब्रह्मणः सर्वव्यापकता सर्वरूपता सर्वविरुद्धधर्माश्रयताऽज्ञेयताऽनिर्वचनीयता च प्रतिपादिता श्वेताश्वतरोपनिषदि । अलमतिपल्लवितेन तत्र ।

केनोपनिषद्यस्ति प्रथमोऽयं मन्त्रः—

ॐ केनेषितं पतति प्रेषितं मनः ।
केन प्राणः प्रथमः प्रैति युक्तः ।
केनेषितां वाचमिमां वदन्ति ।
चक्षुः श्रोत्रं क उ देवो युनक्ति ।। (के० 1.1)

अत्र समुत्पद्यत इयं विचारणा यत् कथमयं प्रश्नः प्रादुर्भवति । मनः प्राणादयः स्वयं स्वस्वविषये प्रवर्तन्ताम् । 'केनेषित' मिति प्रश्नस्य काऽवश्यकतेति सन्देहे सञ्जाते, विचारानन्तरं समुदेत्येतदुत्तरं यद् 'यथा प्रवर्तकमन्तरा रथादीनामचेतनानां प्रवृत्तिर्न कुत्रापि दृष्टा, एवमेव मनआदीनामप्यचेतनानां प्रवृत्तिर्यत्किञ्चिच्चेतनाधीनैव भवितुमर्हति । स चेतनस्तु विजिज्ञास्यो भवत्येवेति प्रश्नस्याशयः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्र सदया श्रुतिश्चेतनस्वरूपप्रतिपादनपरा तत्स्वरूपं प्रतिपादयति—श्रोत्रस्य श्रोत्रं मनसो मनो यद्वचो हि वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृताभवन्ति । (के० 1.2) अनेन प्रकारेण तस्य चेतनस्य सत्तामात्रप्रतिपादनेन तद्विशेषावगतिर्यद्यपि न भवति, तथापि विशेषावगतिशून्यस्य विशेषावगतिशून्यताप्रतिपादनमेव तद्वास्तविकस्वरूपनिरूपणं भवतीति पुनस्तत्रैवाभिधत्ते ।

'न तत्र चक्षुर्गच्छति न वागच्छति नो मनो, न विद्मो न विजानीमो यथैतदनुशिष्यादन्यदेव तद्विदितादथो अविदितादधि । इति शुश्रुम पूर्वेषां ये नस्तदव्याचचक्षिरे ॥ (के० 1.3)

'यद्वाचानभ्युदितं येन वागभ्युद्यते, ददेव ब्रह्मत्वं विद्धि नैदं यदिदमुपासते' (के० 1.4)

यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्मत्वं विद्धि नैदं यदिदमुपासते ॥ (के० 1.5)

अनेन बहुविधेन विधिना ब्रह्मणोऽविज्ञेयत्वं विधायान्ततः स्पष्टमेवतस्या ज्ञेयता समुद्घोषिता 'यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रुपम् ।' (के० 2.1)

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातं त्वविजानताम् ॥ (के० 2.3)

छान्दोग्योपनिषदि तृतीयाध्यायस्य चतुर्दशखण्डे प्रतिपादितं यत्—'सर्वं खल्विदं ब्रह्मतज्जलानिति शान्त उपासीत । अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत' (छा० 3.14.1) । इत्यनेन मन्त्रेण सम्पूर्णस्यास्य ब्रह्माण्डनिकायस्य ब्रह्मत्वं स्पष्टमेवाभिहितम् । श्रीमच्छङ्कराचार्येणापि स्वकीयेऽत्रत्ये भाष्ये स्वीकृतमेवेतद् यद् यत् किमपीदन्तया गृह्यते तत्सर्वं ब्रह्मैव । तथा हि—

'एवं ब्रह्मात्मतया त्रिषु कालेष्वविशिष्टं तद्व्यतिरेकेणाग्रहणात् । अत स्तदेवेदं जगत्' (श्रीशाङ्करभाष्यम्) ।

आत्मनः स्वरूपनिरूपणेऽपि तत्रैवोक्तं यद्—

'एष म आत्मान्तर्हृदयेऽणीयान् व्रीहेर्वायवाद्वा सर्षपाद्वाश्यामाकाद्वा श्यामाकतण्डुलाद्वैषम आत्मान्तर्हृदये ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्यः' (छा० 3.14.3)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनेनाप्येतदेव निगद्यते यत् सूक्ष्मातिसूक्ष्ममपि वस्त्वात्मैव। तथा च ज्यायसोऽपि ज्यायो यद्वस्तु तदप्यात्मैव, नास्ति किमप्येवंविधंवस्तु यत्स्यादात्मनो व्यतिरिक्तमिति। अनेन ब्रह्मात्मैकत्वं सुस्फुटं प्रतिपादितं भवति।

एवञ्च तत्रैव छान्दोग्ये षष्ठाध्यायेऽस्त्यारुणिश्वेतकेतूपाख्यानं, तत्र पित्रारुणिनाऽध्ययनार्थं गुरुकुलं प्रेषितस्तत्पुत्रः श्वेतकेतुर्द्वादशवर्षं यावद्गुरौ वासं विधायाधीत्य च चतुरो वेदान् महामना अनूचानमानी स्तब्ध एव पितुः पार्श्वमुपागतः। तं तथाविधमवलोक्यारुणिना प्रोक्तं—'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति ?' अत्र श्रीशङ्कराचार्येण लिखितं स्वकीये भाष्ये 'स सर्वानपि वेदानधीत्य, सर्वं चान्यद्वेद्यमधिगम्याप्यकृतार्थ एव भवति यावदात्मतत्त्वं न जानाति' इत्याख्यायिकातोऽवगम्यते। मुक्तिकोपनिषद्यपि—'अधीत्य चतुरो वेदान् धर्मशास्त्राण्यनेकशः। ब्रह्मतत्त्वं न जानाति दर्वी पाकरसं यथा'। अस्तु—

'कथं स आदेशो भवति' इति श्वेतकेतुना पृष्ट आरुणिः प्रोक्तवान्—'यथा सौम्येकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छा० 6.1.4)। एवञ्च यथैकेनलोहमणिना ज्ञातेन सर्वं लोहमयं विज्ञायते, एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञायते एवमेवैकेनात्मतत्त्वेन विज्ञातेन सर्वं ज्ञातुं शक्यते। एतत्तु तदैव भवितुमर्हति यदा—मृत्पिण्डतद्विकारयोरिव ब्रह्म-ब्रह्माण्डयोस्तादात्म्यं स्याद्, नान्यथा।

आत्मतत्त्वस्यातिशयनिगूढत्वं श्रुतौ बहुत्र प्रतिपादितं यथा—

श्रवणायापि बहुभिर्नलभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः।
आश्चर्यो वक्ता कुशलोऽस्य लब्धाश्चर्यो ज्ञाता कुशलानुशिष्टः॥

न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः।
अनन्यप्रोक्ते गतिरत्रनास्त्यणीयान् ह्यतर्क्यमनुप्रमाणात्॥
(कठ० 1.2.7-8)

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति॥
(क० 1.2.12)

अणोरणीयान् महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम्।
तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आसीनो दूरं व्रजति शयानो याति सर्वतः ।
कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति ॥
अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥

नाविरतो दुश्चरितान्नाशान्तो ना समाहितः ।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥(क० 1.2.20-24)

महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परागतिः ॥

एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्धया सूक्ष्मया सूक्ष्मदर्शिभिः ॥ (क० 1.3.11-12)

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते ॥
((क० 1.3.15)

एवं बहुधात्मतत्त्वस्य दुरूहत्वं, सूक्ष्मत्वं दुर्ज्ञेयत्वञ्च प्रतिपाद्य तत्स्वरूपविषयेऽपि श्रुतिः किञ्चित् प्रकाशं प्रक्षिपति । ततः किञ्चिदुद्धृत्य प्रदर्श्यते । तथा हि—

येन रूपं रसं गन्धं शब्दान्स्पर्शांश्च मैथुनान् ।
एतेनैव विजानाति किमत्र परिशिष्यते । एतद्वैतद् ॥

स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥
य इमं मध्वदं वेद आत्मानं जीवमन्तिकात् ।
ईशानं भूतभव्यस्य न ततो विजुगुप्सते । एतद्वैतत् ॥ (क० 2.1-3-5)

यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति ।
तं देवाः सर्वेऽर्पितास्तदुनात्येति कश्चन । एतद्वैतद् ॥ (क० 2.1.9)

य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः ।
तदेव शुक्रं, तद्ब्रह्म, तदेवामृतमुच्यते ॥
तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन ॥ एतद्वैतद् ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अग्निर्यथैको भुवनं प्रविष्टो रूपं-रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥
(क० 2.2.8-9)

सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः ।
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥
एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा य करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥
नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥
(क० 2.2.11-13)

तमेवभान्तमनुभानिसर्वं तस्यभासा सर्वमिदं विभाति ॥ (क० 2.2.15)

इत्थं ब्रह्मस्वरूपं प्रतिपाद्य जीवात्मपरमात्मनोरभेदं दर्शयति श्रुतिः, तथा हि—

यदेवेह तदमुत्र यदमुत्र तदन्विह ।
मृत्योः स मृत्युमाप्नोति यइहनानेव पश्यति ॥
मनसैवेदमाप्तव्यं नेहनानाऽस्तिस्ति किञ्चन ।
मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ॥ (क० 3.1.10-11)

उपर्युक्तश्रुतिवच नैरात्मनो दुर्ज्ञेयता, तत्स्वरूपं, तस्य सर्वभूतान्तरत्वं तथा व्यापकत्वमेकत्वमात्मास्थत्वं जीवाऽभिन्नत्वञ्च सम्यक् प्रदर्शितम् ।

तमात्मस्थं येऽनुपश्यन्तिधीराः' इत्यनेन जीवाभिनत्वं प्रतिपादितम् ।

'मृत्योः स मृत्युमाप्नोति य इहनानेव पश्यतीतिवाक्येनैकत्वञ्च प्रदर्शितम् । एतादृशस्योक्त विघस्यात्मनो ज्ञानं श्रोत्रिय ब्रह्मनिष्ठ गुरोः सकाशाद् भगवतः प्रसादादेव भूरिभाग्योदयेन यस्य कस्यचिदेव भाग्यशालिनोभगवद्भक्तस्य वासुदेवकृपापात्रस्यैव समुपजायते नान्येषाम् । उक्तञ्च—

'यमेवैषवृणुते तेन लभ्यः' । (क०1.2.22)

छान्दोग्ये श्वेतकेतूपाख्येनेनाप्येतत् सुस्पष्टं भवात । द्वादशवर्षपर्यन्तं ब्रह्मचर्यव्रतपालनपूर्वकं वेदचतुष्टयस्याध्ययनेनापि ब्रह्मणो याथात्म्यज्ञानं श्वेतकेतोर्नैव सञ्जातम् । तदनन्तरं स्वपित्रा बहुभिः प्रकारैर्बोधितः सन्नेवात्मयाथात्म्यं परिज्ञाय स कृतकृत्यो बभूव । स उपदेशोऽपि प्रतिपाद्यनिबन्धविषयस्यानुकूल्यान्नोपेक्षणीय इति संक्षेपत उपस्थाप्यते ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीशाङ्करसिद्धान्तसंक्षेपः

अस्ति श्रीमच्छङ्कराचार्यानुयायिनामयं डिण्डिमघोषो यत्—

श्लोकार्द्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।
ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः॥

तत्र 'जीवो ब्रह्मैव नापरः' इत्यस्मिन् विषये प्रायः सर्वेषामद्वैतवादिनामाचार्याणामैकमत्यमेवास्ति। भवतु नाम तत्रांशांशिरूपभेदः सैव्यसेवकभावादिरूपो वा भेदः, किन्तु वस्तुगत्या 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि (छा० 6.3.2)' इति श्रुत्या जीवब्रह्मणोरभेद एवेति प्रतिपादितं भवति। उक्तञ्च श्रीमच्छङ्करावार्यैः स्वरचिते षट्पदीस्तोत्रे—

सत्यपि भेदापगमेनाथ तवाहं न मामकीनस्त्वम्।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः॥

अतः प्रतीयते यज्जीवावस्थायां जलधिवीचिवत् प्रातिभासिकभेदेऽपि वस्तुतोऽभेद एव। यथा केवलं नामरूपमात्रेण घटशरावादीनां मृत्तिकातो भेदः प्रतीयतेऽज्ञानां, विचारशीलानान्तु मृत्पिण्डतद्विकारयोश्च न मनागपि भेदः प्रतीयते। एवमेव ब्रह्मजीवयोर्न लेशतोऽपि भेद इति।

जगन्मिथ्यात्वविषयेऽन्यैराचार्यैः श्रीमद्रामानुजाचार्यादिभिर्नास्ति यद्यपि श्रीशङ्कराचार्यस्यैकमत्यं तथापि स्वरचितदशश्लोक्यां तेन स्पष्टमेवाभिहितं 'जगतुच्छमेतत् समस्तं तदन्यत्' इति। श्रीमद् मधुसूदनसरस्वतीभिरपि सिद्धान्तबिन्दौ "जगतुच्छमेतादि' त्यस्य व्याख्या 'तेन ज्ञानसुखात्मक आत्मा सत्यस्तद्भिन्नं सर्वं जगदसत्यमिति सिद्धमित्यकारि।"

वेदार्थसङ्ग्रहे स्वरचिते श्रीमद्रामानुजाचार्येण 'शाङ्करमतसंक्षेपो' निम्नाङ्कितरूपेण प्रदर्शितः।

निर्विशेषज्ञानमात्रमेव ब्रह्म, तच्च नित्यमुक्तस्वप्रकाशस्वभावमपि 'तत्त्वमस्यादिसामान्याधिकरणावगतजीवैक्यं, ब्रह्मैवाज्ञं बध्यते मुच्यते च। निर्विशेषचिन्मात्रातिरेकीशेशितव्याद्यनन्तविकल्पस्वरूपं कृत्स्नं जगन्मिथ्या। कश्चिद्बद्धः कश्चिन्मुक्त इतीयं व्यवस्थन्न विद्यते, इतः पूर्वं केचन मुक्ता इत्ययमर्थो मिथ्या। एकमेव शरीरं जीववत् निर्जीवानीतराणि शरीराणि तच्छरीरं किमिति न व्यवस्थितम्। आचार्यो ज्ञानोपदेष्टा मिथ्या, शास्त्रप्रमाता च मिथ्या, शास्त्रञ्च मिथ्या, शास्त्रजन्यं ज्ञानञ्च मिथ्या, एतत् सर्वं मिथ्याभूतेनैव शास्त्रेणावगम्यत इति वर्णयन्ति।'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीमद्रामानुजाचार्योपवर्णितं शाङ्करमतन्तूपरि प्रदर्शितमेव स्वयं श्रीमच्छङ्कराचार्येणापि दशश्लोक्यां सप्तमश्लोके सर्वस्यापि प्रपञ्चस्य मिथ्यात्वं प्रतिपादितम्। तद्यथा—

न शास्ता न शास्त्रं न शिष्यो न शिक्षा,
न च त्वं न चाहं न चाऽयं प्रपञ्चः।
स्वरूपावबोधो विकल्पासहिष्णु,
स्तदेकोवशिष्टः शिवः केवलोऽहम्॥

सिद्धान्तविन्दावपि श्रीमधुसूदनस्वामिभिरपि 'न शास्तेति श्लोकस्यैवंविधोऽर्थः कृतः, यद्—शास्ता = उपदेश कर्ता गुरुः। शास्त्रम् = उपदेशकरणम्। शिष्यः = उपदेशकर्म। शिक्षा = उपदेशक्रिया। त्वं = श्रोता। अहम् = वक्ता। अयम् = वक्ता। अयम् = सर्वप्रमाणसन्निधापिता प्रपञ्चो देहेन्द्रियादिरनर्थः परमार्थतो नास्तींत्यर्थः।

एतेषां मते 'एकमेवाद्वितीयम्' (छा० 6.2.1.), 'नेह नानास्ति किञ्चन' (वृ० 4.4.10), 'मृत्योः स मृत्युमाप्नोति यो नानेन पश्यति' (क० 2.1.10) इत्यादि श्रुति बलाद् ब्रह्मातिरिक्तं समस्तं जगन्मिथ्येति समर्थितम्। अत एवात्मनि भेदत्रयशून्यत्वमपि सङ्गच्छते, अन्यथा सजातीय विजातीयस्वगतभेदानां निवारणमसम्भवि स्यात्। श्रुतिश्च व्याकुप्येत्। तथा हि—

सजातीयन्न मे किञ्चिद् विजातीयं न मे भवेत्
स्वगतञ्च न मेकिञ्चिन्न मे भेदत्रयं भवेत्॥

न चैकं तदन्यद् द्वितीयं कुतः स्या-
न्न वा केवलत्वं न चाकेवलत्वम्।
न शून्यं न चाशून्यमद्वैतकत्वात्,
कथं सर्ववेदान्तसिद्धं ब्रवीमि॥ (दशश्लोकी। 10)

अतो ब्रह्मातिरिक्तं सर्वं जगन्मिथ्येति तेषां सिद्धान्तः। मिथ्यात्वञ्चप्रतीयमानत्वपूर्वकयथावस्थितवस्तुज्ञाननिवर्त्यत्वमिति। यथा भ्रमाधिष्ठानभूतरज्जुतत्त्वज्ञाने प्रतीयमानसर्पादेर्ज्ञाननिवृत्तिः।

प्रस्तुतनिबन्धस्य मुख्यप्रतिपाद्यत्वाभावेऽपि सर्ववेदान्तसिद्धान्तसमन्वयावसरे तत्तदाचार्याणां सिद्धान्तज्ञानस्यावश्यकत्वात् संक्षेपतोऽत्र दिग्दर्शनमात्रमकारि समन्वयप्रकरणेऽपेक्षितांशस्य प्रकाशनं भविष्यतीति।

इतः परं यथा श्रींशाङ्करसिद्धान्तः संक्षिप्तरूपेणोक्तस्तथैव श्रीमद्रामानुजाचार्याणामपि सिद्धान्तविषये किमपि वक्तव्यमेवेति तत्रापि प्रवर्त्यते। तद्यथा—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीमद्रामानुजीयः सिद्धान्तसारः

श्रीमद्रामानुजाचार्याणां मते सूक्ष्मचिदचिद्विशिष्ट ईश्वरः पारमार्थिकं वस्त्विति। प्रलये सृष्टिकालेऽपि चित्पदवाच्यजीवानाम् अचित्पदवाच्यजडानाञ्च सूक्ष्मरूपेण पृथक् सत्ता वर्तते। अचिद्विशिष्टजीवशरीकं ब्रह्मेति रीत्या ब्रह्मणोऽद्वितीयतेत्यपि तेषामाशयः प्रमाणत्वेन च 'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा नवेद यस्यात्माशरीरम्' (3.7.22) इत्यादिश्रुतीरुपन्यस्यन्ति। जीवात्मा हि ब्रह्मणः शरीरत्वाद् ब्रह्मात्मक इति भावः।

एतेषां मते चिच्छब्दवाच्या जीवात्मानः परमात्मनो भिन्ना नित्याश्च 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्तयश्नन्नयोऽभिचाकशीति' (मु० 3.1.1, श्वे० 4 : 6) इत्यादिश्रुतयोऽत्र प्रमाणम्। जीवनित्यत्वे च—

न जायते म्रियते वा विपश्चिन्नायं भुत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥
(क० 2.18)

इति श्रुतिः प्रमाणम्। अन्यथा नित्यत्वाभावे कृतप्रणाशाकृताभ्यागमप्रसङ्गः। एते जीवानामणुपरिमाणत्वं मन्यन्ते। तथा हि—

बालाग्रशतभागस्य शतधाकल्पितस्य च।
भागो जीवः स विज्ञेयः सचानन्त्याय कल्पते। (श्वे० 5.9)
आराग्रमात्रो ह्यवरोऽपि दृष्टः (श्वे० 5 8)
एषोऽणुरात्मा चेतसा वेदितव्यः (मु० 3.1.9)

अचिच्छब्दवाच्यं दृश्यं जडात्मकं जगत्। तज्जगदपि त्रिविधं भवति। भोग्यभोगोपकरणभोगायतनभेदात्।

तस्य सचराचरस्य सचेतनाचेतनस्य सकलप्रपञ्चस्य कर्तोपादानञ्चेश्वरः। स एव पुरुषोत्तमो वासुदेवादिपदवाच्यः। उक्तञ्च—

वासुदेवः परं ब्रह्म कल्याणगुणसंयुतः।
भुवनानामुपादानं कर्ता जीवनियामकः॥

स एव करुणासिन्धुर्भगवान् भक्तवत्सलः।
उपासकानुरोधेन भजते मूर्तिपञ्चकम्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तदर्चाविभवव्यूहसूक्ष्मान्तर्यामिसंज्ञकम् ।
यदाश्रित्यैव चिद्वर्गस्तत्तज्ज्ञेयं प्रपद्यते ।।

इत्यादि पाञ्चरात्ररहस्ये । अन्यत्रापि—

सर्वत्रासौ समस्तञ्च वसत्यत्रैव वै यतः ।
तस्मात् स वासुदेवेति विद्वद्भिः परिपठ्यते ।।

स एव वासुदेवादिपदवाच्यः पुरुषोत्तमोऽनवधिकातिशयकल्याणगुणगणाढ्यो भगवान् भक्तवत्सलस्तापत्रयातुरैर्मुमुक्षुभिः शमदमादिसम्पन्नैर्निरन्तरं ध्येयो ज्ञेयश्च । 'आत्मा वाऽरेद्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च' (बृ० 2.4.5]

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ।।

(मु० 2.2.8)

अस्यात्मनो दर्शनस्य प्रधानसाधनं भक्तिरेवास्त्येतेषां मतेन । जगत् सत्यत्व-वादिनश्चेमे कर्मविशिष्टस्य ज्ञानस्य भक्तिसाधनं मन्यन्ते, न केवलेन कर्मणा न वा केवलेन ज्ञानेन लब्धुं शक्यते भक्तिर्मुक्तिर्वा श्रुतौ केवलस्य कर्मणो ज्ञानस्य वा केवलस्य निन्दितत्वाच्च । तथा हि—

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रताः ।। (ई० 9)

विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।। (ई० 11)

तदुक्त यामुनाचार्येण उभयपरिकर्मितस्वान्तस्यैकान्तिकात्यन्तिकभक्तियोगो लभ्य इति । ज्ञानकर्मयोगसंस्कृतान्तःकरणस्येत्यर्थः ।

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यस्तस्यैव आत्मा विवृणुते तनूं स्वाम् ।।

(क० 1.2.23)

वरणीयास्त्वनन्या भगवद्भक्तिपरायणा एव भवन्ति, नान्ये । तथा हि—

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।।

(श्रीमद्भ० गीता 10.10)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ।।
(श्रीमद्भ० गीता० 8.22)

अतः स्वस्मिन् वरणीयत्वसम्पादनार्थं भक्तिरेवाश्रयणीया । उक्तञ्च भगवता—

श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः (गी० 12.20)

सारांशस्त्वयं यद् विहितकर्मणां श्रुतिस्मृतिप्रतिपादितानामनुष्ठानेन निर्धूतसकलान्तःकरणकल्मषस्य स्फटिकवत्स्वच्छहृदये ब्रह्मणो निरवधिकातिशयकल्याणगुणगणाकरस्यानन्दमूर्तेः प्रकाशः समुपजायते । ततश्च तस्मिन् भगवति वासुदेवेऽच्युतेऽच्युता भक्तिः क्षणे क्षणे प्रवर्धमाना सती मुक्तेरपि गरीयसी प्रादुर्भवति, यया च भक्त्या प्रणयरशनयाधृताङ्घ्रिपद्म इव परवशो भगवान् प्रसन्नः सन् निरवधिकानन्दरूपं पुनरावृत्तिरहितं स्वपदं प्रयच्छति भवति च कृतकृत्य एतादृशो भक्तिशिरोमणिरित्यमतिविस्तरेण ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शुद्धाद्वैतवेदान्तविमर्शः

ब्रह्मविषयिणी साधारणदृष्टिः

यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिविशन्ति तद्विजिज्ञासस्व, तद्ब्रह्म (तै० 3.1.1) इति श्रुत्या, एवं च 'जन्माद्यस्ययत' (ब्र० 1,1.2) इति ब्रह्म सूत्रेण, अन्यैश्च 'सर्वं खल्विदं ब्रह्म' (छा० 3.14,1), 'स हैतावानास' (बृ० 1 4.3), 'स आत्मानं स्वयमकुरुत' (तै० 2.7.1), 'स वै सर्वमिदं जगत्' (ना० 23.1), 'इदं सर्वं यदयमात्मा' बृ० 2.4.6), 'पुरुष एवेदं सर्वम्' (पुरुषसूक्त) इत्यादिभिर्बहुभिः श्रुतिवचनैरेतत् सुस्पष्टं प्रतीयते यत् सर्वोप्ययं प्रपञ्चो दृष्ट आनुश्रविकश्च ब्रह्मकारणकत्वाद् ब्रह्मात्मक एव कार्योपादानकारणयोरभेदात् ।

न च निरीहस्य-निष्क्रियस्य नित्यकूटस्थस्य ब्रह्मणो नानाविधप्रपञ्चरूपेण विपरिणामो निष्प्रयोजनत्वान्नसम्भवतीति चेन्नैवम् ।

रमणार्थमिदं सर्वं ब्रह्मैव स्वेच्छयाभवत् ।
यथा सर्पः स्वेच्छयाहि कुण्डलाकारतां गतः ॥
(शु० मा० श्लो० 12)

'एकाकी न रमते स द्वितीयमैच्छत्' (बृ० 1.4.3). 'तदात्मानं स्वयमकुरुत' (तै० 2.7.1) इत्यादिवाक्यानि, सति द्वितीये सत्सु वानेकेषु रमणस्य निर्बाधसिद्धत्वाद् व्यर्थीभूय विस्पष्टं ज्ञापयन्ति यत् सृष्टेः प्राक् 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमिति' (छा० 6.2.1), 'आत्मा वा इदमेक एवाग्र आसीत्' । (ऐ० 2.1,1.1) अतः सृष्टेः प्राक् ब्रह्मातिरिक्तस्य न कस्यापि वस्तुनः सत्ता प्रमाणपदवीमारोहति ।

न चैकस्माद्ब्रह्मणः सकाशात् विविधविचित्रानेकरूपायाः सृष्टेः 'नाविद्यमानानि जायन्ते' इति न्यायात् कथमुद्भव इति चेन्न शुद्धाद्वैतवेदान्तमते ब्रह्मणि सर्वविरुद्धधर्माश्रयत्वं साकारत्वं, सर्वज्ञत्वं, सर्वशक्तिमत्त्वं, सर्वकर्तृत्वञ्चाङ्गीक्रियते यथा प्रतिपादितं शुद्धाद्वैतमार्तण्डे—

साकारं सर्वशक्त्येकं सर्वज्ञं सर्वकर्तृ च ।
सच्चिदानन्दरूपं हि ब्रह्म तस्मादिदं जगत् ॥ (शु०मा० 3)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

साकारत्वे प्रमाणम्—

सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ।।
(भ० गी० 13.13)

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं सर्वतस्स्पृत्वाऽत्यतिष्ठद् दशाङ्गुलम् ।। (पुरुषसूक्तम्)
'आनन्दमात्रकरपादमुखोदरादि' (नारदपञ्चरात्रम्)
अथवा परमात्मानं परमानन्दविग्रहम्' (या० स्मृतिः)

इत्यादिभिः प्रमाणैर्ब्रह्मणः साकारत्वं स्पष्टमेव प्रतिपादितं भवति ।

ननु 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः सशृणोत्यकर्णः, अस्थूलमनण्व-ह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्क-मश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किंचन न तदश्नाति कश्चन (बृ० 3.8.8) इत्यादिषु श्रुतिषु पाणिपादादिसर्वेन्द्रियाणां निषेधात्, ह्रस्वदीर्घादीनां चाकारव्याप्यानां निषेधात् कथं ब्रह्मणः साकारत्वमिति चेन्न प्राकृतपाणिपादादिनिषेधपरत्वात् तत्तद्वचनानाम्, अन्यथा 'विश्वतश्चक्षु-रुतविश्वतो मुखो विश्वतो वाहुरुत विश्वतस्मात्' इत्यादीनां श्रुतीनां का गतिः स्यात् ।

सर्वशक्तिमत्त्वन्तु सर्वसिद्धान्ताभिमतमेव । 'परास्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च (श्वे० 6।8) इति क्रियाश्रयत्वेन सर्वकर्तृत्वमपि सिद्धमेव । ईश्वराद्भिन्नस्यानीश्वरस्य, अर्थाज्जगत्कर्मकनिर्माणसामर्थ्यशून्यस्य तन्निर्माणं नैव सङ्घटते, प्रधानस्याचेतनत्वाद्, जीवस्य स्वशरीररचनामप्यजानतः सर्वज्ञत्वाभावाद् वेति । अतः पारिशेष्याद् ब्रह्मणि जगत्कर्तृत्वमभ्युपगन्तव्यमेव । उक्तमपि श्रीपुष्पदन्ताचार्येण महिम्नस्तवे 'अनीशो वा कुर्याद्भुवनजनने कः परिकरम्' । 'स देव सौम्येदमग्र आसीदेकमेवाद्वितीयम् (छा० 6.2.1) इत्ये-कत्वमद्वितीयञ्चापि श्रुतिसिद्धमेव । अनेन प्रकारेणो पर्युक्तविवेचनेन शुद्धाद्वैत-मार्तण्डप्रतिपादितं ब्रह्मलक्षणं 'साकारं सर्वशक्तीत्यादि' सर्वथा युक्तियुक्तं प्रामाणिकञ्चेति नास्त्यत्र सन्देहलेशोपि । अन्येषामाचार्याणां मते साकारत्वे कर्तृत्वे च भवन्तु नाम विप्रतिपत्तयः तासां युक्तायुक्तविचारणा, ग्राह्याग्राह्य-त्वादिकं च यथास्थानं तुलनात्मकसमीक्षणावसरेऽग्रे विधास्यते । साम्प्रतमस्त्येतद्वि-चारणीयं यत् सच्चिदानन्दरूपाद्ब्रह्मः सकाशाद्यदि समस्तोऽयं प्रपञ्चः प्रादुर्भूतस्तदा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कारणगुणपूर्वकत्वात् कार्यस्य प्रपञ्चेऽपि सच्चिदानन्दानुभूतिरावश्यकी, किन्तु भवति तु न तथा जड़े चैतन्यानन्दयोर्जीवे शाश्वतिकानन्दस्य चानुपलम्भादिति चेन्न, ब्रह्मणो रमणार्थमुच्चनीचभावाभ्यां स्वीयबहुभवनेच्छया, बहुत्वं वैविध्यञ्च सम्पादनार्थं जडे चिदानन्दयोर्जीवे आनन्दांशस्य तिरोधानात्। उक्तञ्च जड-जीवान्तःस्थितानां, यथाक्रमश उद्गमः, अग्नेर्यथाविस्फुलिङ्गास्तथा जीवोद्गमः स्फुटः' (शु० मा० 9) यथा सुदीप्तात् पावकाद् विस्फुलिङ्गाव्युच्चरन्ति, एवमेव तस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे जीवाः कुपूयचरणा रमणीयचरणा इति। यथा सर्पः स्वेच्छयैव कदाचित् कुण्डलाकारतामुपैति कदाचित् सरलत्वं कुटिलत्वं च, एवमेव ब्रह्मापि स्वेच्छयैव रमणार्थं कदाचित् प्रपञ्चाकारतां गृह्णाति कदाचित् सर्वं प्रपञ्चं स्वात्मनि प्रविलाप्यैकमेवावशिष्यते तदा तु 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्' (6.2.1)।

अयमभिप्रायः इदं परिदृश्यमानं विविधविचित्ररचनाविशिष्टं सूक्ष्मदृष्ट्या विचारणेनावलोकनेन चाश्चर्यातिशयसम्पादकं यज्जगद्दृश्यते, दृश्यते च यत्र जगति सर्वत्रैव नियमाक्रान्तत्वं नियमानुवर्तित्वञ्च तदेतत्सर्वं जगत्सूर्यचन्द्रादि-नक्षत्रमण्डलसहितोऽनन्तब्रह्माण्डनिकायश्च सृष्टेः (उत्पत्तेः) प्राक् सदेवासीत्। तथा हि 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ० 1.1) इति सच्छब्दवाच्य आत्मैवासीत्। यद्यपि साम्प्रतमप्येतत् सर्वम् आत्मैवास्ति न ततोऽन्यत् किञ्चिदपि विद्यते तथापि सृष्टेः प्राग् व्याकृतनामरूपभेदमिदं जगदासीत्। इदानीं तु व्याकृतनामरूपभेदत्वाद् अनेकशब्दप्रत्ययगोचरमप्यात्मशब्दप्रत्ययगोचरमिति विशेषः।

न च नित्यशुद्धबुद्धमुक्तस्वभावस्य कूटस्थनित्यस्यापाणिपादस्य निरीहस्य निष्क्रियस्याशनायादिसर्वसंसारधर्मवर्जितस्याप्तकामस्य परब्रह्मणो जगत्कर्तृत्वादिकं नोपपद्यते। उपादानादिसाधनसामग्रीणामप्यभावाच्च। इत्येतदपि नाशङ्कनीयं यतः सलिलाद्यथा फेनबुद्बुदादीनामुत्पत्तौ न साधनान्तराण्यपेक्ष्यन्ते, न वा कश्चिन्निपुण ऐन्द्रजालिकः साधनसहायः सन् स्वमात्मानमनेकेषु देवतिर्यङ्मनुष्याद्याकारेषु युगपद् आविर्भावयत्येवमेव तत् परब्रह्मापि साधननिरपेक्षमेव सर्वज्ञत्व-सर्वशक्तिमत्वादिगुणयोगात् सर्वं स्वयमेव भवति सर्वभवनसमर्थत्वात् 'यथोर्णनाभिः सृजते गृह्णते च' (मु० 1.1.7)। 'अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्' इति न्यायात् कर्तुमकर्तुमन्यथाकर्तुं समर्थस्य सर्वशक्तिसम्पन्नस्य विषये कुतर्कस्य कश्चिदवसर एव नास्ति। यदि तत्सृष्टसृष्टेषु कामधेनुकल्पवृक्ष-चिन्तामण्यादिष्वेतादृशी शक्तिरस्ति यत् तेभ्यः प्रादुर्भूताबोद्धारः प्रतिपक्षिविरोद्धुं समर्थाः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवन्ति, अतिथिरूपेण समुपस्थितानां जनानामातिथ्यसम्पादनार्थमतिथ्यसत्कारानुरूपाणि विविधान्यलौकिकवस्तुजातानि जायन्ते, परिचर्यादिकर्मसु कुशलाः परिचारकादयश्च समुद्भवन्ति तदा तत्सृष्टस्रष्टुर्विषये परमात्मनि किमुतवक्तव्यमस्ति। को नामास्त्यनवगतो विद्वान् श्रीमद्भागवतपुराणप्रतिपादितया तया कथया यत्र श्रीमदनन्तब्रह्माण्डनायकस्य भगवतः श्रीकृष्णस्य प्रभावातिशयमैश्वर्यञ्च दिदृक्षुणा परमेष्ठिना गोवत्सानां गोपालबालकानाञ्च चौर्यमाचरितम्। किन्तु भगवता श्रीकृष्णेन स्वयमात्मा तत्तद्गोपालबालगोवत्सादिरूपेण तथाविर्भावितो येन स्वयं ब्रह्मापि नैवैतन्निश्चेतुं क्षमः सञ्जातो यन्मयाहृतानि वत्सादीनि सत्यान्युत व्रजभूमौ स्थितानीति। एतेनैतद्विज्ञायते यद् अनन्तैश्वर्यसम्पन्नः सर्वशक्तिसमन्वितः सर्वज्ञः स परमेश्वरः स्वयं निष्क्रियः सन्नपि स्वेच्छयैव सर्वमवाङ्मनसगोचरं परमाश्चर्यमयमनन्तकोटिब्रह्माण्डं क्षणेनैव रचयितुं शक्नोति; तत्र नास्ति कश्चित् सन्देहलेशोऽपि। श्रीपुष्पदन्ताचार्येण महिम्नस्तवे कुतर्काणामनवसरदुःस्थत्वं स्पष्टमेव प्रतिपादितम्—

किमीहः किं कायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः॥

(म० स्तो० 5)

उक्तञ्च श्रीस्वामिना मधुसूदनसरस्वतीतिनाम्ना 'विचित्रनानाशक्तिमायावशेन सर्वनिर्मातरि सर्वतर्कागोचरे त्वपि नास्ति कुतर्कावसर इति'।

सारांशस्त्वयं यत् 'सर्वं खल्विदं ब्रह्म' (छा० 3.14.1), 'इदं सर्वं यदयमात्मा' (बृ० 2.4.6), 'ऐतदात्म्यमिदं सर्वम्' (छा० 6.8.7), तदा आत्मानं स्वयमकुरुत' (तै० 2.7.1), 'स हैतावानास' (बृ० 1.4.3) सवै सर्वमिदं जगत्' (ना० 23.1), 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ० 1.1.1), 'स सर्वं भवति', 'पुरुष एवेदं सर्वम् (ऋ० 10.90.2) इत्यादिश्रुतिभिः सर्वोऽप्ययं प्रपञ्चो दृश्यमानः श्रूयमाणश्च ब्रह्मात्मक एव, अविकृतपरिणामवादस्वीकारात्। न च सर्वस्य ब्रह्मत्वे कथं जड़जीवान्तर्यामिरूपेण त्रैविध्यप्रतीतिर्वैविध्यप्रतीतिर्वा जायते इति चेन्न। रमणेच्छया 'एकोऽहं बहुस्याम' इति बहुत्वसम्पादनार्थं जड़े चिदानन्दयोर्जीव आनन्दांशस्य च तिरोभावात्। 'आविर्भावतिरोभावौ शक्ती वै मुरवैरिणः'। अतो हरीच्छयाऽऽनन्दांशस्य चिदंशस्य च तिरोभावे सति त्रैविध्यं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वैविध्यञ्च जायते चिदानन्दांशयोराविर्भावे जाते तु सर्वस्य ब्रह्मरूपता स्फुटाभवति एवं सति वैविध्येऽपि न वा द्वैतापत्तिर्न वा ब्रह्मणि विकारित्वापत्तिर्भवति । यथा 'सुवर्णस्य च ये खण्डाः कटका मुद्रिकादयस्ते सर्वे सुवर्णरूपा एव, न तु ततो भिन्नाः । एवमेव सर्वोऽपि प्रपञ्चः कटकमुद्रिकास्थानीयः सुवर्णस्थानीयात् ब्रह्मणोऽभिन्न एवेति न द्वैतापतिः । न वा यथा कटकत्वे मुद्रिकात्वे च सुवर्णस्य विकारित्वं सञ्जायते, एवमेव ब्रह्मणोऽपि निर्विकारित्वमक्षुण्णमेव । उक्तञ्च श्रीमद्भागवते 'यथा सुवर्णं सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य, तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत् (भा० 11.28.19), 'यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु, तथा वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकैर्जनैः' (श्रीमद्भा० 12.4. 31)

श्रीमद्भगवद्गीतायामपि भगवता श्रीकृष्णेन बहुभिः प्रकारैरात्मतत्त्वनिरूपणं कृतम् । शोकमोहाभिभूतमर्जुनमुद्दिश्य सर्वेषां प्राणिनां परमकल्याणाय निःश्रेयससिद्धये 'अशोच्यानित्यारभ्य यदात्मतत्त्वप्रतिपादनं कृतं, तेन प्रत्यगभिन्नाद्वितीयब्रह्मावगतिविषये परमप्रकाशः समुपजायते यथा—

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥
—(गी० 2.12)

अनेन आत्मनस्त्रैकालिकी सत्ता प्रतिपादिता भवति येनात्मनो नित्यत्वं सिध्यति, अविक्रियत्वञ्चापि—

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥
—(गी० 2.13)

इति पदेन व्याख्यातम् तथाहि वर्तमाने वपुषि वर्तमानो देही देहविक्रियाभिः कौमारयौवनजरावस्थाभिरात्मस्वरूपेण सर्वथाऽविक्रियः सन्नेवतिष्ठति । एवमेव देहान्तरप्राप्तावपि न तत्र काचित् विक्रिया जायते निरवयवत्वादात्मनः । एतदेव विस्पष्टयन्—

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥
—(गी० 2.20)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदेवात्मनो निरवयवत्वात् सर्वविक्रियाराहित्यं दृढ़ीकुर्वन् भगवान् वासुदेवः प्रसङ्गमुत्थाप्य पौनःपुन्येन बहुभिरुदाहरणैः—

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥
—(गी० 2.22)

इत्यादिभिरर्जुनं प्रत्यबोधयत् ।

यावन्तोऽपि षड्विकारा 'अस्ति' जायते, वर्धते, विपरिणमते, अपक्षीयते, विनश्यतीति रूपाः' सन्ति ते सर्वे एवावयविनमेव विकुर्वन्ति न तु निरवयवं विकृतं विधातुं शक्नुवन्ति । अत एव—

'नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥
—(गीता 2.23-24)

इत्यादिभगवदुक्तवचोभिरात्मनः सर्वविक्रियाराहित्यं सुस्पष्टं प्रतिपादितं भवति । सत्यपि सर्वविक्रियाराहित्ये निर्विकारमपि ब्रह्मसर्वशक्तिसम्पन्नत्वाद् अनन्तकोटिब्रह्माण्डं क्षणेनानायासेन च स्वेच्छाशक्त्या निर्मातुं क्षमम् । तस्य सर्वशक्तिसम्पन्नतायां सन्ति सहस्रशः श्रुतयः स्मृतयश्च प्रमाणम् यथा—न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते, परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' (श्वे० 6.8), 'स यथार्द्रैन्धनाग्नेरभ्याहितात् पृथग् धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानि' (बृ० 2.4.10) इत्यादिश्रुतेर्महतो भूतस्य ब्रह्मणो निरतिशयसर्वज्ञत्वं सर्वशक्तिमत्त्वं च प्रामाणिकमेव 'अनीशो वा कुर्याद्भुवनजनने कः परिकर (म्):' (म०स्तो० 6) यथा श्वासप्रच्छ्वासक्रिययोर्न कोऽप्यायासोऽनुभूयत एवमेव परब्रह्मणोऽपि ऋग्वेदादिरचनायां विश्वसर्गस्थितिलयादिषु च न कोऽप्यायासो जायते न तु तत्र काचित् क्रियापि क्रियते केवलमिच्छामात्रेणैवेच्छासमकालमेव समस्तप्रपञ्चस्यानन्तकोटिब्रह्माण्डनिकायस्य चोद्भवो भवति । अन्यथा अर्जुनाय विश्वरूपप्रदर्शनावसरे तादृशस्य भयङ्करस्य घोररूपस्य यस्य दर्शनेन महासत्त्वोऽर्जुनोऽपि भीतभीतः सञ्जातः-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे' निर्माणं साधक-सामग्रीसहकारेण जातं किम् ?

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥
तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥
—(गी० 11.12.13)

तस्मिन् विश्वरूपे कृत्स्नं जगद् एकस्थम् एककोणे निवेशितमिवासीद् एतादृशविचित्रविश्वरूपस्य निर्माणं क्षणेन यस्येच्छया सञ्जातं तद् सर्वज्ञं सर्वशक्ति ब्रह्म निष्क्रियं सदपि करचरणादिचालनक्रियाशून्यमपि सर्वकर्तृ इत्यस्मिन् विषये नास्ति कश्चिद् विचिकित्सावसरः । एवमेव स्वमात्रे यशोदायै अपि विश्वरूपं प्रदर्शितं भगवता श्रीकृष्णेन । तत्रत्या इमे भागवतश्लोका उद्ध्रियन्ते—

कस्मान्मृदमदान्तात्मन् भवान् भक्षितवान् रहः ।
वदन्ति तावकाह्येते कुमारास्तेऽग्रजोऽप्ययम् ॥

नाहं भक्षितवानम्ब, सर्वे मिथ्याभिशंसिनः ।
यदि सत्यगिरस्तर्हि, समक्षं पश्य मे मुखम् ॥

यद्येवं तर्हि व्यादेहात्युक्तः स भगवान् हरिः ।
व्यादत्ताव्याहतैश्वर्यः, क्रीडामनुजबालकः ॥

सा तत्र ददृशे विश्वं, जगत् स्थास्नु च खं दिशः ।
साद्रिद्वीपाब्धिभूगोलं, सवाय्वग्नीन्दुतारकम् ॥

ज्योतिश्चक्रं जलं तेजो, नभस्वान् वियदेव च ।
वैकारिकाणीन्द्रियाणि मनो मात्रा गुणास्त्रयः ॥

एतद्विचित्रं सहजीवकाल, स्वभावकर्माशयलिङ्गभेदम् ।
सूनोस्तनौवीक्ष्य विदारितास्ये, व्रजं सहात्मानमवापशंकाम् ॥

किं स्वप्नमेतदुत देवमाया, किं वा मदीयो बत बुद्धिमोहः ।
अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः ॥

अथो यथावन्न वितर्कगोचरं चेतो मनः कर्मवचोभिरञ्जसा ।
यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणतास्मि तत् पदम् ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अहं ममासौ पतिरेष मे सुतो, व्रजेश्वरस्याखिलवित्तपा सती।
गोप्यश्च गोपाः सह गोधनाश्च मे, यन्माययेत्थं कुमतिः स मे गतिः ॥

इत्थं विदिततत्त्वायां, गोपिकायां स ईश्वरः।
वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः ॥
—(भा० 10.8.34-43)

एतन्मूलकं पद्यमिदं सुप्रसिद्धमस्ति—

कृष्णेनाम्बगतेन रन्तुमधुना मृद्भक्षिता स्वेच्छया,
सत्यं कृष्ण, क एव माह, मुसली, मिथ्याम्ब पश्याननम्।

व्यादेहीति विकासितेऽथवदने माता समस्तं जगद्,
दृष्ट्या यस्य जगाम विस्मयवशं पायात् स वः केशवः।

ब्रह्मणो मोहभङ्गावसरेऽपि भगवता कृष्णेन तथैवाचरितम्।

क्वाप्यदृष्ट्वान्तर्विपिने वत्सान् पालांश्च विश्ववित्।
सर्वं विधिकृतं कृष्णः सहसाऽवजगामह ॥

ततः कृष्णो मुदं कर्तुं तन्मातॄणां च कस्य च।
उभयायितमात्मानं चक्रे विश्वकृदीश्वरः ॥
(भा० 10.13.17-18)

यावद् वत्सपवत्सकाल्पकवपुर्यावत् कराङ्घ्र्यादिकं, यावद् यष्टि-विषाण वेणुदलशि' यावद्विभूषाम्बरम्। यावच्छीलगुणाभिधाकृतिवयो यावद् विहारादिकं, सर्वंविष्णुमयं गिरोऽगवदजः सर्वस्वरूपो बभौ। एतेन परब्रह्मणः सर्व-शक्तिमत्त्वं सर्वकर्तृत्वञ्च विस्पष्टमेव प्रतिपादितं भवति। अन्यथा सर्वज्ञात्वाभावे' 'कृतिरियं विरिञ्चे' रिति अथं ज्ञातं स्यात् कथं वा सर्वशक्तिमत्त्वाभावे सर्व-कर्तृत्वाभावे च तावत् संख्याकवत्सवत्सपानाञ्च प्रादुर्भावो भवितुमर्हति। अतो भगवतः सर्वज्ञत्वं सर्वशक्तिमत्तवं सर्वकर्तृत्वं साकारादिकत्वं सर्वाश्चर्यमयत्वञ्चेति सर्वंसुसम्पन्नं भवति। 'नृसिंहावतारोऽपि कीदृङ् महाश्चर्यपूर्णोऽस्तीति तु नास्ति तिरोहितं विपश्चिताम्। जडात् स्तम्भात् सृष्टिविलक्षणं नरत्वसिंहत्वोभयात्मकं रूपम् ईश्वरादन्यः को रचयितुं शक्नोति। एवमेव श्रीमद्भागवतपुराणे यत्र तत्र बहुषु स्थलेषु भगवतः कृष्णस्य प्रभावातिशयः सर्वज्ञत्वसर्वशक्तिमत्त्वसर्वभवन-समर्थत्वादिद्योतकः समुपवर्णितोऽस्ति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीमद्भागवतपुराणस्य प्रामाण्यं सर्वैरेवास्तिकैर्हृदयेन स्वीक्रियते, श्रीमद्वल्लभाचार्यास्तु प्रमाणचतुष्टयमन्यन्त एव यथोक्तं शुद्धाद्वैतमार्तण्डे—'वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम्' (शु० मा० 79) समाधिभाषापदेन श्रीमद्भागवतपुराणं गृह्यते। अत एव श्रीमद्भागवतपुराणप्रतिपादितानां श्रीकृष्णचरितानामन्यासामपितस्मिन्नुपवर्णितानां कथानां सर्वथा सत्यत्वं प्रामाण्यञ्चाङ्गीकर्तव्यमेव सुधीभिः। तस्मिन्नेव श्रीमद्भागवतपुराण एतदपि कथानकं विद्यते यद् एकदा श्रीमद्देवर्षिनारदस्य मनसि समुत्पन्नेयं समुत्सुकतादिदृक्षा च यत् कथं भगवान् श्रीमत्कृष्ण एक एव युगपत् षोडशसहस्रसंख्यानां पत्नीनां गृहेषु ता आनन्दयति रञ्जयति चेति तु महच्चित्रमसम्भवमिव च प्रतिभाति। अतो गत्वावलोकनीयमिति धिया तत्र गते न तेन षोडशसहस्रप्रासादेषु क्वचित् पत्न्या वीज्यमानः क्वचिच्छिशुलालनपरायणः क्वचित् सन्ध्योपासनादिनित्यकर्मनिरतः क्वचिच्च पत्न्योद्धवेन च सहाक्षैर्दीव्यन् स्नानमाचरन् क्वचिन्मङ्गलप्रदा इतिहासपुराणादिकथाः शृण्वन् क्वचित् द्विजान् भोजयन् क्वचिच्च द्विजमुक्तावशिष्टं स्वयं भुञ्जान इत्येवमेव सर्वेषु हर्म्येषु तत्तद्विभिन्नकर्मप्रवृत्तः श्रीकृष्णोवऽलोकितः। एवं श्रीकृष्णरूपेणावतीर्णस्य साक्षात् परब्रह्मणो विचित्रप्रभावमवलोक्य देवर्षिनारदः सञ्जातपरमाश्चर्यः परमानन्दाब्धौ निमग्नो भगवन्तं श्रीकृष्णं हर्षगद्गदया गिराऽभिष्टूय तदनुज्ञातो वीणां रणयन् गायंश्च श्रीकृष्णगुणगणान् नामानि च निर्ययौ (श्रीम० भा० 10.69)।

एवंविधैरनेकैराश्चर्यजनकैः पूतनावधादिचरितैः श्रीमद्भागवतपुराणं परिपूर्णमस्ति। तेषां सर्वेषां वर्णनमत्रानावश्यकप्रायमिति यत्र तत्र स्वयं भगवता श्रीकृष्णनोक्तानि कानिचित् स्वल्पानि भागवतवचनानि समुद्ध्रियन्त आत्मतत्वप्रतिपादकानि 'संहर्तुमैच्छत् कुलं स्थितकृत्यशेष' इति भगवदिच्छयैव विप्राणां शापाद् यदयस्मयं मुसलं साम्बस्योदरे सञ्जातं, तन्निर्मितावुपादानादिबाह्यसाधनानि तु नैवाश्रितानि। भगवदिच्छया केवलेन विप्राणां शापेन सर्वं बभूव। तच्च मुसलं सत्यमेवासीत् यतस्तच्चूर्णितं बर्णितं प्रक्षिप्तञ्च सागरे चूर्णितावशिष्टञ्च केनचिल्लुब्धकेन स्वशल्येऽग्रभागे विनियोजितम्।

इत्थं स्वजनवैक्लव्यं निरीक्ष्य जगदीश्वरः
तमग्निमपिबत्तीव्रमनन्तोऽनन्तशक्तिधृक्॥
—(भा० 10.17.25)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्येवं दावाग्निपानेन व्रजौकसां रक्षणादिकाः परमाश्चर्यजनिका अनेका भागवतोपवर्णिताः कथास्तस्य ब्रह्मणोऽनन्तशक्तिसम्पन्नत्वात् कर्तुमकर्तुमन्यथा-कर्तुं रूपैश्वर्यं समर्थयन्ति।

एतेनैतत् समायातं यद् ईश्वरेच्छा समुद्‌भूतोऽयं प्रपञ्चः ब्रह्मकारणकत्वाद् ब्रह्मात्मक एव न तु मायिको न वा भगवद्‌भिन्नः, प्रत्युत भगवत्स्वरूप एव। उक्तमपि—

यत्र येन यतो यस्य यस्मै यद् यद् यथा यदा।
स्यादिदं भगवान् साक्षात् प्रधानपुरुषेश्वरः॥—(शु० 18)

श्रीमद्‌भागवते गजेन्द्रमोक्षप्रकरणे गजेन्द्रस्तुतौ—

यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम्।
योऽस्मात् परस्माच्चपरस्तं प्रपद्ये स्वयंभुवम्॥
—(भा० 8.3.3)

इत्येतच्छ्लोकस्य 'य इदं स्वयम्' इति वाक्यम् 'इदं सर्वं यदयमात्मा' इति श्रुति-मनुवदति। 'आत्मैवेदं सर्वं पुरुष एवेदं सर्वं यद्‌भूतं' जगतामादिभूतस्त्वं जगत्त्वं जगदाश्रयः, सर्वभूतेष्वसंयुक्त एको भाति भवान् परः (अध्या० 1.5.52)

त्वय्यग्र आसीत्त्वयि मध्य आसीत् त्वय्यन्त आसीदिदमात्मतन्त्रे।
त्वमादिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्मात्॥
—(भा० 8.6.10)

'एकाकी न रमते स द्वितीयमैच्छत्' 'एकोऽहं बहु स्याम' इति श्रुत्यैकस्यैव ब्रह्मणो बहुभवनं स्पष्टमेव प्रतिपाद्यते। अतः प्रतीयते यद् बहुभिरपि रूपैः स एक एव भगवान् प्रतिभाति। 'क्रीडार्थमात्मन इदं त्रिजगत् कृतं ते स्वाम्यन्तु तत्र कुधियः पर ईश कुर्युः' (भा० 8.12.20) यदि चैतज्जगत् सत्यं न स्यात् मायिकं मिथ्याभूतञ्च भवेत् 'तदा तु जाग्रज् जगति कृतानि कर्माणि स्वाप्निकजगति कृतानि कर्माणीव पुण्यपापजनकानीष्टानिष्टप्रदानि च न भवेयुरेवञ्च कृतप्रणाशा-कृताभ्यागमरूपदोषः समायाति। श्रुतौ तु 'नामुक्तं क्षीयते कर्मजन्मकोटिशतैरपि', अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' एवमादीनि प्रतिपादितानि वाक्यानि जगतः सत्यत्व एव सार्थकानि सम्भवन्ति नान्यथा।' कुर्वते कर्मभोगाय कर्मकर्तुं च मुञ्चते, नद्यां कीटा इवावर्त्तादावर्तान्तिरमाशु ते। व्रजन्तो जन्मनोजन्म लभन्ते नैव निर्वृतिम्' (पञ्चदशी 1.30) अतो यथा अकृताभ्यागमकृतप्रणाशरूपो दोषो न

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्यादिति प्रपञ्चस्य सत्यत्वमङ्गीकर्तव्यमेव। 'यतो वा इमानि भूतानि जायन्ते'; 'सर्वं खल्विदं ब्रह्म' इत्येतदर्थसमानार्थका अध्यात्मरामायणस्था निम्नाङ्कितश्लोका अपि समर्थयन्त्युपर्युक्तमर्थम्। यथा—

त्वत्त एव जगज्जातं त्वयि सर्वं प्रतिष्ठितम्।
त्वय्येव लीयते कृत्स्नं तस्मात्त्वं सर्वकारणम्॥
—(अ० 2.1.25)

रज्जावहिमिवात्मानं जीवं मत्वा भयं भवेत्।
परात्माहमिति ज्ञात्वा भयदुःखैर्विमुच्यते॥

चिन्मात्रज्योतिषा सर्वाः सर्वदेहेषु बुद्धयः।
त्वया यस्मात् प्रकाश्यन्ते सर्वस्यात्मा ततो भवान्॥

अज्ञानान्न्यस्यते सर्वं त्वयि रज्जौ भुजङ्गवत्।
त्वज्ज्ञानाल्लीयते सर्वमित्यादि॥
—(अ० 2.1.26-28)

तत्रैवैतदपि प्रतिपादितं यत्—

कार्यकारणकर्तृत्वफलसाधनभेदतः।
एको विभासि राम त्वं मायया बहुरूपया॥
—(अ० 1.5.54)

आकाशवत्त्वं सर्वत्रबहिरन्तर्गतोऽमलः।
असङ्गो ह्यचलो नित्यः शुद्धो बुद्धः सदव्ययः॥
—(अ० 1.5.56)

ब्रह्मादिभिरलभ्यस्त्वं प्रकृतेः पारगो मतः।
—(अ० 1.7.30)

त्वयि जन्मादिषड्भावा न सन्त्यज्ञानसम्भवाः।
निर्विकारोऽसि पूर्णस्त्वं गमनादिविवर्जितः॥

यथा जले फेनजालं धूमो वह्नौ तथा त्वयि।
त्वदाधारात्वद्विषया मायाकार्यं सृजत्यहो॥
(—अ० 1.7.31-32)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्र माया कार्यं सृजत्यहो 'इत्यस्मिन् वाक्ये मायाकर्तृकजगत्सर्जनप्रतिपादनेन मायाकर्तृकत्वं प्रपञ्चस्येत्यवगम्यत इति भ्रान्तिवार्यते बहूनाम् मनसि। किन्त्वियं प्रतीतिरविचारितरमणीया भ्रान्तिमूलिका च। यतः 'आत्मकृतेः परिणामात्' (ब्रह्मसूत्र 1.4.26), 'पटवच्च' (ब्र० 2.1.19) इत्येताभ्यां सूत्राभ्यां श्रीव्यासपादैः 'स आत्मानं स्वयमकुरुत' (तै० 2.7) इति श्रुतिमूलकं ब्रह्मप्रकृतिकत्वं प्रपञ्चस्य स्पष्टमेव प्रतिपादितम्। तर्हि 'मायाकार्यं सृजत्यहो' इत्यस्य का गतिरित्यत्र प्रमेयरत्नार्णवे सम्यक् प्रतिपादितं यस्यायं संक्षेपो यद् 'व्यामोहिका माया जीवं व्यामोह्य तदीयबुद्धौ प्रापञ्चिकसद्वस्तुसदृशं मायिकं पदार्थमुत्पाद्य पुरःस्थितविषये प्रक्षिपति तदा पदार्थग्रहणे तस्यापि ग्रहणात् तद्विशिष्टज्ञानं भ्रमात्मकं भवति, तया मायया व्यामोहिता बुद्धिः पदार्थानन्यथा मन्यते न तु पदार्था अन्यथा भवन्ति। यथा भ्राम्यतः पुरुषस्य 'घटो गृहादिकं वा भ्राम्येति' इतिप्रत्यक्षे घटादिगताकृत्यादिर्वस्तुभूता प्रतीयते, भ्रमणन्तु मायाप्रक्षिप्तविषयतारूपत्वान्मायिकम्। एवमेव 'सर्वंखिल्विदं ब्रह्म' इतिश्रुत्या प्रतीयमानस्य प्रपञ्चस्य ब्रह्मात्मकत्वात् प्रपञ्चस्य सत्यत्वं तत्रैव च यद् उत्पत्तिविनाशवत्त्वं कुत्सितत्वमन्योन्याभावादि च प्रतीयते तन्मायाप्रक्षिप्तविषयतारूपत्वान्मायिकम्। इत्येतद्दृष्ट्यैव 'माया कार्यं सृजत्यहो' (अ० 1.7.32) मयाध्यक्षेण प्रकृतिः श्रूयते सचराचरमित्यादयो ग्रन्था व्याख्येयाः समाधेयाश्च।

यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः।
नश्वरं गृह्यमाणं च विद्धि मायामनोमयम्॥

देहं मनोमात्रमिमं गृहीत्वा
ममाहमित्यन्धधियो मनुष्याः ...

मायान्तरा पतित नाद्यपवर्गयोर्यत्
स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम्॥ —(भा०)

इत्यादयो भागवतश्लोका अप्येतद्दृष्ट्यैव सावकाशा भवन्ति।

पुरुषसूक्तेऽपि प्रपञ्चस्य पुरुषात्मकत्वमेव प्रतिपादितं यथा—

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्
सभूमिं सर्वतः स्पृत्वात्यतिष्ठद्दशाङ्गुलम्।

पुरुष एवेदं सर्वं यद्भूतं यच्चभाव्यम्
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यादिश्रुतिभिर्जगतो ब्रह्माभिन्नत्वमेवाभ्यधायि। श्रीमद्भागवतमहापुराणेऽपि पुरुषसूक्तमनुसृत्य भगवतो विराड्रूपस्य यद् वर्णनं कृतं तत्रापि भगवतोऽङ्गेषु लोकानां कल्पना कृता। कल्पितत्वमेवोक्तम् यत्राधिष्ठाने च यद्वस्तु कल्प्यते तत्राधिष्ठानस्य सत्यत्वं कल्पितस्य च मिथ्यात्वमेव भवतीति नियमः। अतो भगवदङ्गेषु अधिष्ठानभूतेषु कल्पितानां लोकानां 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति' श्रुत्या केवलं वाचारम्भणं नामधेयमेव। वस्तुतस्तु तत्तल्लोकपदैर्व्यवह्रियमाणा लोका ब्रह्मणोऽङ्गान्येव न त्वन्यदिति विभावनीयम्। तत्रैव भागवते नारदं प्रति परमेष्ठिकर्तृक उपदेश एवमुपवर्णितः—

स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः।
सहस्रोर्वङ्घ्रि बाह्वक्षः सहस्राननशीर्षवान्॥

यस्येहावयवैर्लोकान् कल्पयन्ति मनीषिणः।
कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः॥

पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः।
ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रोऽभ्यजायत॥

भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः।
हृदा स्वर्लोक उरसा महर्लोको महात्मनः॥

ग्रीवायां जनलोकश्च तपोलोकः स्तनद्वयात्।
मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः॥

तत्कट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः।
जानुभ्यां सुतलं शुद्धं जङ्घाभ्यान्तु तलातलम्॥

महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलम्।
पातालं पादतलत इति लोकमयः पुमान्॥

भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्यनाभितः।
स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना॥

—(भा० 2.5.35-42)

तत्रैव श्रीमद्भागवते द्वितीयस्कन्धस्य षष्ठेऽध्याये श्रीविरिञ्चिना नारदं प्रति एवमप्युक्तं यद्—

अहं भवान् भवश्चैव त इमे मुनयोऽग्रजाः।
सुरासुरनरानागाः खगामृगसरीसृपाः॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गन्धर्वाप्सरसो यक्षा रक्षोभूतगणोरगाः ।
पशवः पितरः सिद्धा विद्याध्राश्चारणाद्रुमाः ॥

अन्ये च विविधा जीवा जलस्थलनभौकसः ।
ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः ॥
सर्वं पुरुष एवेदं भूतं भव्यं भवच्चयत् ।
तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति ॥

—(भा० 2.6.12-15)

द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ।
वासुदेवात्परो ब्रह्मन्नचान्योऽर्थोऽस्ति तत्त्वतः ॥

—(भा० 2.5.14)

मायाशक्त्या भगवदभिन्नया सृष्टमपि जगद् भवतु नाम्ना मायिकं नाम, किन्तु तस्य मायिकत्वेऽभ्युपगम्यमानेऽपि न तस्य मिथ्यात्वं प्रतिपादयितुं शक्यते केनापि, मायाया भगवच्छक्तित्वाच्, छक्तिशक्तिमतोरभेदाच्च मायाकर्तृकमपि कार्यं कमपि ब्रह्मकर्तृकमेवेति सृष्टिकर्तृत्वं ब्रह्मण्येव न तु मायायामिति मन्तव्यम् ।

भगवतो भास्करान्निःसृता रश्मयो जगत्यौष्ण्यं जनयन्ति किमतो तदौष्ण्यं प्रकाशश्च रविरश्मिजन्यो रविजन्यो वेत्याकारकः सन्देहो जायते कस्यापि विज्ञस्याल्पज्ञस्य वा चेतसि । सर्वैरप्येकस्वरेण सूर्यमूलकत्वमेवाङ्गीक्रियते प्रकाशादे-रविरविरश्म्योर्भेदाभावात् । कविकुलकिरीटेन श्रीकालिदासेन स्वकीये रघुवंशाख्ये महाकाव्ये नन्दिनीतो माययोत्पन्नसिंहस्य वर्णनं कृतम्, तत्र माययोत्पन्नसिंहस्य नरसिंहेन राज्ञा दिलीपेन सह मिथो यादृशः संलापः संजातः स कस्य नाम सहृदयस्य हृदयं न बलात् स्वायत्तीकरोति । अभिप्रायस्त्वयमेव यन्नन्दिनी-माययासमुद्भूतस्य सिंहस्य यथा नन्दिनीतः समुद्भवस्तत्रैव विलयश्च सञ्जातः । एवमेव सकलस्य प्रपञ्चस्यानन्तकोटिब्रह्माण्डनिकायस्य समुद्भवः संहारश्च सच्चिदानन्दस्वरूपाद् ब्रह्मण एव तदिच्छयैव भवतः, यथा च माययोत्पन्नसिंहस्य प्रतीयमानमपि पार्थक्यं न वस्तुतो नन्दिनीतः पृथगिति वक्तुं शक्यते । एवमेव भगवदिच्छयैव सञ्जातस्य सकलप्रपञ्चस्य प्रतीयमानमपि पार्थक्यं न वस्तुतो ब्रह्मणः पृथगिति निष्कर्षः । अतः प्रमाणभूतेन प्रस्थानचतुष्टयेन ब्रह्मणः स्वरूप-विषये यत् किमपि प्रतिपादितं ततः सारं सारमादाय प्रति प्रस्थानवाक्यान्यु-द्ध्रियन्ते येन संशयविपर्ययादिरहितं ब्रह्मस्वरूपविषयकं याथातथ्यज्ञानं सञ्जायेत, अन्यथाऽयथावाञ्ज्ञानस्य मिथ्यात्वान्मिथ्याज्ञानापायाभावाद् 'दुःखजन्मप्रवृत्तिदोष-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मिथ्याज्ञानानामुत्तरोत्तरापाये तदन्तरापायादपवर्गः' (न्या० 1.1.2) इत्यपवर्गप्राप्तिर्दुर्लभैव, तदप्राप्तौ च दुःखानामात्यन्तिकनिवृत्तिरुपलब्धिश्चात्यन्तिकाक्षय्यसुखस्याकाशकुसुमायितमेवेति उक्तमप्यभियुक्तैः—अन्यथा सन्तमात्मानं योऽन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चौरेणात्मापहारिणा' ॥ श्रीशङ्कराचार्येणापि 'अथातो ब्रह्मजिज्ञासा' इति सूत्रभाष्ये एवं वहवो विप्रत्तिपन्ना युक्तिवाक्यतदाभाससमाश्रयाः सन्ति, तत्राविचार्य यत् किञ्चित् प्रपद्यमानो निःश्रेयसात् प्रतिहन्येतानर्थञ्चेयाद्' इति यत् किञ्चित् प्रतिपद्यमानताया मिथ्याज्ञानत्वान्न केवलं निःश्रेयसविघातकत्वमपित्वनर्थजनकत्वमपि प्रतिपादितम् । अत्रैतदवधेयं यत् प्रस्थानत्रय्यां चतुष्टय्यां वा प्रधानत उपनिषद एव प्रमाणभूता इतरप्रमाणानां तन्मूलकत्वादेव प्रामाण्यं—

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥

इति वचनाद् उपनिषत्सारभूताया गीतायाः प्रमाणत्वम् । प्रत्यध्यायसमाप्तिसूचकवाक्येऽपि 'इति श्रीमद्भगवद्गीतासूपनिषत्सु' इति उपनिषन्मूलकत्वादुपनिषच्छब्दप्रयोगोपि संगच्छते । एवमेव ब्रह्मसूत्राणामपि वेदान्तवाक्यमीमांसापरत्वाद् उपनिषदर्थप्रतिपादनपरत्वादेव प्रामाण्यम् । एषु त्रिषु प्रमाणेषूपनिषदाम् अपौरुषेयत्वाच्छ्रुतित्वाच्च स्वयं प्रामाण्यं सर्वैरेवास्तिकदार्शनिकाचार्यैः स्वीकृतमेव । इतरयोस्तु गीताब्रह्मसूत्रयोः श्रुतित्वाभावेऽपि तन्मूलकत्वात् प्रामाण्यम् । श्रीमद्भागवतमहापुराणस्य प्रस्थानत्वविषये मतभेदो दृश्यते । किन्तु सोऽपि मतभेदो विचारासहत्वान्नैवादरणीयः । महाभारतान्तर्गताया गीताया रचयिता पाराशर्यबादरायणो व्यास एव । एवं ब्रह्मसूत्रणां रचयितापि स एव । अतश्चेत् तद्विरचितयोर्गीताब्रह्मसूत्रयोः प्रामाण्यं प्रस्थानत्वञ्च स्वीक्रियते, तदा किमपराद्धं श्रीमद्भागवतमहापुराणेन येन व्यासविरचितत्वेऽपि तदुभयोत्तरवर्तिकृतित्वेऽपि नाङ्गीक्रियेत तस्य प्रामाण्यं प्रस्थानत्वञ्च । अत एव शुद्धाद्वैतमार्तण्डे श्रीमद्भागवतस्यापि प्रामाण्यमङ्गीकृतम् । यथा—

वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि ।
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम् ॥ (शु० 79)

अत्र श्रीकृष्णवाक्यानीति पदेन गीतोक्तश्रीकृष्णवाक्यानि गृह्यन्ते । समाधिभाषा व्यासस्येति पदेन तु श्रीमद्भागवतमहापुराणम् । यतो देवर्षिनारदेन व्यासं प्रत्युक्तं यद्—

अतो महाभाग भवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः ।
उरुक्रमस्याखिलबन्धमुक्तये समाधिनानुस्मर तद्विचेष्टितम् ॥
—(भा० 1.5.13)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कृतमपि श्रीव्यासदेवेन तथैव—

> तस्मिन् स्व आश्रमे व्यासो, बदरीषण्डमण्डिते ।
> आसीनोऽप उपस्पृश्य 'प्रणिदध्यौ मनः स्वयम् ॥ (भा० 1.7.3)

अतः शुद्धाद्वैतवेदान्ते प्रमाणचतुष्टयी प्रमाणत्वेनाङ्गीकृता श्रीमद्वल्लभाचार्यादिभिराचार्यैः यतो लक्षणप्रमाणाभ्यामेव वस्तुसिद्धिर्भवति । निबन्धेऽस्मिन् चतुर्णां प्रमाणानां मध्ये क्रमशः प्रत्येकप्रमाणमादाय ब्रह्मस्वरूपविमर्शो निप्रीयते ।

श्रीमद्भागवतमहापुराणप्रणयनात् प्राक् प्रस्थानत्रयी चैदासीद् भवतु नाम । श्रीमन्महाभारतपुराणप्रणयनात् प्राक् प्रस्थानद्वयी, एकमेव वा प्रस्थानं स्यात् का हानिः । किन्तु साम्प्रतं तु सर्वैरपि प्रस्थानचतुष्टयी स्वीकार्यैव । वस्तुतस्त्वाप्तवाक्यं सर्वमपि प्रमाणमेव न चेत् स्यात् तच्छ्रुत्यादिविरुद्धमिति ।

ब्रह्मस्वरूपविषये गीता

श्रीमद्भगवद्गीताप्रतिपादितब्रह्मस्वरूपविवेचनात् प्रागेतत्वश्यमेव विज्ञेयं यत् कस्मिन् समये, कस्याञ्च परिस्थितौ, किञ्च प्रयोजनमुद्दिश्य भगवता स्वयं नारायणेन श्रीकृष्णेनार्जुनं प्रत्ययं गीतोपदेशः कृतः । तत्र तावद् विदितचरमेवास्त्येतत् प्रायः सर्वेषां यद् यदा कौरवैर्दुर्योधनादिभिर्द्युतहेलनकचग्रहणादिभिरमानुषव्यवहारैर्हृतराज्या भृशमवमानिताः पीडिताश्च पाण्डवा युधिष्ठिरादयो गत्यन्तराभावाद् युद्धाय विवशाः सन्तः क्षात्रं स्वधर्मंस्वीकृत्याततायिभिस्तैर्दुर्योधनादिभिः सह योद्धुं रणाङ्गणे समवेतास्तस्मिन्नेव समयेऽर्जुन उभयोः स्वपरपक्षयोर्भीष्मद्रोणादीन् गुरूनन्यांश्च स्वजनबन्धुवान्धवादिसम्बन्धिनो युद्धाय कृतनिश्चयान् समुपस्थितान् समवलोक्य, तेषाञ्च वधं पापजनकं शिष्टविगर्हितं नरकादिनिन्द्यलोकप्राप्तिकरञ्चालोच्य तस्मात् स्वधर्मभूतादपि धर्म्ययुद्धाच्छोकमोहाभिभूतविवेकः सन् विरराम । तदैव भगवता श्रीकृष्णेन ऋतेज्ञानादुपायान्तरमपश्यतार्ज्जुनस्य शोकमोहाद्यपनुतय आत्मज्ञानप्रधाना सकलदुःखौघप्रध्वंसिनी शाश्वतसुखैकजननी गीतेयमुपदिष्टा । तदेव गीतोक्तब्रह्मात्मैक्यज्ञानम् अस्मिन् प्रकरणे संक्षेपतो यथामति विविच्यते ।

अर्जुनेनोपवर्णितं युद्धविरतिकारणं सर्वमाकर्ण्य भगवताश्रीकृष्णेनालोचितं यत् साम्प्रतमर्जुनोऽज्ञातात्मस्वरूपो विस्मृतात्मस्वरूपो वा स्वयमात्मानं भीष्मद्रोणादीनां हन्तारं, भीष्मद्रोणादींश्च हतानिति मत्वैव विषण्णः सन् युद्धाद्विरिरंसत्यतश्चेदस्मा आत्मयाथात्म्यमर्थात् आत्मनो नित्यत्वं निर्विकारत्वं जन्ममरणादिराहित्यं च सम्यक् प्रदर्शितं स्यात् तदा पुनरप्ययं गतसम्मोहः प्रकृति-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्थश्च भूत्वा कर्तव्यपरायणो भविष्यतीति कृत्वा आत्मनो नित्यत्ववादिकं सम्यक् प्रतिपादितं पुनः पुनः प्रसङ्गमुत्थाप्य भगवता गीतायां प्रायः सर्वत्रैव। विषयस्य दुर्ज्ञेयत्वाद् दुर्वचत्वाच्च तत् पौनः पुन्येन बहुभिः प्रकारैश्च प्रतिपादनं न पुनरुक्ति-प्रभृतिदोषग्रस्तम्। प्रत्युताभ्यासरूपेण बोधदाढ्यार्थं गुण एवेति मन्तव्यम्। आत्मनो नित्यत्वादिविषये द्वितीयाध्याये—

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम्॥ —(गी० 2.12)

श्लोकेनानेनात्मनस्त्रिकालाबाधितत्वं कालत्रयेऽप्येकरूपेण स्थायित्वञ्चोक्त्वाऽऽत्मनो नित्यत्वं साधितम्। श्लोकान्तरेणापि नित्यत्वमविक्रियत्वञ्चोक्तम्। तथा हि—

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥—(गी० 2.20)

स्थूलसूक्ष्मकारणाख्यशरीरत्रितयाद् आत्मनोऽत्यन्तभिन्नत्वाच्छरीरनाशेऽपि नात्मनाश इति भावः। उक्तञ्च पञ्चदशीकारेणापि—'यथा मुञ्जादिषीकैवमात्मयुक्त्या समुद्धृतः। शरीरत्रितयाद्धीरैः परं ब्रह्मैव जायते' (पञ्चदशी 1 तत्त्वप्रकरण 42)। गीतायामपि—'ममैवांशो जीवलोके जीवभूतः सनातनः' (गी० 15.7) इति जीवात्मनां ब्रह्मांशत्वमंशांशिनोरभेदाद् ब्रह्माभिन्नत्वमत एव सनातनत्वं नित्यत्वं च स्पष्टमेवाभिहितम्। श्रुतिरप्यात्मनो ब्रह्माभिन्नत्वे प्रमाणम्। तथाहि—'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति' (छा० 6.3.2)। अनेन प्रकारेण पत्यगभिन्नाद्वितीयत्वं नित्यशुद्धबुद्धमुक्तस्वभावत्वञ्च जीवानां गीतायाः सम्मतमित्यत्र नास्ति कस्यापि विप्रत्तिपत्तिः। गीता तु न केवलं जीवानामेव ब्रह्माभिन्नत्वं प्रतिपादयति अपि तु सम्पूर्णस्य चराचरात्मकस्य जगतो ब्रह्मात्मकतां तदभिन्नत्वञ्च परमसुस्फुटाक्षरैरभिधत्ते—

न तदस्ति विना यत्स्यान्मया भूतं चराचरम्। —(गी० 10.39)
अथवा बहुनैतेन किं ज्ञातेन तवार्जुन।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्। —(गी० 10.42)

श्रुतिरपि—'पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि'। —(ऋ० 10.90.3) 'सर्वं खल्विदं ब्रह्म' इत्यादिभिर्मन्त्रैर्गीतार्थमेव संवदति। सारांशस्त्वयं यत् यथा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मणि जन्मादिभावविकाराणां राहित्यं वर्तते तथैव तदभिन्नत्वाज्जीवात्मस्वपि जननमरणादिविकाराभावः सिद्ध एव अतो भीष्मद्रोणादीनां विषये—

कथं भीष्ममहं सङ्ख्ये द्रोणञ्च मधुसूदन।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ इति

विषादस्यावसर एव नास्ति। अत एवोक्तं 'न जायते म्रियते वा कदाचिद्' इत्यादि, 'अच्छेद्योऽयमदाह्योऽयमित्यादि च (गी० 2.24)। न च प्रत्यक्षं प्रतीयमानानां जननमरणादीनामपलापः न कर्तुं शक्यत इति चेन्न—

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥
—(गी० 21.32)

अत्र 'देही ति पदेन देहोऽस्यास्तीति देही तिव्युत्पत्या देहदेहिनोः पार्थक्यं स्पष्टमेव प्रतीयतेऽतो देहनाशेन नात्मनाश स्तदुत्पत्तौ च तदुत्पत्तिरिति। न च देहीति व्युत्पत्तिबलात् देहदेहिनोः केवलं पार्थक्यमात्रं प्रतीयते, न तु तन्नाशे तन्नाशाभाव इत्यादि। इति शङ्कामपनयन्नेव ब्रूते भगवान्—

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥ —(गी० 2.12)

अर्थात् सर्वेषामस्माकं त्रैकालिकीसत्ताऽक्षुण्णाऽस्ति, कदापि नास्माकमभावो भवितुमर्हति। यतः—

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।
विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति ॥ (गी० 2.16.17)

देहीतिशब्दस्य व्युत्पत्त्यापि देहिनोऽविनाशित्वमन्तवत्त्वन्तु देहस्यैव प्रतीयते यथा 'देहा अनेके सन्त्यस्यै कस्येति देही' 'धनानि बहुविधानि सन्त्यस्येति धनीतिवत्। एतादृशोऽयमात्मा सर्वथा दुर्ज्ञेय एव। अनेकजन्मार्जितपुण्यपुंजेनैव येन केनचिज्ज्ञातुं शक्यते।

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥
(गी० 2.29)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'श्रवणायापि बहुभिर्यो न लभ्यः, शृण्वन्तोऽपि बहवो यं न विद्युः । आश्चर्यो वक्ता, कुशलोऽस्य लब्धाश्चर्यो ज्ञाता, कुशलानुशिष्टः' (क० 1.2.7) एवञ्च ब्रह्मणो दुर्ज्ञेयतामुक्त्वा तस्य षड्विकाराभावं हि दर्शयिषुराह भगवान्—श्रीकृष्णः—

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥
(गी० 2.20)

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ —(गी० 2.23-25)

अनेन प्रकारेणात्मनो निर्विकारत्वम् अनादित्वम अनन्तत्वं वृद्धिक्षयादिराहित्यं प्रतिपाद्य तस्य नित्यशुद्धबुद्धमुक्तस्वभावता दृढीकृता भगवता वासुदेवेन । एवं परमार्थतः आत्मनो निराकारत्वं निष्क्रियत्वञ्च प्रतिपाद्य साकारत्वं सक्रियत्वं चापि ब्रह्मणो न विरुध्यते सर्वविरुद्धधर्माश्रयत्वाद् ब्रह्मणः इति समर्थयति भगवान् वासुदेवः ।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥ —(गी० 4.7, 6)

इति श्लोकद्वयेन मायाख्यया स्वशक्त्या परित्राणाय साधूनां विनाशाय च दुष्कृतां धर्मसंस्थापनार्थाय च प्रतियुगं रामकृष्णादिरूपेण मत्स्यकच्छपादिरूपेण च स्वेच्छया स्वावतरणमपि निगदितम् । अर्थात् परमार्थत आकारादिरहितोऽपि निष्क्रियत्वात् कर्तृत्वभोक्तृत्वादिशून्योऽपि निजेच्छया मायाशक्तिं वशीकृत्य तदाश्रयेण साकारतां सर्वकर्तृतां चापि सर्वशक्तिमत्त्वेन धारयतीति न तत्र कश्चिद् विरोधः । गीतायां 'सर्वं खल्विदं ब्रह्म'त्ययं सिद्धान्तः भगवता श्रीकृष्णेन सर्वथा समुद्घोषितः समर्थितश्च यथा—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ —(गी० 4.24)

न तदस्ति विना यत्स्यान्मया भूतं चराचरम् । —(गी० 10.39)

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ —(गी० 10.42)

इत्यादयः श्लोकाः सर्वथा जगतो ब्रह्मरूपतामुद्घोषयन्ति, न तु तस्य मिथ्यात्वमिति । मिथ्याज्ञानशब्देन ज्ञानस्य मिथ्यात्व कर्मधारयसमासमाश्रित्यावगम्यते, न तु मिथ्याभूतानां वस्तूनां ज्ञानमिति षष्ठीतत्पुरुषोऽभिमतः। अधिष्ठानस्य वस्तुभूतत्वात् तत्र भ्रान्त्या यतन्मिथ्याज्ञानं जायते, तस्यैव मिथ्याज्ञानस्य निवृत्तिर्याथार्थ्यज्ञानेन भवति न तु वस्तुभूतस्याधिष्ठानस्य निवृत्तिः । अत एव मिथ्याज्ञाननिवृत्तौ 'यद्रजतं सा शुक्ति' केति रजतज्ञानस्यैव निवृत्तिर्भवति न तु शुक्तिकायाः। सिद्धमनेन यज्जगतो ब्रह्मरूपता सत्या । तत्र नामरूपाभ्यां यो विविधभेदः प्रतिभासते कुत्सितत्वादिकञ्च स भेद एव मिथ्याज्ञानम् यथा घटशरावादीनां मिथो भेदः स्वोपादानभूतमृत्तिकातो वाभेदः, कटककुण्डलादीनां वा हैम्नः। एतादृशस्यैवमिथ्याज्ञानस्य निरासो विधेयो न तु मृत्तिकाया हैम्नो वा । अतो न जगतो मिथ्यात्वमभिमतं गीतायाः, प्रत्युत जगता ब्रह्माभिन्नत्वेन यन्मिथ्याज्ञानं, तदेवावरणविक्षेपशक्तिसमन्विताया मायायाः कार्यत्वान्मायिकं निरसनीयञ्च । तदेव मिथ्याज्ञानं ब्रह्माभिन्नत्वं, न तु जगतो निरासः समुचितः । तन्निरासस्तु यदा ब्रह्मणि प्रपञ्चोऽयं लीनो भवति तदैव प्रलयकाले लीला-संवरणावसर एव भवितुमर्हति न ततः प्राक् ।

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ (गी० 5.18)

इत्यनेन श्लोकेनापि गीताया जगत्सत्यत्ववादिता ब्रह्मरूपता च स्पष्टमेव प्रतीयते, अन्यथा बाह्यदृष्ट्या प्रस्फुटद्भेदेषु ब्राह्मणादिषु ब्रह्मत्वदृष्टिमन्तरा समत्वं दुरुपपादमेव स्यात् । उक्तमपि—

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः ॥ (गी० 5.19)

यतो ब्रह्मनिर्दोषं समञ्च सर्वत्रैव वर्तते । अतो ब्रह्मविदां दृष्टिः सर्वत्र निर्दोषत्वेन समत्वेनैव च पतति । अत एव तैर्ब्रह्मविद्भिरिहैव जीवितावस्थायामेव जन्मादिर्जितो भवति; जीवन्मुक्तास्ते भवन्तीत्यर्थः । यदि जगतः सत्यता न स्यात्, तस्य ब्रह्माभिन्नता, ब्रह्मरूपता वा न स्यात्, तदा समदृष्टीनां पण्डितानां जीवन्मुक्ततापि न

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्यात् । न त्वेवं भगवतैवोच्येत यद् 'इहैव तैर्जितः सर्गः', 'तस्माद्ब्रह्मणि ते स्थिताः' 'ब्रह्मविद् ब्रह्मणि स्थितः' (गी० 5.20) इति । यस्माद् ब्रह्मविद, एव ब्रह्मणि-स्थितिर्भवति, अतो 'ब्रह्मणि ते स्थिताः' इत्यनेन वाक्येन तेषां समदर्शिनां ब्रह्म-वित्वं प्रतिपादितं भवति । सारांशस्त्वयं यद् यावद् 'हरिरेव जगत्' सर्वं खल्विदं ब्रह्म' त्याकारिका दृढा बुद्धिर्नोदेति तावत् कथं गीतोक्तानां समदर्शिनां पण्डितानां; 'तस्मात् ब्रह्मणि ते स्थिताः' 'ब्रह्मविद्ब्रह्मणि स्थितः' इत्यादिवचनानां संगति-र्भवितुमर्हति । जगतो मिथ्यात्वे तु एतत्सर्वमनुपपन्नं स्यात् । अतो जगतो ब्रह्मात्म-सर्वैरप्युररीकर्तव्यमिति प्रतिभाति गीतोक्तदिशा । आसुरी प्रकृतिर्येषां भवति, त एव 'असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम्' (गी० 16.8) इति । जगदसत्यम-प्रतिष्ठमनीश्वरं च वदन्ति । अतः प्रपञ्चस्य नास्त्यसत्यत्वमिति निष्कर्षः । एवञ्च गीताया मुख्यं प्रतिपाद्यं सर्वसंसारविच्छेदकारणं ब्रह्मैकत्वदर्शनमेकमेवा-द्वितीयमद्वैतवेदान्तसिद्धान्तसम्मतमेवेति प्रतिभाति । तथा हि—

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥

(गी० 6.29-31)

सप्तमाध्यायारम्भे भगवान् आत्म (ब्रह्म) परिचयम् अर्जुनाय ददानो यदुक्तवांस्तेनापि जगतो ब्रह्मरूपतैव प्रतिपादिता भवति । तथा हि—

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥

एतद्योनीति भूतानि सर्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥

मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥
(गी० 7.1-7)

'जीवनं सर्वभूतेषु' (गी० 7.9)
'बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्' (गी० 7.10)

इत्यादिवचनैर्भूम्यादेर्जडस्यापरप्रकृतित्वेन, चेतनानां जीवानां परप्रकृतित्वेन च वर्णनेन सर्वेषां जडचेतनानां ब्रह्मप्रकृतिजन्यता प्रतिपादिता । अत एव 'एतद्योनीनि भूतानि सर्वाणीत्युपधारय' इत्येतद्वाक्यं निष्कर्षरूपेणोक्तं भगवता श्री कृष्णेन । 'मत्तः परतरं नान्यत्किंचिदस्ति धनञ्जय' इत्यनेन तु जगतः कारणान्तरस्य प्रतिषेध उक्तः किन्त्वेतादृशं ब्रह्म न सर्वेषां सुज्ञेयं सुलभञ्च भवति ।

नाहं प्रकाशः सर्वस्य योगमायासमावृतः
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ (गी० 7.25)

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ (गी० 8.14)

अनन्यचेतःपदेन स्पष्टमेवैतत् प्रतीयते यद् 'नास्ति अन्यद् ब्रह्मातिरिक्तं वस्त्वन्तरमित्येवंविधं चेतो यस्य स एवानन्यचेतःपदवाच्यो भवति, अथवा नास्त्यन्यस्मिन् भगवदतिरिक्ते चेतो यस्य सोऽनन्यचेताः । एवंभूतः सन्नेव यो निरन्तरं नित्यशो दीर्घकालं यावत् स्मरति, श्रवणानन्तरं मननं करोति, तदनन्तरञ्च निदिध्यासन, तस्यैव ब्रह्मज्ञानं जायते न तु यस्य कस्यापीतरजनस्य सर्वस्य । उक्तमपि 'आ सुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया दद्यान्नावसरं किञ्चित् कामादीनां मनागपि' । योगसूत्रेऽपि 'स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः' । अतोगुरुवेदान्तवाक्यानांश्रवणेनानन्यचेतस्त्वं सम्पाद्य नित्यशः सततस्मरणरूपं मननं च कृत्वा नित्ययुक्ततारूपनिदिध्यासनेनैव ब्रह्मस्वरूपोपलब्धिर्भवतीति रहस्यम् 'अनन्यचेता. सततमिति वचनस्य'। ब्रह्मज्ञानानन्तरं' भजते मामनन्यभागिति या भक्तिरुदेति, सा तु परमानन्दस्वरूपा परमाह्लादजननी ब्रह्मज्ञानफलात्मिका

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मुक्तेरपि गरीयसीतित्वन्यद् 'यदि भवति मुकुन्दे भक्तिरानन्द सान्द्रा, विलुठति चरणाग्रे मोक्षसाम्राज्यलक्ष्मीः' इत्यभियुक्तोक्तेः। साम्प्रतं गीतायां ब्रह्मजीव-जगतां स्वरूपविवेचनस्य प्रकृतत्वात् तदैव विवेचनीयमिति विषयान्तरमिया ततो विरम्यते। शुद्धाद्वैतवेदान्तसिद्धान्तप्रतिपादनावसरे यथास्थानं भक्तेर्गरिम्णो विषयेऽपि किमपि प्रतिपादयिष्यते। भगवान् स्वयं स्वमुखात् ब्रह्मज्ञानस्य जनन-मरणादिरूपं संसृतिनिवर्तकत्वमभिधत्ते। तथा हि—

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः॥

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते॥

इति च अत्र आङ् अभिविधाविति ब्रह्मलोकपर्यन्तं पुनरावर्तित्वमुक्तं भवति, किं पुनः लोकान्तराणां स्वर्गादीनामिति।

त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।
ते पुण्यमासाद्य सुरेन्द्रलोक-
मश्नन्ति दिव्यान्दिवि देवभोगान्॥
ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयीधर्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते॥ (गी० 9.20, 21)

आत्मनो व्यापकत्वेऽसंसर्गित्वे च—

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः॥ (गी० 9.4)

इत्युक्त्वोदाहरति—

यथाकाशस्थितोनित्यं वायुः सर्वत्रगो महान्।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥ (गी० 9.6)

आत्मविभूतिवर्णनोपक्रमेऽपि भगवतोक्तं यत्—

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे॥ (गी० 10.19)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अर्थात् विस्तरस्य व्यापकरूपेण स्थितस्य मम विभूतीनामन्तो नास्ति। अतो युगसहस्रेणापि वक्तुमशक्याः सर्वा विभूतयस्तथापि प्राधान्यतः कथयिष्यामि। इत्यनेन वाचामगोचरत्वं निःशेषरूपेण वक्तुमशक्यत्वं च प्रतिपादितं भगवता। तथापि संक्षेपेण सूत्ररूपेण प्रथमन्तावदिदमुपदिशति यत्—

अहमात्मा गुडाकेश सर्वभूताशयस्थितः।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥ (गी० 10.20)

अहमेव सर्वप्राणिनामन्तर्हृदि जीवेनात्मनानुप्रविश्य प्रत्यगात्मरूपेण स्थितोऽस्मि। मयि परब्रह्मणि प्रत्यगात्मनि च नास्ति मनागप्यन्तरमिति भावार्थः। एतदेव स्पष्टयन् ब्रूते 'अहमादिश्चेत्यादिना यदहमेव भूतानामादिमध्यावसानेषु सर्वास्ववस्थासु परमार्थतः स्थितोऽस्मि, नाणुमात्रमप्यस्ति मत्तो भिन्नं किञ्चिदपीति। एतेन 'एकमेवाद्वितीयम्', 'सर्वं खल्विदं ब्रह्म' एकस्यैव निर्विकारतत्त्वस्य नामरूपात्मना व्याकृतिश्चैतज्जगत् इति सर्वं स्वल्पाक्षरैरेव प्रदर्शितम् भवति। वस्तुतस्तु 'नास्त्यन्तोविस्तरस्य मे' इति तु स्पष्टमेवाभिहितम्। अतः परं यद्गीतायां प्राधान्यतो विभूतीनां वर्णनं समुपलभ्यते, तदनत्यावश्यकत्वात् इह नोल्लिख्यते विस्तरभयात्। तत् सर्वं तत एवावगन्तव्यम्। अन्ततो यथोपक्रमे भगवतोक्तं यत्—

नान्तोऽस्ति मम दिव्यानां विभूतीनां परंतप। (गी० 10.40)
यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव।
तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् ॥

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥
(गी० 10.41-42)

अत उपक्रमोपसंहारयोर्ध्यानपूर्वकावलोकनेन सुस्पष्टमेवैतत् प्रतिभाति यत् 'अहमात्मेति' कथनेन प्रत्यगभिन्नाद्वितीयब्रह्मण्येव गीतायास्तात्पर्यमस्तीति। एवञ्चोपक्रमे 'अहमादिश्चेति कथनेनउपसंहारे 'विष्टभ्याहमिदं कृत्स्नमिति कथनेन च जगतोऽपि ब्रह्माभिन्नत्वमेव समर्थितं भवति। अन्यत्र पुराणादौ यत्र तत्र यज्जगतो मायिकत्वं मिथ्यात्वञ्च प्रतिपादितं तत्तु वैराग्योत्पादनार्थमासक्तिनिरसनार्थञ्चेति। वस्तुतस्तु जगज्जीवाकारैर्ब्रह्मैव विलसति क्रीडति च। सर्वञ्चैतद्विश्वं निष्प्रपञ्चस्य ब्रह्मणः प्रपञ्च एवेति प्रपञ्चपदेनाभिधीयते। (पचि विस्तारे' इति पचि धातोर्विस्तारार्थकत्वेन प्रपञ्चपदस्य ब्रह्मविस्तार एवार्थो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्युत्पत्यापि लभ्यते। अतो नास्त्यत्र संदेहलेशोऽपि जगत्पदवाच्यप्रपञ्चस्य ब्रह्माभिन्नत्वे। अतएव शुद्धाद्वैतवेदान्तिना सिद्धान्ते तु कुण्डलादिष सुवर्णवज्जगदिदं ब्रह्मैव। एवं जीवा अपि ब्रह्मैवेति सर्वत्र चेतनाचेतनेषु ब्रह्मदृष्टिरेव जायते। मायावादिनां मते यदुच्यते 'ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः' तत्स्थाने तु शुद्धाद्वैतवादिभिरपि ब्रह्म सत्यं जगत् सत्यं जीवो ब्रह्मैव नापर इत्यपि पठितुं शक्यते गीतादिग्रन्थसम्मतत्वात्। विश्वरूपप्रदर्शनेनापि भगवता स्वोपदेशस्य यथार्थत्वं स्पष्टीकृतम्। तथा हि-अर्जुनेन यद्यपि स्वीकृतम्—

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम॥ (गी० 11.3)

तथाप्येतेन वाक्येन संदिग्धार्थेन कदाचिदर्जुनस्यान्यस्य वा कस्यचिन्मनसि वाक्यार्थ एवं प्रतीयेत यत् 'एवं यथात्वमात्मानमात्थ' तत्ते ऐश्वरं रूपं द्रष्टुमिच्छामि। यस्मान्मनसि विश्वासः संजायेत तव कथने। 'एतेन प्रत्यक्षेण तव मानुषरूपेण कथमहं विश्वसिमि, यत्त्वमेवं विघोसीति' इति भ्रमापनयनार्थमेव भगवता श्रीकृष्णेनात्मनः प्रभुशक्तिं कर्तुमकर्तुमन्यथाकर्तुमित्यात्मिका विश्वरूपं प्रादर्शि। उक्तञ्च—

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च॥
पश्यादित्यान् वसून् रुद्रानश्विनौ मरुतस्तथा।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत॥
इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम्।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि॥
(गी० 11.5-7)

एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः।
दर्शयामास पार्थाय परमं रूपमैश्वरम्॥ (गी० 11.9)

सर्वतः प्रथमन्तु दिव्यचक्षुप्रदानरूपमात्मन ऐश्वर्यं प्रदर्शितं, येन सोऽर्जुनस्तद्विश्वरूपदर्शने क्षमो जातः। दिव्यचक्षुषो दिव्यश्रवणस्यैव चैतन्माहात्म्यमासीत् येन सञ्जयो युगपद्विभिन्नस्थलवर्तीनि युद्धादीनि वार्तालापांश्च प्रत्येकेषां रणस्थलवर्तिना योद्धॄणां दृष्ट्वा श्रुत्वा च धृतराष्ट्राय निवेदयितुं समर्थः सञ्जातः। साम्प्रतमप्यण्वीक्षणयन्त्रसाहाय्येन सूक्ष्मातिसूक्ष्मं वस्तु द्रष्टुं शक्यते। व्यवहितन्यपि शरीरान्तःस्थितान्यस्थ्यादीनि यन्त्रेणावलोक्यन्ते श्रूयन्ते च सुदूर-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

र्तिनः शब्दादयः किन्त्वेभिर्यन्त्रैर्युगपदनेकस्थलवर्तिनां विभिन्नविषयाणामिन्द्रियार्थसन्निकर्षमन्तरा ज्ञानमसम्भवं, तेषां परिमितशक्तित्वात् । दिव्यदृष्ट्यादिना योगसिद्ध्यादिभिस्तु किं किन्नभवितुमर्हतीति पातञ्जलयोगस्य विभूतिपादावलोकनेनावगन्तुं शक्यते । अभिप्रायस्त्वयं यत् प्रथमतस्तु दिव्यदृष्टिप्रदानरूपमेवैश्वर्यं प्रादर्शि भगवता कृष्णेन, तदनन्तरं यत् प्रदर्शितं तद्दर्शनेन महापराक्रमो गाण्डीवी रणकुशलोऽर्जुनोऽपि सहसोक्तवान् यत् 'अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे' इत्यादि (गी० 11.45)। अन्तत उपसंहरंस्तद्विश्वरूपम् 'आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा' (गी० 11.50) उपर्युक्तविश्वरूपदर्शनवर्णनस्यायमाशयो यत् अर्जुनस्य हृदि विश्वासमुत्पादयितुम् 'अहमादिश्च मध्यं च भूतानामन्त एव च' इति द्रढयितुं चादृष्टाश्रुतपूर्वस्य सकलाश्चर्यसमन्वितस्य विश्वरूपस्य क्षणादप्यल्पसमयेन सृष्टिं विधाय स्वस्य सृष्टेरादित्वम् उपादानाभिन्ननिमित्तकारणत्वं च समर्थितं । विश्वरूपेण च तद्रूपस्य कारणान्तराभावाद् ब्रह्माभिन्नत्वं, स्थितिकारणत्वरूपमध्यत्वञ्चात्मनः प्रतिपादितम् ।

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥
(गी० 11.49)

इत्युपसंहारवेलायां 'स्वकं रूपं दर्शयामास भूयः' (गी० 11.50) इत्यनेन तद्रूपस्य लयोऽपि स्वस्मिन्नेव कृतः । अत एतत् सम्यक् समर्थितं यत् अहमादिश्चेत्यादि मे वचः सर्वथा सत्यं विश्वसनीयमसम्भवविपर्यादिरहितमिति । आयातमेतेन 'जन्माद्यस्य यतः' (ब्र० सू० 1.2) इत्यस्य प्रामाण्यं गीतोक्तदिशाऽपि । त्रयोदशाध्यायेऽपि—

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ (गी० 13-12)

अत्रेदमाकूतं यद् 'ब्रह्म सद्' इति तु तदेव वक्तुं शक्यते, यदा ब्रह्मणोऽतिरिक्तं किमपि वस्त्वन्तरं भवेत् । तदा तदसद्वस्त्वन्तरमेवापेक्ष्य सदिति वक्तुमुचितं भवति । एवञ्चासदित्यपि वस्त्वन्तरापेक्ष्यमेव । यदा तु सर्वं ब्रह्मैवैकमेवाद्वितीयम् तदा न तद् ब्रह्म सदसच्छब्दवाच्यं कथञ्चिदपि भवितुमर्हति । तदसच्छब्दावाच्यं ब्रह्म अनादि नित्यं च कार्यत्वाभावात् । अतोऽन्तरहितमपि, 'अनादिभावपदार्थस्यानन्तत्वमिति नियमात्' । न च तस्य भावरूपतैव नाङ्गीक्रियतामिति शङ्कामपनेतुं—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ (गी० 13.13)

इति तस्य विश्वरूपता प्रतिपादिता । वस्तुतः सर्वविरुद्धधर्माश्रयस्य सर्वाश्चर्यसमन्वितस्य ब्रह्मण इदन्तया, इयत्तया वा वस्तुपरिच्छेदः अनाद्यनन्तत्वात् कालादिपरिच्छेदश्च सर्वथाऽसम्भव एवेति ब्रह्मणो याथात्म्यमेव प्रदर्शितं भगवता 'अनादिमत परं ब्रह्म न सत्तन्नासदुच्यते' इति वाक्येन । 'सर्वं खल्विदं ब्रह्म', 'एकमेवाद्वितीयम्' इत्यनेनैव प्रकारेण तन्निर्देशो यथाकथञ्चित् भवितुमर्हति नान्यथेति । यथा कस्यचित् घटस्यार्धभागो नीलरागरञ्जितोऽस्ति, अर्धभागश्च पीतरागेण । स घटो नीलपदेनापि व्यपदेष्टुं न शक्यते तत्र पीतस्यापि सत्त्वात् । एवं पीतशब्देनापि । तत्र नीलरूपस्यापि सत्त्वात् सत्यप्येवं विरोधे स घटो नीलोऽप्यस्ति, पीतोऽप्यस्तीत्युभयमपि वक्तुं शक्यते । एवमेव ब्रह्मणः सर्वरूपत्वात् विशिष्यैकरूपेण व्यवहारो नैव भवितुमर्हति सर्वरूपस्य यत्र सत्वात् सर्वरूपेण व्यवहारस्तु सुवच एव । भावार्थस्त्वयं यत् भगवता श्रीकृष्णेन यस्य ज्ञेयस्यविसये 'यज्ज्ञात्वाऽमृतमश्नुते' इत्ययुक्तं, तद्विशिष्य सदसच्छब्दाभ्यामवाच्यमपि सर्वं सदसदात्मकं तदेव । न ततो भिन्नमिति ज्ञेयस्य ज्ञेयता । अनेन प्रकारेण गीतया सुविस्पष्टमेवैतद् गीतं यत् समस्तोऽप्ययं दृष्टः श्रुतश्च सकल प्रपञ्चः एव जगदुदयविभवलयलीलस्य ब्रह्मणः । इयमेव प्रपञ्चस्य प्रपञ्चपदवाच्यता । यथा कस्तूरिका मृगः स्वशरीरान्तः स्थितांकस्तूरिकामविज्ञाय मृगयतेतामितस्ततो धावन् क्वचिदन्यत्र बहिः । एवमेवाज्ञानावृतचेतस्त्वाञ्जनाः स्वशरीरान्तःस्थित नित्यशुद्धबुद्धमुक्तस्वभावप्रत्यगभिन्नमात्मानमविज्ञायैव त्रिविधविविधसन्तापसन्तापिता आनन्दाम्बुराशिरूपं ब्रह्मात्मैक्यज्ञानजन्यनिरतिशयसुखमपहाय हाहेति विषीदन्तो बाह्यविषयेषु सिकतासु तैलमिव तत्सुखमनवाप्य विफलाः सन्तः पीडयन्तेऽसह्यपीडयेति महत् कष्टम् । गीता स्वाभिमतं ब्रह्मस्वरूपमेवमुपवर्णयति, यथा हि—

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥

बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ।।
(गी० 13.15-18)

उपर्युक्तश्लोकत्वचतुष्टयेन ब्रह्मणः स्वरूपं सर्वथाऽनावृतमिव भवति, अर्थात्, तस्य ब्रह्मणो व्यापकत्वात् भूतानां देहाद्बहिरन्तश्च सर्वत्रैव सत्ता वर्तते । एवञ्च चरमचरं सर्वं जगदपि तद् ब्रह्मैव । सर्वत्र विद्यमानमपितद्ब्रह्म सूक्ष्मत्वाद-विज्ञेयं तथा दूरेऽन्तिके च सर्वत्रैव तिष्ठति । तद् ब्रह्मैव सृष्टिसमये प्रभविष्णु-स्थितिकाले भूतभर्तृ, प्रलयवेलायान्तु ग्रसिष्णुरूपेण सृष्टिस्थितिसंहारं सर्वं सम्पादयति ।

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ।।
(गी० 13.28)

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ।।
यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ।।
यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ।।
(गी० 13.32-34)

ब्रह्मणो दुर्ज्ञेयत्वात् भगवतः मुहुर्मुहुः प्रकरणं समुत्थाप्य तत्स्वरूपं पार्थाय प्रतिबोधितम् ।

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ।।
(गी० 15.12)

तमेवभान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति'
(मु० 2.2.10)

न तद्भासयते सूर्यो न शशाङ्को न पावकः । (गी० 15.6)

'न तत्र सूर्योभाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः'
(मु० 2.1.1)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति श्रुत्यर्थकोऽयंश्लोको ब्रह्मणः स्वयंप्रकाशत्वं जगत्प्रकाशत्वञ्चाभिधत्ते ।

ममैवांशो जीवलोके जीवभूतः सनातनः (गी० 15.7)

इत्यनेन श्लोकेन तु सर्वथा परमविस्पष्टरूपेण भगवता श्रीकृष्णेन जीवानामात्मांशत्वं स्वीकृतम् । अंशांशिनोरभेदाच्च 'जीवो ब्रह्मैव नापरः' इति सुसिद्धमेव । एवञ्च सर्वस्य प्रपञ्चस्य सर्वेषाञ्च जीवानां ब्रह्मात्मकत्वे ब्रह्माभिन्नत्वे सिद्धे मायिकत्वेन मिथ्यात्वप्रतिपादनं चिदद्वैशिष्ट्यप्रतिपादनं वा कियद् युक्तिसङ्गतमस्तीति विद्वद्भिः स्वयं विभावनीयम् । ब्रह्मणा मायाख्यया स्वाभिन्नया स्वशक्त्या भवतु नाम सकलप्रपञ्चस्य निर्माणम् एतावता न प्रपञ्चस्य मिथ्यात्वं वक्तुं शक्यते । मायिकपदार्थानामपि कल्पवृक्षचिन्तामणिकामधेन्वादेर्जातानाम् अमायिकपदार्थान्तरवच्चिरस्थायित्वं व्यवहारोपयोगित्वञ्च तुल्यमेव दृश्यते । अन्यथा' यः पृथिवीभरवारणाय दिविजैः सम्प्रार्थितश्चिन्मयः सञ्जातः पृथिवीतले रविकुले मायामनुष्योऽव्ययः । निश्चक्रं हतराक्षसः पुनरगाद् ब्रह्मत्वमाद्यं स्थिरां कीर्तिपापहरां विधाय जगतां तं जानकीशं भजे' ।।(अ०1.1.1) इति माया मनुष्यस्य मर्यादापुरुषोत्तमस्य भगवतः श्रीमद्रामचन्द्रस्यापि शिवचतुराननादेरपि प्रपञ्चान्तर्वर्तित्वान्मिथ्यात्वं प्रसज्जेत, तत्तु सर्वथाऽनुचितमिवाभाति । एतदपेक्षया सर्वस्य ब्रह्मरूपतैव किन्न स्वीक्रियेत । एकस्मिन्नेव पिण्डे यथाऽस्थिमांसरुधिरादिकं लोभनखादिकञ्च परस्परभिन्नान्यनेकविधानि वस्तून्येकस्यैव शरीरस्याङ्गभूतानि भवन्ति । एवमेव विविधप्रकारेण प्रपञ्चरूपेण ब्रह्मणो विलास एव सकलप्रपञ्च इत्येव मन्तव्यम् । चिदचिद्वैशिष्ट्यस्यापीयमेव दशा । चिदचित्सर्वं ब्रह्मैव चेत्, तदातद्वैशिष्ट्यकथनेन मूले सत्तात्रयस्वीकारादद्वितीयत्वहानिप्रसङ्गोऽद्वैतसिद्धान्तभङ्गापत्तिश्चेति । अतः केनाप्यद्वैतवादिना 'सर्वं खल्विदं ब्रह्म' इत्येतत्सिद्धान्तस्यापलापो न कथमपि कर्तव्य इति । अप्रासङ्गिकं यथा न भवेदिति गीतोक्तदिशैव ब्रह्मविवेचनमस्मिन् प्रकरणे विधेयमिति प्रमाणान्तरं प्रस्थानान्तरीयं प्रायः परित्यज्य पुनरपि गीतैव समाश्रीयते ।

ब्रह्मविषयिण्युपनिषदां दृष्टिः

पूर्वमेव यथोक्तं यत् ब्रह्मणो विचारः प्रायः प्रस्थानत्रय्या (उपनिषद्भिर्ब्रह्मसूत्रेण श्रीमद्भगवद्गीतया) विधीयते तथापि तन्मूलका अनेकेऽन्येऽपिग्रन्था एवं विधाः सन्ति, येषां प्रामाण्यं सर्वैरपि विद्वद्भिरैकमत्येन स्वीक्रियत एव । तत्र प्रस्थानत्रय्यामपि वेदानामपौरुषेयत्वेनानादित्वेन ब्रह्मनिःश्वासभूतत्वेन च यथाप्रामाण्यं, न तथान्येषामिति वेदशिरोभूतानां वेदान्तपदवाच्यानामुपनिषदां

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दृष्ट्या ब्रह्मस्वरूपावधारणं सर्वतः प्राक् परमावश्यकं प्रतीयते। अत्र विषये प्रत्येकोपनिषदां सम्मतिः तत्रोपवर्णितैर्मन्त्रैः, सविस्तरं मन्त्रार्थोपवर्णनपूर्वकमेव प्रदर्शनीया, यतो हि सर्वैरपि सम्प्रदायप्रवर्तकाचार्यैः स्व स्वसिद्धान्तस्य वेदमूलकत्वेन परमतापेक्षया श्रेष्ठत्वमुद्घोष्यते। तत्र मन्त्रार्थस्वारस्येन ब्रह्मविषयकं यादृशं ज्ञानं समुत्पद्येत, तादृशमेव ब्रह्मस्वरूपमवधारणीयमिति कृत्वा प्रथममीशावास्यान्तर्गत-ब्रह्मस्वरूपावबोधकमन्त्राणामर्थो व्याख्यायते प्रकाश्यते च तेषामाशयः। तथा हि—

ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मागृधः कस्य स्विद्धनम्॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥ (ईशा० 1,2)

उपर्युक्तयोर्द्वयोर्मन्त्रयोरर्थः श्रीशङ्कराचार्यादिभिराचार्यैः स्वस्व मतपोषणाय विभिन्नप्रकारेण प्रतिपादितः। तत्तन्मतावलम्बिनश्च स एवार्थः स्वमतपोषकः सर्वथा शुद्धः सयुक्तिकश्चेति मन्यन्ते। किन्तु शब्दस्वारस्येन योऽर्थः प्रतीयेत स एवार्थो ग्राह्यो, विद्वद्भिः। न तु 'शब्दाः कामधेनवः' 'सर्वे सर्वार्थवाचका' इति न्यायमाश्रित्य यथेच्छं यत्किञ्चित् प्रतिपादनीयम्। यथा श्रीशङ्कराचार्येण 'कप्यासशब्दस्यार्थः प्रत्यपादि। यथा च 'सैन्धवमानीयतामित्यत्र तात्पर्यादिमनालोच्य यात्रावसरे लवणस्य, भोजनावसरे चाश्वस्यानयमिति। सैन्धवशब्दस्योभयार्थत्वेऽपि प्रकरण-विरोधाभावाय भोजनावसरे लवण एवार्थो भविष्यति, न तु घोटकः सत्यप्यश्वाभि-धायकत्वे सैन्धवशब्दस्य। अतो मामपि योऽर्थो मन्त्राक्षरैः स्फुटं प्रतिभाति, स एव मया लिख्यते। भवतुनाम सोऽर्थः सर्वाचार्यकृतार्थविलक्षणः सर्वथाऽशुद्धश्च, किन्त्वात्महननापेक्षया तमहं वरं मन्ये। 'मनस्यन्यद् वचस्यन्यद्' इति तु कस्यापि लेखकस्य कृते निन्द्यमेव भवति। अस्तु, मन्त्रार्थो भावार्थश्चाधोलिख्यते—

मन्त्रार्थः—जगत्यां भूमण्डले यत्किञ्च विद्यते, तत् सर्वं जगत्। गच्छतीति जगत् इति व्युत्पत्या विपरिणमनशीलं, विनाशि वा प्रोच्यते लौकिकैर्जनसाधारणै-स्तत् सर्वमपीशा परमेश्वरेण ब्रह्मणाऽऽवास्यमाच्छादनीयम्। आच्छादयितुं योग्यम् नत्वतस्मिंस्तद्बुद्धिरूपारोपोऽत्र विधीयते। यथा नाटकादौ देवदत्ते भीमदुर्योधना-दिबुद्धिः। प्रत्युत 'सर्वं खल्विदं ब्रह्म' (छा० 3.14.1), 'आत्मैवेदं सर्वम्', 'स हेतावानास' (वृ० 1.4.3), 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्' (छा० 6.2.1), 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (क० 1.2.10) इत्यादिश्रुतिभ्योऽनन्तब्रह्माण्डनिकायस्य प्रपञ्चस्य ब्रह्मात्मकत्वप्रतिपादनात्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यतो हि सर्वं जगद् ईशात्मकम् अतस्त्यागेनेश्वरार्पणबुद्ध्या, लब्धोपभोगसामग्रीणां दीनादिभ्यो वितरणादवशिष्टेन त्यक्तेन भुञ्जीथा उपभोगं सम्पादय, मागृधोऽधिकंमाकाङ्क्षीः। न च स्वोपार्जितस्य धनस्योपयोगम् आत्मार्थमकृत्वैव कथमन्योपभोगावशिष्टेन वर्तितव्यमिति चेन्न, 'कस्यस्विद्धनम् न कस्यापीत्यर्थः। स्वोपार्जितमपि धनं न केवलं स्वस्यैव भवति, अपितु त्वन्येषामपि पात्रभूतानामिति तात्पर्यम्। तथा हि—

यावद्भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम्।
ततोऽधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति॥

एवमीश्वरार्पणबुद्ध्या 'यद् तत् कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्' इति बुद्ध्या च शतं समाः यावज्जीवं कर्माणि शास्त्रविहितानि कुर्वन् सम्पादयन्नेव जिजीविषेत् जीवितुमिच्छेत्। एवं त्वयि नरे कर्म न लिप्यते कर्मफलैः सुखदुःखप्रदैस्तव संसर्गो न भविष्यति। इतोऽन्यथा, ईश्वरार्पणबुद्धेर्भिन्नः प्रकारो नास्ति येन कर्म न लिप्येदिति मन्त्रार्थसंक्षेपः। भावार्थस्त्वयं यत् नास्ति कोप्येयंविधो जनो यः क्षणमप्यकर्मकृत् स्यातु शक्नुयात्, यथोक्तं—

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥ (गी० 3 5)

एवञ्चेत् स्वरूपतः कर्मणां परित्यागो न केवलं दुष्करः; अपित्वसम्भव अतस्तत्तकर्मणां फलभोगित्वमपि तत्तत्कर्मकर्तृणामनिवार्यमेव। 'नाभुक्तं क्षीयते कर्म जन्मकोटिशतैरपि'। अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' इत्यादिवाक्यप्रामाण्यात्। कर्मफलभोगार्थञ्च पुनः शरीरादिकं नियमेनापेक्ष्यत इत्यत्रापि नास्ति कश्चित् सन्देहः। फलतः कर्मजन्मपरम्पराया अविच्छेदात् संसृतेर्निवृत्तिरप्यसम्भवैव। अतो दुरुपपादो मोक्ष इति। उक्तञ्च पञ्चदश्यां विद्यारण्येन स्वामिना—

'कुर्वते कर्म भोगाय कर्म कर्तुं च भुञ्जते।
नद्यां कीटा इवावर्तादावर्तान्तरमाशुते।
व्रजन्तो जन्मनो जन्म लभन्ते नैव निर्वृतिम्॥ (पं० 1.30)

एतादृशे व्यतिकरे समुपस्थिते भगवतीश्रुतिः प्रशस्तं मार्गं मुक्तिसाधकं समुपदिशति। ईशावास्यमिति। ईश्वराराधनबुद्ध्या कृतानि कर्माणि दग्धबीजवन्न कर्मफलदातॄणि भवन्ति।

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥ (गी० 4.37)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आयातमेतदनेन यत् 'सम्पूर्णोऽयं प्रपञ्चो ब्रह्मैवे' ति। यथार्थज्ञाने समुत्पन्ने स्वात्मनोऽपि प्रत्यगभिन्नब्रह्मात्मैक्यावबोधात् फलाभिसन्धिराहित्येन कर्मलेपाभावो जन्ममरणपरम्पराया विश्रान्तिश्च भवति। यद्यपि 'सर्वं खल्विदं ब्रह्मे'त्य परोक्षं यथार्थज्ञानं सम्पादनीयं तथापि यस्येशितुर्ब्रह्मणोऽपरोक्षं यथार्थज्ञानं सम्पादनीयं तत् कीदृशमिति जिज्ञासायामग्रिमा श्रुतिः स्वयं प्रतिपादयति।

अनेजदेकं मनसोजवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत्।
तद्धावतोऽन्यानत्येति तिष्ठत् तस्मिन्नपो मातरिश्वा दधाति॥

तदेजति तन्नेजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः॥ (ई० 4.5)

मन्त्रार्थः—तदात्मतत्त्वं ब्रह्मपदवाच्यमनेजत्, पर्वतवदकम्प्यं, सर्वविक्रियारहितमेकरसमेकरूपमिति यावत्। एवञ्चैकमेव सर्वत्र चराचरेषु व्याप्तम् अतएव सर्वेषां गतिमतां श्रेष्ठान्मनसोऽपि जवीयो जववत्तरम्। सर्वदा सर्वत्र विद्यमानत्वात् तद्धावतोऽन्यान् तिष्ठत् सदेवात्येति अतिक्रम्य वर्तते व्यापकत्वात्। तस्मिन् सत्येवात्मतत्त्वे मातरिश्वा वायुरपो दधाति। अर्थात् सम्पूर्णोयं प्रपञ्चस्तस्मिन्नात्मतत्त्वे सत्येव गतिशीलतां भजते। न चैवं तस्य गतिराहित्ये तस्यासत्त्वं जडत्वं वा स्यादिति शङ्कामपनयति श्रुतिस्तदेजतीति। तदेजति अर्थात् औपाधिकरूपेण सक्रियमपि निरुपाधिकरूपेण पारमार्थकेन तन्नेजति निष्क्रियमेव। यतो हि सर्वं चराचरं जगत् ब्रह्मैव, न ततो भिन्नं किमप्यन्यदस्तीति हेतोस्तदेव ब्रह्मचररूपेणैजति, अचररूपेण च तन्नैजति न चरति। पारमार्थिकरूपेण तु चराचरत्वस्य ब्रह्मस्वभावान्तःपातित्वान्न किञ्चिदसमञ्जसम्। एवञ्च तद् ब्रह्म दूरे, तदेवान्तिके च तदेवान्तस्तदैव बाह्यतोऽपि यथाकाशः। एतदेव व्यापकस्य वस्तुनो व्यापकत्वं यत् तत् सर्वत्र सर्वदा च तिष्ठन्नतु कदापि कुत्रचिदपि तस्यासत्त्वं स्यात्। प्रायः एतत्समानार्थकः शिवमहिम्नस्तोत्र एषश्लोको विद्यते—

नमो नेदिष्ठाय प्रियदेव दविष्ठाय च नमो,
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः।

नमो वर्षिष्ठाय त्रिनयनयविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमिति सर्वाय च नमः॥

(महिम्न० 29)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्लोकार्थः—श्लोकोऽयं ब्रह्मणो यथार्थरूपतामनिर्वचनीयतां सर्वरूपतां चातीव वैदग्ध्यपूर्णया शैल्या स्वल्पैरेवाक्षरैः प्रतिपाद्य रचयितुर्वाग्वश्यतामपि व्यनक्ति। भावार्थस्त्वयं यत् स ईशः परब्रह्मपरमात्मा प्रत्यगात्मत्वान् नेदिष्ठोऽतिशयेनान्तिकस्थोऽस्ति। अतिसूक्ष्मत्वात् अज्ञेयत्वाच्च दविष्ठोऽत्यन्तदूरवर्ती चास्ति। 'दूरस्थञ्चान्तिके च तत् इति गीताऽपि (गी० 13.15)। तथा स क्षोदिष्ठोऽतिशयेनाणुर्मंहिष्ठोऽतिशयेन महानपि स एवास्ति 'अणोरणीयान्महतो महीयान्'(क० 1.2.20)। स चिरन्तनोऽपि नित्यनूतन एव 'कविं पुराणम्' (गी० 8.9) इत्थं सर्वस्मै सर्वस्वरूपाय, सर्वानतिक्रम्य वर्तिन' मुहुर्मुहुर्नमः। निःशेषरूपेणानिर्वचनीयाय नमस्कारातिरिक्तं किमु वक्तव्यम्। अतः सुसिद्धमेतत् यत् समस्तोऽतं प्रपञ्चो ब्रह्मात्मक एव 'यत्साक्षादपरोक्षाद् ब्रह्म (बृ० 3.4.1) ब्रह्मणो न केवलं प्रपञ्चात्मकत्वमेवअपितु 'अत्यतिष्ठद्दशाङ्गुलम्'। वितस्मिधितिष्ठतीति वाङ्मनसागोचरत्वमपिभणितम्।

बहिरन्तश्च भूतानामचरं चरमेव च।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत्॥ (गी० 13.15)

श्लोकेनानेन तस्य ब्राह्मणश्चराचरात्मकत्वं स्पष्टमेवाभिहितम्। एवञ्च भूतानां बहिर्वर्त्तित्वमन्तर्वर्तित्वञ्चोक्त्वा तस्य व्यापकत्वमपि प्रतिपादितम्।

अविभक्तं च भूतेषु विभक्तमिव च स्थितम्।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च॥

यद्यपि तद् ब्रह्म भूतेषु ब्रह्मादिस्थावरान्तेषु विभक्तमिव प्रतिदेहं भिन्नमिव प्रतीयते। तथापि न वस्तुतस्तथा, अपि त्वविभक्तमेव। यथा घटाकाशमठाकाशविति नामभेदेन निर्दिश्यमानावप्याकाशभागो न वस्तुतो महाकाशाद्भिद्येते, नैव च तस्य महाकाशस्य विकारावयवौ भवतः तथैव सर्वे जीवाः प्रति देहं विभिन्ना इति प्रतीयमाना अपि वस्तुतो नैव भिद्यन्ते परमात्मनः। तदेव च ब्रह्म परमात्मा नारायणः सृष्टिकाले प्रभविष्णुत्वेन, स्थितिकाले भूतभर्तृत्वेन, लीलासंवरणकाले च ग्रसिष्णुत्वेन च निगद्यते। अतः उपनिषदा यदुक्तं—'तदेजति तन्नैजदित्यादि' तत् सर्वथा युक्त्या प्रमाणान्तरेण च सिद्धमेव। अचिन्त्यैश्वर्ये तस्मिन् सर्वविरुद्धधर्माश्रयभूते किं नाम दुर्घटमिति विभावयन्तु सुधियः।

तद् ब्रह्म यद्यपि सर्वत्र सर्वदा समानमेव वर्तते तथापि तस्य दुर्ज्ञेयता सर्वेषां प्राणिनामाब्रह्मस्तम्बपर्यन्तानां कृते तदवस्थैवाक्षुण्णा वरीवर्ति। उक्तमपि शिवमहिम्नस्तवे—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चर्हरिरधः,
परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः ।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्,
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥
—(महिम्न० 10)

एवञ्चेच्छिवस्वरूपस्य तस्य ब्रह्मण ऐश्वर्यपरिच्छेदे हरिचतुराननावप्यक्षमौ। तदान्येषां प्राणिनान्तु वार्तैव का। तस्योपलब्धिस्तु तत् कृपयैव कस्यचिदनेकजन्मार्जितपुण्यपुञ्जस्यैव भवितुमर्हति। तत्रापि यमयमात्मानुगृह्णाति। अनेकजन्मार्जितानि पुण्यान्यपि तदनुग्रहैकलभ्यान्येव, न तु पुरुषप्रयत्नसाध्यानीत्यपि प्रतिपादितमुपनिषदा। तथा हि—

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैषवृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूंस्वाम् ॥
(क० 1.2..23)

'स एव साधुकर्मकारयति तं यम् एभ्यो लोकेभ्य उन्निनीषति' अतस्तद् ब्रह्मणः प्रसादोपलब्धये प्रयतितव्यम्,

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद् विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ —(गी० 1,20)

अतो भगवतः आश्रयणमेव तदुपलब्धेः प्रधानसाधनमिति निर्विवादमेव। अन्यथा तदाश्रयणमन्तरा 'नाहं प्रकाशः सर्वस्य योगमायासमावृतः' (गी० 7.25)। नचिकेतसं प्रति यमेनापि तस्यात्मनो दुर्ज्ञेयता तदुपलब्धिसाधनञ्चाप्यभिहितम्, यथा—

तं दुर्दर्शगूढमनुप्रविष्टं, गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं मत्वाधीरो हर्षशोकौ जहाति ॥
(क० 1.2.12)

अनेनैतत् स्पष्टमेव विज्ञायते यत् तस्यात्मनः परिज्ञानं नातिसरलम्, अपितु महताऽभ्यासेन सम्पादितेनाध्यात्मयोगाधिगमेनैव (विषयेभ्यः प्रतिसंहृत्य, चेतसः आत्मनि स्थापनरूपयोगेनैव) यथा कथञ्चित् चिरकालेन भवितुमर्हति। तस्यात्मन आलम्बनत्वेन ओमितिपदस्यापि निर्देशो भगवता यमेन कृतः। तथा हि—

सर्वे वेदा यत् पदमामनन्ति, तपांसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति, तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥
(क० 1.2.15)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पातञ्जलयोगसूत्रेऽपीश्वरप्रणिधानात् समाधिरुक्तः। ईश्वरस्वरूपमपि तत्रैव योगसूत्रे 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' इति प्रतिपादितम्। तस्य वाचकत्वेन च ओमिति पदमुक्तम्। उपनिषदापि ओमिति पदस्य ब्रह्मप्राप्तिसर्वसाधनानां श्रेष्ठत्वं स्वीकृतम्। यथा हि—

एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते॥ (क० 1.2.17)
तज्जपस्तदर्थभावनम्— (यो० 1.28)

इति योगसूत्रेणापि प्रणवस्य जपस्तदर्थस्य ईश्वरस्य चिन्तनञ्च प्रत्यक् चेतनाधिगमायान्तरायाभावार्थं च विहितम्।

ततः प्रत्यक् चेतनाधिगमोऽप्यन्तरायाभावश्च। (यो० 1.29)

केनोपनिषदाऽपि ब्रह्मणो दुर्ज्ञेयत्वमभ्यधायि तथा हि—

न तत्र चक्षुर्गच्छति, न वाग् गच्छति, नो मनो,
न विद्मो न विजानीमो, यथैतदनु शिष्यादन्यदेव
तद्विदितादथो अविदितादधि
इति शुश्रुम पूर्वेषां येनस्तद्व्याचचक्षिरे
यद्वाचानभ्युदितं येन वागभ्युद्यते
तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते।
यन्मनसा न मनुते येनाहुर्मनो मतम्,
तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते। (के० 1.3-5)

यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति।
तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते॥
यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम्।
तदैव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते॥
यत् प्राणेन न प्राणिति येन प्राणः प्रणीयते।
तदैव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते॥ (के० 1.6-8)

इत्यादिभिर्मन्त्रैर्ब्रह्मण इन्द्रियावेद्यत्वं, मन इन्द्रियादीनां प्रवर्तकत्वञ्चाभिहितम्। कठोक्तदिशाऽऽत्मस्वरूपं यत् प्रतिपादितं तदधोनिर्दिश्यते—

न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥
(क० 1.2.18)

अणोरणीयान् महतो महीयानात्मास्यजन्तोर्निहितो गुहायाम्।
तमक्रतुः पश्यति वीतशोको धातुःप्रसादान्महिमानमात्मनः॥
(क० 1.2.20)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आसीनो दूरं व्रजति शयानो याति सर्वतः ।
कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति ।।

(क० 1.2.21)

अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ।

एवमुपर्युक्तप्रकारेणात्मनो दुर्ज्ञेयतां तत्स्वरूपञ्च प्रतिपाद्य तदुपलब्धिरपि तत्कृपैकसाध्येति निर्दिशति—'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ।।

(क० 1.2.23)

एवं सति कस्मैचित् स्वस्वरूपोद्घाटनं, कस्मैचित् स्वस्वरूपतिरोधानञ्च ब्रह्मणि वैषम्यरूपदोषं व्यनक्तीति चेन्न—

नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ।।(क० 1.2.24)

एतादृशेन पुरुषेण तद्ब्रह्म कदापि नैव लब्धुं शक्यते । यस्तु विगतदुश्चरित्रः संयतेन्द्रियः समाहितचित्तश्च भवति, तस्यैवायमात्मा स्वां तनूं विवृणुते । यथा सर्वेषां समोऽपि बह्निः समीपवर्तिने जनायौष्ण्यं ददाति, न तु दूरवर्तिने । एवं ब्रह्मणि न मनागपि वैषम्यदोषो वक्तुं शक्यते । अतो ब्रह्मस्वरूपोपलब्धये सर्वतः प्राक् साधनचतुष्टयसम्पन्नतायाः सम्पादनं परमावश्यकं प्रतिभाति । तद्विना तु ब्रह्मावबोधो नितान्तमसम्भवोऽस्ति । यथा च कश्चिद् गन्ता सुदूरवर्ति स्वगन्तव्यस्थानं रथादियानमारुह्याध्वनः परं पारं संयाति, प्राप्य च स्वाभीष्टस्थलं भृशं प्रसीदतिएवमेवायं जीवात्मापि मानुष्यं समवाप्य प्रयतमानः सन् संसृतिरूपिणमध्वानमतीत्य निरतिशयसुखस्वरूपं मोक्षं समवाप्यानिर्वचनीयं ब्रह्मानन्दमनुभवति । किन्तु रथादौ तत्सन्नद्धाश्वादौ च सदोषे सति स्वगन्तव्यस्थलस्यावाप्तिस्तु तावद्दूर आस्ताम् मध्येमार्गमेव भयङ्करगर्त्तादौ विनिपातोऽपि भवत्येव । एवमेव इन्द्रियमनोबुद्ध्यादिषु बाह्यविषयप्रसक्तेषु सत्सु ब्रह्मानन्दोपलब्धेस्तु का कथा काकश्वसूकरादितिर्यग् योनिषु जनिर्निरयादिप्राप्तिश्चापि दुर्निवारा । परमकारुणिकश्रुतिभिः 'भयङ्करविनिपातो मा भूद् भूयाच्चाक्षय्यसुखोपलब्धिर्जीवानामिति धिया रथादिरूपकं समुपन्यस्योपदिश्यते । तथा हि—

आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च ।।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥ (क० 1.3.3, 4)

इति रूपकमुपन्यस्य गुणदोषविवेचनञ्चापि स्पष्टमेव प्रतिपादितं यथा हि—

यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा ।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥

यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा ।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥

यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽशुचिः ।
न स तत्पदमाप्नोति संसारञ्चाधिगच्छति ॥

यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः ।
स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥

विज्ञानसारथिर्यस्तु मनः प्रग्रहवान् नरः ।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥(क० 1.3.5-9)

एतस्य सर्वस्यायं भावो यत् सर्वैरपि मुमुक्षुभिः सर्वप्रकारैरेवंविधप्रयत्नपरायणैर्भवितव्यं यथा बुद्धौ नित्यानित्यविवेकशक्तिर्मनसि महावाक्यादिश्रवणजन्यज्ञानस्य युक्त्यादिभिः सम्भावितत्वरूपमननशक्तिर्विषयेभ्यः पराङ्मुखता संयतेन्द्रियत्वञ्च सञ्जायेत तथा यतनीयम् । एवं सति तस्य विष्णोः व्यापकस्य ब्रह्मणः पदं स्थानं प्राप्तुं शक्यते, अन्यथा 'संसारं चाधिगच्छति' (क० 1.3.7) जन्ममरणपरम्पराप्रवाहावरोधो दुःसम्पाद्य इति । यावच्च जन्मपरम्परा न निवर्तेतस्तावन्निवृत्तेरप्याशा दुराशैव । अनेन प्रकारेण ब्रह्मोपलब्धिसाधनमभिधाय श्रुतिः पुनरपि ब्रह्मणः स्वरूपविषयेऽभिधत्ते—'एष सर्वेषु भूतेषु गूढोत्मान प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' (क० 1.3.12) । यद्यपि मन्त्रेऽस्मिन् 'न प्रकाशत इति तस्य ब्रह्मणोऽज्ञेयता प्रतिपाद्यते, तथापि, 'दृश्यते त्वग्रचा बुद्धया' इति कथनेन सर्वसाधारणेभ्यो जनेभ्योऽज्ञेयता, सूक्ष्मदर्शिभ्यश्च ज्ञानविषयतेत्युभयमपि न विरुध्यते । यस्य ब्रह्मणः स्वरूपस्य परिज्ञानं प्रकर्तव्यमस्ति, तद्ब्रह्म किं स्वरूपमस्तीत्यपि तत्रैव स्फुटमभिहितम् ।

अशब्दमस्पर्शमरूपमव्ययं, तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं, निचाय्य तन्मृत्युमुखात् प्रमुच्यते ॥
(क० 1.3.15)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वप्नान्तं जागरितान्तं चोभौ येनाऽनुपश्यति ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ (क० 2.1.4)

य इमं मध्वदं वेद आत्मानं जीवमन्तिकात् ।
ईशानं भूतभव्यस्य ततो न विजुप्सत एतद्वै तद् ॥ (क० 2.1.5)

यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति ।
तं देवाः सर्वे अर्पितास्तदु नात्येति कश्चन ॥ एतद्वैतद् ॥
(क० 2.1.9)

यदेवेह तदमुत्र यदमुत्र तदन्विह ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥

मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते ॥एतद्वैतद्॥
(क० 2.1.10-12)

यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति ।
एवं मुनेर्विजानत आत्मा भवति गौतम ॥ (क० 2.1.15)

पुरमेकादशद्वारमजस्यावक्रचेतसः ।
अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते ॥ एतद्वैतद् ॥
(क० 2.2.1)

ब्रह्मणः सूक्ष्मातिसूक्ष्मत्वविषये, सर्वोत्कृष्टत्वविषये च श्रुतयः प्रमाणम् ।

इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम् ।
सत्त्वादधिमहानात्मा महतोऽव्यक्तमुत्तमम् ॥

अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च ।
यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति ॥ (क० 2.3.7-8)

अनेन प्रकारेण आत्मन इन्द्रियादिभ्यः परत्वं तस्यालिङ्गत्वञ्च प्रतिपाद्यैतादृशस्य सूक्ष्मातिसूक्ष्मस्याव्यक्तादपि परस्य व्यापकस्य ब्रह्मणो ज्ञानमशक्यमिति शङ्कामपनेतुं श्रुतिर्मार्गमुपदिशति—

न संदृशे तिष्ठति रूपमस्य, न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीषा मनसाभिक्लृप्तो, य एतद्विदुरमृतास्ते भवन्ति ॥
(क० .23.9)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनेकजन्मसंस्कारसंस्कृते सर्वथापगतकषाये शुद्धान्तःकरण एव तस्य प्रकाशः समुपजायते। यथा सूर्यप्रतिबिम्बं सर्वत्रैव समानरूपेण पतति, तथापि निर्मल उदकादावेव भासते, न तु सर्वत्र। एवमेव सर्वत्र निरन्तरं विद्यमानमपि ब्रह्म केवलेन शुद्धेन मनोबुद्धयादिनात्मनि तथा समस्ते प्रपञ्चेऽपि द्रष्टुं शक्यते, अन्यथा 'न चक्षुषा पश्यति कश्चनैव चक्षुरादीन्द्रियैरग्राह्यत्वात्।

उक्तञ्च—

नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा।
अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते॥ (क० 2.3.12)

तदेव ब्रह्म सर्वत्र जडेषु जीवेषु चराचरजगत्सु च विभिन्नरूपेण प्रतीयमानेष्वेकरूपेणाविकृतरूपेण च कूटस्थमेव विद्यते। यथाग्निर्दार्वादिष्वनेकाकारेष्वनेकाकार प्रतीयते। वस्तुतस्त्वग्निः स्वेनाविकृतरूपेण सर्वत्र समान एव, अनेकरूपत्वन्तूपाधिकृतमेव। तथा हि—

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च॥(क० 2.2.9)

एतादृशं सर्वभूतान्तरात्मानं परमेश्वरं ये स्वात्मनि स्थितं पश्यन्ति, त एवात्मयाथात्म्यविदः सुखिन आत्यन्तिकसुखभाजो भवन्ति तदप्युक्तं—

एको वशी सर्वभूतान्तरात्मा, एकं रूपं बहुधा यः करोति।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्॥
(क० 2 2.12)

अतः शाश्वतसुखाभिलाषुकैर्धैर्यमवलम्ब्य मुहुर्मुहुर्विनियतं चित्तं बाह्यविषयेभ्यः प्रतिसंहृत्य प्रत्यगभिन्नपरमात्मचिन्तन एव विनियोज्यम्। एतादृशो दृढोविश्वासश्चोत्पादनीयो यत्—'तमेवभान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' (क० 2.2.15) यथा शीतस्पर्शवत्यपि जलेऽग्निसंयोगाद्दाहकत्वमौष्ण्यं च यत् प्रतीयते तन्न जलस्य स्वीयो गुणो, अपितु वह्निसंयोगादेव जले प्रतीयते 'शैत्यं हि यत् सा प्रकृतिर्जलस्य'। एवमेव ब्रह्मणः सत्तामात्रेण सर्वमेतत्स्फुरति यथा भगवतो भास्करस्य सत्तामात्रेण सर्वाणि वस्तू निप्रकाशन्ते। न तत्र प्रकाशने सूर्यः किमपि यत्नादिकं करोति, तस्य सर्वं प्रकाशन स्वभावत्वात्। एवमेव ब्रह्मणः सत्तामात्रेण सर्वावभासकत्वस्वभावात् तानि तानि च सर्वाणि वस्तूनि प्रकाशमुपयान्ति। अतएवोक्तं—'तमेवभान्तमनु भाति सर्वं तस्य भासा सर्वमिदं विभाति'। यथा मरुमरीचिकायां जलत्वबुद्धिर्भ्रान्तिनिमित्तिका जायते, एवमेव ब्रह्मणि तद्भिन्नत्वेन या जगतः प्रतीतिः, सातु भ्रान्तिरेव। वस्तुतस्तु प्रतीयमानः सर्वोऽपि प्रपञ्चो न

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मणोभिन्नः, अपि तु ब्रह्मैव प्रपञ्चरूपेण प्रतिभासते यथा मरीचयो जलरूपेण। 'यदिदं किञ्च जगत् सर्वं, प्राण एजति निःसृतम्'(क० 2.3.2) एतस्यैव नियन्तुः प्रशासने द्यावापृथिव्यौ विधृते तिष्ठतः। 'द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः' (गी० 11.20)। एतस्यैव ब्रह्मणो नियन्त्रणे स्थितं सर्वं चराचरं जगन्नियमेन प्रवर्तते—

भयादस्याग्निस्तपति भयात्तपति सूर्यः।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः॥ (क० 2.3.3)

वस्तुतस्तु स्वयं ब्रह्मैव सूर्यवायुवह्न्यादिरूपेण विविधं भूत्वा ब्रह्माण्डे नियम्यनियामकभावमापद्य लीलायते। पुनश्च लीलावसाने स्वस्मिन्नेवोपसंहरतीति वेदान्तसिद्धान्तः। तथा हि—

यथोर्णनाभिः सृजते गृह्णते च, यथा पृथिव्यामोषधयः सम्भवन्ति।
यथा सतः पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह विश्वम्॥
(मु० 1.1.7)

अनेनैतत् सुस्पष्टं भवति यद् तथा लूता कीटविशेषः कारणान्तरमनपेक्ष्यैव स्वयं स्वशरीरात् तन्तून् बहिः प्रसार्य पुनश्च तान् संहृत्य स्वशरीर एव समावेशयति एवमेव ब्रह्मैव स्वेच्छया जगदाकारेणाविर्भूय विहृत्य च पुनर्निखिलं ब्रह्माण्डं स्वस्मिन्नेव समावेशयति। यथा च पृथिव्यामोषधयः स्वयमेव पृथिव्याः सकाशादुत्पद्यन्ते वर्धन्ते विनश्यन्ति च 'जाते सति विनाशे पुनः पार्थिवं रूपमेव दधति। पृथिव्या जाता अपि ता ओषधयः पृथिवीतो मिथश्च भिन्नाः प्रतीयन्ते। एवमेव एकस्मादेव ब्रह्मणो जाता अपि पदार्था मिथो भिन्नाः प्रतिभासन्ते। किन्तु ब्रह्मविद्भिर्ब्रह्मैव प्रतीयन्ते। साधारणजनानां प्रतीतिस्तु न वस्तुस्वरूपनियामिका भवति। अमुमेवोपर्युक्तार्थमग्रिमो मन्त्रो द्रढयति—

तदेतत्सत्यं यथा सुदीप्तात् पावकाद् विस्फुलिङ्गा सहस्रशः प्रभवन्ते सरूपाः।
तथाक्षराद्विविधाः सोम्यभावाः प्रजायन्ते तत्र चैवापियन्ति॥ (मु० 2.1.1)

भट्टोजिदीक्षितेनापि—'जनिकर्तुः प्रकृतिः' (पा० 1.4.30) इत्यत्र 'ब्रह्मणः प्रजाः प्रजायन्त' इत्युदाहृतम्। अत्र प्रकृतिशब्देन निमित्ताभिन्नोपादानकारणमेव गृह्यते, तत्तु ब्रह्मण्येव सम्भवत्यचेतनस्य प्रधानस्य निमित्तत्वाभावात्।

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी॥ (मु० 2.1.3)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यस्मिन्मन्त्रे 'एतस्मात' पदेन 'दिव्योह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः।

अप्राणोह्यमनाः शुभ्रो ह्यक्षरात् परतः परः ॥ (मु० 2.1.2)

इत्यक्षरात् परतः परः परमात्मैव गृह्यते पूर्वप्रक्रतत्वात् सान्निध्याच्च। अतो नास्त्यत्र सन्देहलेशोऽपि यन्निमित्ताभिन्नोपादानभूताज्जातः सकलोऽपि प्रपञ्चो ब्रह्मात्मक एव, कार्यकारणयोरभेदात्। अतः प्रपञ्चस्य मिथ्यात्वप्रतिपादनमसत्त्वञ्च न युक्तिसङ्गतं प्रतिभाति, न वा प्रामाणिकम्। माययाऽज्ञानवशाद् यो भेदः प्रतीयते स एव भेद आत्मयाथात्म्यज्ञानेनापाकरणीयः। एतदर्थन्तु—

परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥
(मु० 1.2.12)

इति सर्वेषामैहिकामुष्मिकलोकानां चतुर्विधप्रमाणैः प्रत्यक्षानुमानोपमानागमैरनित्यत्वमवधार्य निर्विण्णः सन् श्रोत्रियस्य ब्रह्मनिष्ठस्य गुरोः शरणमेव ग्राह्यं भवति। तादृशस्य गुरोः प्रसादाच्छ्रवणमनननिदिध्यासनानि विधायावाप्य च तां ब्रह्मविद्यां, यया ब्रह्मभावं प्रतिपद्य कृतार्थो भवति। ब्रह्मानन्दाम्बुधौ निमग्नः सन्ननुभवति चात्यन्तिकनिरतिशयसुखमिति मुमुक्षुभिर्निरन्तरं ब्रह्मज्ञानार्थं यतनीयमेव। नान्यथा दुःखपरम्पराणां विच्छित्तिः निरतिशयसुखस्योपलब्धिश्च कथमपि सम्भवति। अत्रेदमपि नाप्रासङ्गिकं भविष्यति, यदि श्रुतिप्रतिपादितब्रह्मप्राप्ति प्रकारो विस्पष्टीक्रियेत। अत उपनिषदुपवर्णितब्रह्मज्ञानप्रकारः संक्षेपेण प्रदर्श्यते।

तत्र द्वितीयमुण्डकोपनिषदि द्वितीयखण्डे 'आविः सन्निहितं गुहाचरं नाममहत्पदमत्रैतत्समर्पितम् एजत् प्राणन्निमिषच्च यदेतज्जानथ सदसद्वरेण्यं परं विज्ञानाद्यद् वरिष्ठं प्रजानाम्' (मु० 2.2.1) इति मन्त्रेण ब्रह्मस्वरूपं प्रतिपादितम्। तथा हि—यद्यपि तद्ब्रह्म सूक्ष्मादपि सूक्ष्मतरमस्ति तथापि शमादिसाधनविशिष्टानामैहिकामुष्मिकविषयसुखभोगविरक्तानां मुमुक्षूणां साधनचतुष्टयसम्पन्नानां तद्ब्रह्म सर्वथा आविः प्रत्यक्षं, सन्निहितं तथा गुहाचरं हृद्यधिष्ठितमेव प्रतीयते, अत्रैतत्समर्पितम् अत्रास्मिन् ब्रह्मण्येव एतत् सर्वं स्थूलसूक्ष्मम् एजत् प्राणन् निमिषत् पदार्थजातं रथनामावरा इव समर्पितमस्ति, तदेव वरिष्ठमस्तीति हेतोस्तदेव ब्रह्मवरेण्यं प्रार्थनीयं ज्ञेयमस्ति, न तु तद्ब्रह्मविज्ञानाल्लौकिकज्ञानाज्ज्ञातुं शक्यते अतो विज्ञानात् परमुच्यत इन्द्रियादिजन्यज्ञानाविषयत्वात्। अपरञ्च—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यदर्चिमद् यदणुभ्योऽणु च यस्मिंल्लोका निहिता लोकिनश्च ।
तदेतदक्षरं ब्रह्म स प्राणस्तदुवाङ् मनः । तदेतत्सत्यं तदमृतं तद्वेद्धव्यं
सोम्य विद्धि ॥ (मु० 2.2.2)

तद्ब्रह्मार्चिमज्ज्योतिःस्वरूपम्, सर्वेषां प्राणवाङ् मन आदीनामवभासकं हि यतः सर्वेऽपि प्राणादयश्चैतन्याश्रया एव तद्बिना तेषां निष्क्रियत्वदर्शनात् । तदेवाक्षरं चैतन्यं ब्रह्मेति वोद्धव्यम् । तद्ब्रह्मावगतौ किं विधेयं, कीदृशश्च प्रयत्नस्तत्र कर्तव्य इत्यपि तत्रैवोपवर्णितम् यथा—

धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं सन्धयीत ।
आयम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि ॥
(मु० 2.2.3)

येन प्रकारेण कस्यचिल्लक्ष्यस्य वेधने सर्वतश्चित्तवृत्तीराकृष्यैकस्मिंल्लक्ष्य एव स्थिरीक्रियते, शरेणापि तीक्ष्णेन निशितेन भूयते । एवमेव ब्रह्मज्ञानरूपे भेत्तव्ये लक्ष्ये लक्ष्यावाप्त्यर्थं धनुरादिस्थानीयानि साधनान्यप्यपेक्ष्यन्त एव । कानि च तानि साधनानीति स्पष्टयन्ती श्रुतिर्वक्ति—

प्रणवो धनुः शरो ह्यात्मा ब्रह्मतल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ (मु० 2.2.4)

अत्र ब्रह्मात्मके लक्ष्ये जीवात्मनः प्रवेशार्थं धनुरादिस्थानीयानि कानि कानि वस्तूनि साधनत्वेनोपादेयानीति श्रुत्या विशदीक्रियते यल्लक्ष्यवेधे यथा शरस्य लक्ष्ये प्रवेशो मुख्यतया साध्यः । एवमेव प्रत्यगात्मनो ब्रह्मणि विलीनीकरणमर्थाद् ब्रह्मात्मना जीवात्मनोऽवस्थितिरेव मुख्यं प्रयोजनमस्ति । फलतः जीवात्मनैव शरेणभाव्यं, ब्रह्मणा च लक्ष्येण । यस्मात् जीवात्मनस्तत्र ब्रह्मणि प्रवेशः स्यात्, शरस्य यथा शरासनमाश्रित्यैव लक्ष्यं यावद् गतिर्भवति, तथैव जीवात्मनाऽपि शरासनस्थानीयः प्रणव आश्रयितव्यः, प्रणवस्य ब्रह्मवाचकत्वात्, 'तस्यवाचकः प्रणवः' (यो० सू० 1.27) 'तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्' (क० 1.2.15) भावार्थस्त्वयं यद् वाच्यवाचकसम्बन्धेन यथा ओम् इति पदं ब्रह्मण्यन्वेति, तथैव तदाश्रितो जीवात्मापि तत्रान्वेतुं शक्नुयात् । अथवा यथा शरासनेनास्तो विक्षिप्तः शरो लक्ष्ये प्रविशति, तथैव ओंकारालम्बनो जीवात्मापि शनैः शनैरपगतकषायः शुद्धमानसः देहाद्युपाधिविनिर्मुक्तः सन् स्वमात्मानं ब्रह्माभिन्नत्वेनानुभवति साक्षात् करोति । किन्तु कुण्ठितेनानिशितेन शरेण यथा लक्ष्यमवाप्यापि भेत्तुं न शक्यते, प्रत्युत प्रतिहतेन विफलेन तेन प्रतिनिर्वर्त्यते । एवमेव जीवात्मनापि निरन्तरं वेदान्तवाक्यानामनुशीलनरूपोपासनेन वस्तुस्वरूपावगतिक्षमतासम्पादनात्मकतैक्ष्ण्यीकरणमपि नितान्तमावश्यकमेव । 'आयम्य तद्भावगतेन चेतसा' अस्यायमभि-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रायो यद् यथा विस्तीर्णं धनुर्ज्याऽकर्षणेन सङ्कुचितं क्रियते, तथैव बाह्यविषयेभ्यश्चित्तमाकृष्य लक्ष्यभूते ब्रह्मण्येकतानतारूपं संकोचं विधाय अनन्यचेतस्त्वमाश्रित्येत्यर्थः। ब्रह्मचिन्तनेन 'यो ह वै तत् परमं ब्रह्मवेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति' (मु० 3.2.9) इति वाक्यप्रामाण्येन 'ब्रह्मभूयाय कल्पते'। ब्रह्मसाक्षात्कारे जाते सति न किञ्चिदप्यवाप्तव्यमवशिष्यते न वा किञ्चित् करणीयम्। उक्तञ्च—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ (मु० 2.2.8)

अत्रेदं विचारणीयमस्ति यत् तस्मिन् परावरे दृष्टे सति कथमेवं भवति, येन हृदयग्रन्थीनां भेदनं सर्वसंशयोच्छेदनमभुक्तकर्मणामपि विनाशो भवतीति। तत्र सुविचारिते सति प्रतीयते यद् यदैतज्ज्ञातं भवति यदेतत् सर्वं परावरमर्थात् परोप्यवरं यस्मात् तद् ब्रह्मैव। अथवा परञ्चावरञ्च सर्वं ब्रह्मैव, तदैकमेवाद्वितीयम्' इति भानात् बन्धनहेतुभूतत्वाद् ग्रन्थिरूपाः सर्वे कामादयः रागद्वेषादयश्च सर्वे विशीर्यन्त एव, भेदबुद्धिमाश्रित्यैव तेषां जायमानत्वात्।

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥
यस्मिन् सर्वाणि भूतान्यात्मैवाभूत् विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ (ईशा० 6, 7)

एवञ्च देहेनान्तःकरणादिना च सह य आत्मनोऽध्यासवशात् तादात्म्यरूपो ग्रन्थिर्जीवात्मानं जननमरणादिदुःखसहस्रसंकुले संसारे निबध्नाति, स ब्रह्मज्ञानोत्तरमध्यासविनिवृत्तौ सत्याम्—'अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे' (गी० 2.20) इत्येवं प्रकारैर्बहुभिः प्रमाणभूतैर्वाक्यैः स्वानुभूत्या च प्रत्यक्षीकरणात् भिद्यत एव। संशयविपर्ययरहित आत्मयाथात्म्यज्ञाने जाते सति संशयस्य पुनरवसर एव नास्ति। अवशिष्यते कर्मणां संक्षयः। सोऽपि नास्त्यसंभाव्यः। यद्यपि 'नाभुक्तं क्षीयते कर्मजन्मकोटिशतैरपि, अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' इत्यादिवचनैः कर्मणां फलभोगोऽनिवार्य इति प्रतीयते तथापि—

द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञै—
गच्छन्त्यमूढाः पदमव्ययं तत् ॥ (गी० 15.5)

तथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ (गी० 4.37)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यादिवाक्यैः कर्मणामपि संक्षयः शक्य एव। नाभुक्तमित्यादिवाक्यानि त्वजात-ब्रह्मज्ञानविषयाणीति नास्ति कश्चिद्विरोधः। अथवा 'प्रारब्ध कर्मणां भोगादेव क्षयः' इति प्रारब्धकर्मातिरिक्तसंचितक्रियमाणकर्मणामेव क्षयो भवतु, प्रारब्ध-फलभोगानां कर्मणां तु भोगादेव क्षयः स्यात् अत्रापि 'दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः' (गी० 2.56) इति गीतावचनाद् दुःखादीनामनुभूतिर्न भवतीति प्रारब्धकर्मणामपि प्रकारान्तरेण संक्षय एव बोद्धव्यः। ब्रह्मविदां दृष्टौ तु सर्व-मेतद्विश्वं यन्नानारूपेणप्रतिभाति, ब्रह्मैवेति प्रतीयते। यथा स्वर्णकारदृष्टौ कटक-कुण्डलादीनि सर्वाण्यप्याभरणानि नामरूपभेदेभभिन्नत्वेन प्रतीयमानान्यपि वस्तुतः स्वर्णमयान्येव न ततो भिन्नानीति प्रतीतिः। उक्तञ्च—

ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म, पश्चाद्ब्रह्मदक्षिणतश्चोत्तरेण।
अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्॥
(मु० 2.2.11)

गीतायामपि—

'अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम्' इति (गी० 5.26)

एवंविधो ब्रह्मवेत्ता ब्रह्मणा सह परमं साम्यमुपैति—

यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति॥
(मु० 3.1.4)

परमसाम्यशब्देनात्राभेदो विवक्षितः। अन्यथा परमविशेषणस्य वैयर्थ्यापत्तिः स्यात्! यावदयं जीवात्मा स्वकीयं वास्तविकं रूपन्नानुभवति तावद्दे-हादावहमिति भावनयाऽहन्ताममतावशान् मिथ्याज्ञानमूलकानि जन्मानि दुःखानि चानन्तकालमनुभवत्येव। न तु तेभ्यो दुःखादिभ्यस्तस्य विमुक्तिर्जायते तदप्युक्तं—

द्वासुपर्णा सयुजा सखाया, समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति॥
(मु० 3.1)

समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥
(मु० 3.2)

अतो मुमुक्षुभिरहर्निशं सततमात्मदर्शनाय बद्धपरिकरैर्भाव्यम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया ।
दद्यान्नावसरं कञ्चित् कामादीनां मनागपि ॥

तदुपलब्धये न केवलं बहुश्रवणं प्रवचनादिकञ्च पर्याप्तं भवति अपि तूत्कट-जिज्ञासा देहगेहादिविस्मृतिः, तद्विरहे परमव्याकुलतादिगुणाश्च नितान्तमपेक्ष्यन्ते । तथा हि—

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम् ॥

नायमात्मा बलहीनेन लभ्यो न च प्रमादात् तपसो वाप्यलिङ्गात् ।
एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम ॥

स वेदैतत् परमं ब्रह्मधाम यत्र विश्वं निहितं भाति शुभ्रम्
उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः ॥

(मु० 3.2.6, 7, 1)

अतो बलहीनत्वमपहाय प्रमादञ्च विहायाधाय च मनसि 'शरीरं पातयेयं कार्यं वा साधयेयम्' इत्याकारिकां दृढां धारणां, देहगेहादावासक्तिरूपं प्रमादञ्च परित्यज्य ब्रह्मचिन्तनं विधेयम् । तस्य चिन्त्यमानस्य ब्रह्मणः चिन्तनप्रकारोऽपि श्रुत्यैव प्रतिपाद्यते—

बृहच्चतद्दिव्यमचिन्त्यरूपं सूक्ष्मात् सुसूक्ष्मतरं विभाति ।
दूरात् सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायाम् ॥

न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा ।
ज्ञानप्रसादेन विशुद्धसत्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥

एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन्प्राणः पञ्चधा संविवेश ।
प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन् विशुद्धे विभवत्येष आत्मा ॥

(मु० 3.1.7-9)

निष्कर्षस्त्वयं यद् विश्वमेतद् यदि ब्रह्मविलसितमेवास्ति, तदाऽस्मिन् विश्व-स्मिन् यत् किमपि दूरात् सुदूरेऽपि वर्तते, तदपि ब्रह्मैव तदतिरिक्तस्यान्यस्या-भावात् । एवमेव यत् किमपि वस्त्वन्तिकेऽस्ति, तदपि ब्रह्मैव । सूक्ष्मात् सूक्ष्मतरं स्थूलादपि स्थूलतरं ब्रह्मैवास्ति । एवंविधस्य विरुद्धनानाधर्माश्रयस्य किमपि निश्चितं रूपं वक्तुं न शक्यते अतोऽचिन्त्यरूपतापि तस्य सुस्पष्टैव । किन्त्वेतत्तु सर्वथा निश्चितमेवास्ति यत् प्रतीयमानं वस्तुजातं स्थूलं सुसूक्ष्मं वा भवतु, दूरात्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुदूरवर्त्यपि भवतु, सन्निहिततरं वा भवतु, तत् सर्वं ब्रह्मैव विविधरूपेण प्रकाशते। एवं न केवलं बाह्यं वस्तु, अपि तु गुहायां बुद्धावपि चेतनत्वेन निहितं ब्रह्मैव विभाति। अनेन प्रकारेण विश्वरूपेण विश्वात्मैव विभातीति ध्यायमानाः संसृति चक्राद् विनिर्मुच्य मुक्तबन्धनाः सन्तो ब्रह्मसायुज्यं समुपलभन्ते। तथा हि—

वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः।
ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे॥

(मु० 3.2.6)

किञ्च—

यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्॥
स यो ह वै तत्परमं ब्रह्मवेद ब्रह्मैव भवति नास्याब्रह्मवित् कुले भवति।
तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति॥

(मु० 3.2.89)

इत्युक्तप्रकारेण मुण्डकोपनिषत्सम्मतं ब्रह्मस्वरूपं संक्षेपेण प्रदर्शितं, प्रदर्शितानि च तत्प्राप्तेः साधनानि। प्रतिपादितसाधनसाहाय्येन च ब्रह्मज्ञानमवाप्य कृतकृत्यता सर्वबन्धविनिर्मुक्ता न प्रदर्शिता। इतोऽग्रे तैत्तिरीयोपनिषदो ब्रह्मविषयिणी कीदृशी सम्मतिरिति प्रदर्श्यते—

असन्नेव स भवति, असद्ब्रह्मेति वेद चेत्।
अस्ति ब्रह्मेति चेद्वेद, सन्तमेनं ततो विदुः॥

(तै० 2.6.1)

"तस्यैष एव शारीर आत्मा यः पूर्वस्य। अथातोऽनुप्रश्नाः। उताविद्वानमुं लोकं प्रेत्य कश्चन गच्छति आहो विद्वानमुं लोकं प्रेत्य कश्चित् समश्नुता उ। सोऽकामयत, बहुस्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वा इद सर्वमसृजत यदिदं किञ्च। तत्सृष्ट्वा तदेवानुप्राविशन्तदनुप्रविश्य सच्च त्यच्चाभवद् निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवत् यदिदं किञ्च तत्सत्यमित्याचक्षते (तै० 2.6.1)।"

अयं भावः। यदि स्यादुपलभ्येत यथा घटादिरितिन्यायमनुसृत्य बहुभिस्तु ब्रह्मणः सत्तैव नाङ्गीक्रियते; किन्तु चेद्ब्रह्मणः सत्ता नास्ति, तर्हि वृक्षाभावे पल्लवादीनामिवासद्वादिनामप्यसत्त्वमेव स्यात् अतो ब्रह्मणः सत्तावश्यमेव

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वीकार्या। अत्र श्रुतिरेव प्रमाणम् असन्नेव संभवतीत्यादि। तस्मादेव ब्रह्मणः सकाशात् सर्वेयं सृष्टिः सञ्जाता। तथा हि—सोऽकामयत बहुस्यां प्रजायेय। रमणेच्छयैकाकिना रमणस्याभावात् तद्ब्रह्म द्वितीयमैच्छत्। किन्तु तदानीं द्वितीयस्याभावात् स्वयमेव तपस्तप्त्वेदं सर्वमसृत यदिदं किञ्च। स ं सृष्ट्वा सर्वेषु प्रविष्टवान्। सच्चत्यच्चाभवत्। इति सर्वस्य प्रपञ्चस्य ब्रह्माभिन्नत्वं ब्रह्मत्वात् सत्यत्वञ्च प्रतिपादितं भवति। (तै० 2.7.1) सप्तमानुवाके, असद्वा इदमग्र आसीत् ततो वै सदजायत। तदात्मानं स्वयमकुरुत तस्मात्तत् सुकृतमुच्यते। यद्वैतत् सुकृतं रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति। को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति। तदाह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवति। यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति। तत्त्वेवभयं विदुषो मन्वानस्य। (तै० 2.7.1) अनेनानुवाकेन यदेतत् प्रतिपाद्यते 'असद्वा इदमग्र आसीत् ततो वै सदजायते'। तस्यायमभिप्रायो यद् अग्रे सृष्टेः प्राग् इदं सर्वपरिदृश्यमानं श्रूयमाणञ्च जगद् असन्नामाव्याकृतनामरूपभेदमशेषविशेषरहितं सच्चिदानन्दं ब्रह्मैवासीत्। तस्मादेवाशेषविशेषरहिताद् ब्रह्मणः सकाशात् सन्नाम व्याकृतनामरूपभेदमेतज्जगदजायत। अत्यन्तासत्त्वस्वीकारे तु 'तदात्मानं स्वयमकुर्वत' इति कथनमसङ्गतं स्यात् 'कथमसतः सज्जायेतेति विरोधाच्च। 'तदात्मानं 'स्वयमकुर्वत' इत्यनेनैतत्स्पष्टमेव प्रतीयते यत् तदानीं द्वितीयस्योपादानस्य निमित्तस्य चाभावात् तद् ब्रह्मैव स्वयमात्मानमेवाकुरुत, अर्थान्निष्प्रपञ्चं ब्रह्मप्रपञ्चरूपेणाविर्भूतमिति। तस्माद् ब्रह्मणि प्रपञ्चेवामिथो नास्ति मनागप्यन्तरम् यस्तूदरमपि किञ्चिदप्यन्तरं भेदं करोति तस्य भयं भवति 'द्वितीयाद्वै भयं भवति' 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूत् विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ई०7) अत एवोक्तं 'यदाह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति। यदा यस्मिन्नेव कालेऽयं जीवस्तस्मिन् अनिर्वचनीये निर्विकारे निराकारे ब्रह्मण्यभयं यथा स्यात्तथा प्रतिष्ठां नाम स्थितिमात्मभावं लभते, तदा तदात्मभावमापन्नो जीवोऽभयं गतो भवति,आनन्दी भवतीत्यर्थः। यतो हि 'रसो वै सः' रसं ह्येवायं लब्ध्वानन्दी भवति। 'एष ह्येवानन्दयाति' यथा प्रकाशस्वरूपः सूर्यो लोकेभ्यः प्रकाशं ददाति, एवं स परमात्माऽपि सच्चिदानन्दस्वरूपत्वात् सर्वेभ्यो जीवेभ्य आनन्दं ददातीत्यर्थः। 'आनन्दो ब्रह्मेति व्यजानात्। आनन्दादेव खल्विमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्ति (तै० 3.6.1)। अतः सुसिद्धमेतद् यत् सृष्टेः प्राक् सच्चिदानन्दस्वरूपं ब्रह्माव्याकृतनामरूपभेदं निराकारमनिर्वचनीय-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मेकमेवाद्वितीयमासीत् । तदेव ब्रह्म रमणेच्छया सर्वशक्तिमत्त्वात् स्वयमात्मानमेव जगद्रूपेण विपरिणमयामास अतो जगति ब्रह्मदृष्टिः कार्या, न तु मिथ्यात्वबुद्धिः । मिथ्यात्वबुद्धिस्तु सैवोच्यते ययाऽतस्मिन् तत्त्वं प्रतीयेत । यथाऽस्मिञ्जगत्येव ब्रह्म-भिन्नत्वबुद्धिः, रज्जौ सर्पबुद्धिवत् । 'ज्ञाते तत्त्वे कः संसार' इति तत्त्वज्ञानानन्तरन्तु सर्वं खल्विदं ब्रह्मेत्येतदेव प्रतीयते, न तु संसारबुद्धिः । 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति त्रिविधनानानामरूपभेदाभिन्नं जगत् ब्रह्मैवेति ब्रह्मविदां प्रतीतिः । श्रुत्यन्तरेऽपि 'ओम् आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किञ्चनमिषत् । स ईक्षत लोकान्नुसृजा इति' (ऐ० 1.1.1) । आत्म-शब्देनात्र सर्वज्ञः सर्वशक्तिरशनायादिसर्वसंसारधर्मवर्जितो नित्यशुद्धबुद्धमुक्त-स्वभावोऽजोऽजरोऽमरोऽमृतोऽभयोऽद्वयः परमात्मैव गृह्यते । उक्तञ्चाप्यभियुक्तैः 'यदाप्नोति यदादत्ते यच्चात्ति विषयानिह, यच्चास्य संततो भावस्तस्मादात्मेति भण्यते' । य एक एव परमात्मा ईक्षत (ऐक्षत) लोकान्नुसृजै इति । अनेन प्रतीयते यत् सृष्टेः प्राक् परमात्मनोऽतिरिक्तं किमप्यन्यद्वस्तु नासीदेव । स एव स्वयं जगद्रूपेणात्मानं प्रपञ्चितवानीति । अतोऽस्मिन् प्रपञ्चे चराचरेषु स्थावरजङ्ग-मेषु निर्जीवत्वेन सजीवत्वेन च प्रतीयमानेषु सर्वत्र ब्रह्मबुद्धिरेव कार्या । छान्दोग्ये-ऽपि 'सदेव सौम्येदमग्र आसीदेकमेवाऽद्वितीयम् । तद्धैक आहुरसदेवेदमग्र आसीदेक-मेवाऽद्वितीयं तस्मादसतः सज्जायत' (छा० 6.2.1) अस्मिन् वाक्ये 'एके' इति पदेन तेषां कथनमयौक्तिकमनागमप्रमाणमित्युपेक्षणीयमिति ध्वन्यते । उक्तञ्चा-ग्रिमे मन्त्रे—

कुतस्तु खलु सौम्यैवं स्यादिति होवाच कथमसतः सज्जायेतेति ।
सत्त्वमेव सौम्येदमग्र आसीदेकमेवाऽद्वितीयम् ।।
(छा० 6.2.2)

'नासतो विद्यते भावो', 'नाविद्यमानान्युत्पद्यन्ते' इत्यादिवचनात् असतः सदुत्पत्ति-रसम्भवेति तेषां कथनं भ्रान्तिमूलकम्, अत उपेक्षणीयमेव । वस्तुतस्तु तस्मात्सत्स-काशादेवेदं सर्वं जगज्जायते, अर्थात् तत् सदैव जगदाकारेण प्रतीयते । वस्तुतस्त्वे तत्सर्वं ब्रह्मैव, न ततो किञ्चिद्भिन्नमिति । एतत्तु श्वेतकेतूपाख्यानेन सुस्पष्टं भवति । जगतो ब्रह्माभिन्नत्वप्रतिबोधनाय पित्राऽऽरुणिना श्वेतकेतुः पृष्टः, 'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति' (छा० 6.1.3) तद्विषयकबोधाभावादुत्तरप्रदानाक्षमः श्वेतकेतुः पितरं प्रोवाच । 'कथं न भगवः स आदेशो भवतीति' ? तदनन्तरमुपदिशत्यारुणिः—'यथासौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् । (छा० 6.1.4) 'यथा सौम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् वाचारम्भणं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विकारो नामधेयं लोहमित्येव सत्यम्'। 'यथा सौम्यैकेन सर्वं नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं कृष्णायसमित्येव सत्यम्। एवं सोम्य स आदेशो भवतीति' (छा० 6.1.5, 6)। अत्रोपवर्णितोदाहरण-त्रयेणैतत्प्रतीयते यन्मृदेव घटशरावादिरूपेण प्रतिभासते। तत्र घटशरावादिषु मृत्तिकाया वस्तुतो विद्यमानतास्ति, न तु तस्या असत्वम्। एवमेव प्रपञ्चेऽपि ब्रह्मणो ब्रह्मरूपता घटादिषु मृत्तिकेवाक्षुण्णा वर्तते। एवञ्च घटशरावादिकेवलं वाचारम्भण-मात्रमस्ति। मृण्मयानां मृद्विकारत्वेऽपि यथा मृद्रूपता न व्यभिचरति, तथैव जगतो ब्रह्मविकारत्वेऽपि स्वरूपतो ब्रह्मरूपतैवाङ्गीकार्या, न तु तस्य सर्वथा मिथ्यात्व-मिति। अन्यथैकविज्ञानेन सर्वविज्ञानमित्यस्य सिद्धान्तस्य व्याघातः स्यात्। रज्जुविज्ञानेन तु सर्पविज्ञानं न भवति, अपि तु सर्पभ्रान्तिर्निवर्तते। एवं घटोऽयं शरावोऽयमितिभ्रान्तिर्निवर्तते, मृत्तिकायाः सत्यत्वन्तु तत्राप्यस्त्येव। अत उदाहरणत्रयेणापि जगतो ब्रह्माभिन्नत्वरूपेण सत्यत्वं, तत्तन्नानानामरूपभेद-भिन्नत्वमेवासत्यमिति। सारांशस्त्वयं यज्जगतो मायिकत्वेऽपि शशविषाणवन्मृग-मरीचिकावद् वा सर्वथामिथ्यात्वमिति चोपनिषदामनभिमतमिवाभाति। अस्त्येतदप्यत्र विचारणीयमेव यद् एषु त्रिष्वप्युदाहरणेषु मृत्तिकाया लोहमणेश्चो-दाहरणद्वयं सारूप्यं भजते। कारणज्ञानात् कार्यज्ञानमिति कारणाभिन्नत्वं कार्य-स्येति व्यज्यते, किन्तु नखनिकृन्तनज्ञानेन कृष्णायसज्ञानमिति तु कार्यज्ञानात् कारणज्ञानमिति तृतीयमुदाहरणमेतद्विज्ञापयति यत् कार्यज्ञानमपि कारणज्ञान-जनकं भवतीति। येषु येषु कार्यवस्तुषु यद्वस्तु सम्यगनुगतं भवति, तदेव वस्तु तेषां सर्वेषां कार्यवस्तूनां कारणं प्रकृतिर्वा भवति, तदेव चानुगतं सत्यमिति कथ्यते। यथा कटककुण्डलादीनां स्वर्णनिर्मितानां सुवर्णमेव प्रकृतिः, सर्वेषु कटककुण्डला-दिषु सुवर्णस्यानुस्यूतत्वात्। समायातमेतद् यन्नखनिकृन्तनज्ञानेन कृष्णायसमिव प्रत्यगभिन्नात्मनः सम्यक् परिज्ञानाद् ब्रह्मज्ञानमपि सुतरामेव जायते। अत एवोक्तम्—'आत्मानं चेद्विजानीयाद्, अयमस्मीतिपुरुषः किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत्'। देहात्मवादिनामेव शरीरसम्बन्धात् तन्नि-मित्तम् अनेकम् आध्यात्मिकाधिदैविकाधिभौतिकदुःखजातं सञ्जायते। प्राक् प्रदर्शितोदाहरणत्रयेणैतत् प्रतीयते यद् यथा मृत्पिण्डलोहमण्योर्ज्ञानेन तद्विकाराणां घटशरावादीनां कटककुण्डलादीनाञ्चैकविज्ञानेन सर्वविज्ञाने भवति, तथैव विकार-भूतनखनिकृन्तनज्ञानेनापि प्रकृतिभूतकृष्णायसज्ञानं भवतीत्यत्र नास्ति कश्चित् संदेहः। अर्थात् प्रकृतिस्थानीयब्रह्मज्ञानेन विकारस्थानीयजीवानां, तथा विकृति-स्थानीयजीवात्मनां ज्ञानेन प्रकृतिस्थानीयब्रह्मणो ज्ञानं भवति। अतोऽत्र किञ्चिज्जीव-स्वरूपविषयेऽपि विचार्यते। जीवाः प्रत्यक्षतो जाग्रत्स्वप्नसुषुप्तीत्यवस्थात्रयवन्तो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवन्ति । तत्रेन्द्रियैरर्थोपलब्धिर्जागरितम्' इतिलक्षणेन यस्यामवस्थायामिन्द्रियार्थ-संयोगाज्ज्ञानमुपजायते सावस्था जाग्रदवस्थेति कथ्यते । यस्यामवस्थायान्तु चक्षुरा-दीन्द्रियेषूपसंहृतेषु जाग्रत्संस्कारजन्यः सविषयः प्रत्ययः समुपजायते सावस्था स्वप्नावस्थेति निगद्यते, जागत्स्वप्नावस्थाद्वयभिन्नावस्थासुषुप्तिरिति । अथवा वेदान्तपरिभाषाकारप्रतिपादिता 'सुषुप्तिर्नामाविद्यागोचराविद्यावृत्त्य-वस्था', अविद्यागोचरेत्यविद्यापदं सुखस्याप्युपलक्षणं 'सुखमहमस्वाप्सं नैव किञ्चिदवेदिषम्' इति प्रतीतिबलात् । इत्थं जाग्रत्स्वप्नसुषुप्तीत्यवस्थात्र-येऽपि जीव एक एव । अवस्थात्रयजातानुभवस्य स्मरणात् । नह्यन्यानु-भूतार्थस्यान्येन स्मरणं कर्तुं शक्यत इति नियमात् । अनेनैव 'अन्यकर्तृकानु-भवस्य नान्यकर्तृकं स्मरणम्' इति न्यायेन बाल्ययौवनवार्धक्यपदवाच्यावस्थात्रयेऽ-प्येक एव जीवो न तु जीवभेद इत्यपि प्रमाणितं भवति । तथा हि—'योऽहं बाल्ये पितरावन्वभूवमिदानीं वार्धक्ये नप्तॄननुभवामीति' । यथा हि प्रत्यहं जाग्रदाद्य-वस्थात्रये, प्रतिजीवनञ्च बाल्याद्यवस्थात्रयेऽप्येक एव जीवः सिध्यति, न तु जीवान्तरस्य गन्धोऽपि तत्र विद्यते । एवमेव भूतवर्तमानभविष्यत्कालत्रयेऽप्येकस्यैव जीवस्य शरीरान्तरप्राप्तिरेव भवति न तु शरीरनाशेन सह जीवनाशो न वा शरीरान्तरधारणेन सह तस्योत्पत्तिरित्यपि तेनैवान्यानुभूतन्यायेनानुमित्या च साधयितुं शक्यमेव । तथा हि यद्यपि प्रतिजीवन्तु पूर्वजन्मानुभूतिस्मृतिर्नैव जायते, किन्तु साम्प्रतं बहव एवं विधा बालका जायन्ते, यैः स्वीयपूर्वजन्मतो जन्मभूमिः पित-रावन्यसम्बन्धिनश्च स्मर्यन्ते । अनुसन्धानेन तेषां कथनं सत्यमेव जायते । अत एतत् सुसिद्धं भवति यज्जन्मनः प्रागपि जीवस्य सत्ता विद्यते । अतोऽनादिकालतो जीवस्य सत्तायां सत्यां तस्यानादित्वमनन्तत्वं च सिध्यति । फलतस्त्रिकालाबाधितत्वाद् भूतवर्तमानभविष्यदाख्यावस्थात्रयवानपि जीवो भवति । अत एव जीवो नित्यः 'स्थाली पुलाकन्यायेन सर्वेऽपि जीवा नित्या इति तु प्रत्यक्षतो जीवानां नित्यत्वं साधितम् शब्दप्रामाण्येन तु श्रुतिस्मृतिपुराणेतिहासेषु सहस्रशो वाक्यानि जीव-नित्यत्वप्रतिपादिकानि सन्ति । तथा हि—

न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥
(क० 1.2 18)

न स्त्री न पुमानेष न चैवायं नपुंसकः ।
यद्यच्छरीरमादत्ते तेन तेन स रक्ष्यते ॥ (श्वे० 5.10)

स्थूलानि सूक्ष्माणि बहूनि चैव, रूपाणि देही स्वगुणैर्वृणोति ।
क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरपरोऽपि दृष्टः ॥
(श्वे० 5.12)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यादिश्रुतयः—न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥
(गी० 2.20)

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नत्वेवाहं जातु नाशं न त्वं नेमे जनाधिपाः॥
न चैव न भविष्यामः सर्वे वयमतः परम्॥
देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥
गी० 2.12, 13)

इत्यादिस्मृतयश्च जीवात्मनो नित्यत्वे निर्विकारत्वे च प्रमाणम्। एवमेवान्येष्वपि प्रमाणभूतेषु श्रीमद्भागवतादिषु ग्रन्थेषु जीवस्य नित्यत्वादिकं प्रतिपादितमस्ति। तदिह विस्तरभिया न प्रदर्श्यंते।

ब्रह्मजीवजगतां सम्यग्विवेचनन्तु तत्तत्सम्प्रदायप्रवर्तकानां श्रीमच्छङ्कराचार्य श्रीमद्रामानुजाचार्य श्रीमद्वल्लभाचार्यादीनां तत्तदाचार्याणां सिद्धान्तप्रदर्शनप्रकरणे तत्तत्सिद्धान्तानां वैमत्यैकमत्यप्रदर्शनपूर्वकं तत्रैव विधास्यते। साम्प्रतन्तु यान्युपनिषदादिवचनानि प्रमाणत्वेन प्रायः सर्वैराचार्यैराश्रीयन्ते, तेषामेव संक्षिप्तसंग्रहोऽत्र कृतः। अस्तु, जगद्विषयकाण्यपि कानिचिदुपनिषत्प्रतिपादितानि वाक्यानि संक्षेपत उद्ध्रियन्ते। यथा—

विश्वतश्चक्षुरुत विश्वतोमुखो, विश्वतो बाहुरुत विश्वतः पात्।
संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देव एकः॥
(श्वे० 3.3)

'हिरण्यगर्भं जनयामास पूर्वम्' (श्वे० 3.4)

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये॥
(श्वे० 6.18)

सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्।
सभूमिं विश्वतोवृत्वात्यतिष्ठद्दशाङ्गुलम्॥
पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति॥
सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥ (श्वे० 3.14-16)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आत्मैवेदं सर्वम् (छा० 7.25.2)
ब्रह्मैवेदं सर्वम् (मु० 2.2.11)

इदं सर्वं यदयमात्मा (बृ० 2.4.6) इत्यादिवचनैर्ज्ञायते यत् स्वयं ब्रह्मैव स्वशक्त्या स्वेच्छया लीलां विधातुं जगद्रूपेणाविर्भूतमिति। वेदान्तपरिभाषाकारैस्तु पञ्चीकृतपञ्चभूतोत्थं विश्वमिति प्रतिपाद्यते। तत्र सृष्टिक्रमः एवंनिरूपितोऽस्ति यत् 'सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्मसहकृतो मायया नामरूपात्मकं निखिलं प्रपञ्चं प्रथमं बुद्धावाकलय्य सङ्कल्पयति—'तदैक्षत बहुस्यां प्रजायेय' (छा० 6.2.3) 'सोऽकामयत बहुस्यां प्रजायेय' (तै० 2 6) इत्यादिश्रुतैः। ततस्तदिच्छया सङ्कल्पेनापञ्चीकृताकाशादीनि पञ्चभूतान्युत्पद्यन्ते। तेभ्यश्चापञ्चीकृतेभ्य आकाशादिभ्यो व्यस्तेभ्यः सत्त्वगुणोपेतेभ्यः क्रमशः श्रोत्रत्वगक्षिरसनघ्राणाख्यानि ज्ञानेन्द्रियाणि जायन्ते। मिलितेभ्यश्च सात्त्विकांशेभ्यो मनोबुद्ध्यहंकारचित्तानि जायन्ते। व्यस्तेभ्यस्तेभ्यो रजोगुणोपेतेभ्यः कर्मेन्द्रियाणि, मिलितेभ्यश्च पञ्चप्राणाः तमोगुणोपेतेभ्यश्च तेभ्यः पञ्चीकृतानिभूतानि जायन्ते। पञ्चीकरणप्रकारश्च पञ्चदशीकारेणैवमभ्यधायि। तथा हि—"द्विधा विधाय चैकैकं चतुर्धाप्रथमं पुनः। स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्चते।"

साम्प्रतं शुद्धाद्वैतवेदान्तविषये किमपि विशिष्य विविच्यते। जगतो विविधवैचित्र्यपूर्णां रचनामालोक्य प्रायः सर्वेषामेव विचारशीलानां विदुषां मनसि महदाश्चर्यं संजायते। जायते चेयं जिज्ञासा यदेतादृशस्य सर्वाश्चर्यमयस्यावगन्तुमप्यशक्यस्य कार्यात्मकस्य जगतः समुत्पत्तिः कुतः कथञ्च संजातेति अस्त्यस्य कश्चिन्निर्माता यदृच्छया वा स्वयं समुद्भूतोऽयं निष्कर्तृकः प्रपञ्चः। स्वाप्निकी सृष्टिरिव केवलं प्रातिभासिकी सत्तास्यास्त्युत ततो भिन्ना? सत्यो मिथ्यावायं प्रपञ्चः? नित्योऽनित्यो वा? चेतनाऽचेतनात्मकेऽस्मिन् प्रपञ्चे को नाम चेतनः पदार्थः, कश्चाचेतनः? एवंविधा अनेके प्रश्नाः प्रादुर्भवन्ति, यस्य कस्यापि विचारशीलस्य मानसे। येषां समाधानमन्तरोदन्वत्यूर्मिमालेव जायते मनसि महत्यशान्तिपरम्परा। अत एतेषां प्रश्नानां समाधानान्वेषणे तत्परा बहवो महात्मानो यावज्जीवं महतायासेन यत्किमप्यनुभूतवन्तस्तत्सर्वं प्राणिनां कल्याणार्थं सम्प्रदायप्रवर्तनपुरःसरं सप्रमाणमनेकग्रन्थप्रणयनादिद्वारा सर्वेषां समक्षं समुपस्थापयामासुः।

तत्रयेनाचार्येणोक्तविषये यावच्छक्ति यथावगतं तत्सर्वं तथोपवर्णितम्। किन्तु 'वेदा विभिन्नाः स्मृतयश्च भिन्ना' इति न्यायेन 'मुण्डे-मुण्डे मतिर्भिन्ना'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'नैको मुनिर्यस्य वचो न भिन्नम्' इत्यादिन्यायेन च तेष्वाचार्येष्वपि नैकमत्यमवलोक्यते।

> ध्रुवं कश्चित् सर्वं सकलमपरस्त्वध्रुवमिदम्।
> परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये॥
>
> (महि० 9)

इति सर्वथा निर्विचिकित्सतो न कोप्येतादृशो मार्गः सर्वसम्मतः समुपलभ्यते, येन प्रपञ्चस्यास्य रहस्यं सम्यक् परिज्ञाय शाश्वती शान्तिरनुभूयेत। सत्यामेतस्यां विषमपरिस्थितौ महिम्नस्तवकर्त्रा श्रीपुष्पदन्ताचार्येण सम्यक् प्रतिपादितं यत् 'त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति, प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च। रुचीनां वैचित्र्याद् ऋजु कुटिलनानापथजुषां नृणामेकोगम्यस्त्वमसि पयसामर्णव इव' (महि० 7)। भवन्तु नामानेके पन्थान ऋजवः कुटिलाश्च, किन्तु गन्तव्यं प्राप्यं स्थानं सर्वेषां पथामेकमेव। यथा पथसां सिन्धुरिति।

काश्चित् गङ्गाद्याः सरितः साक्षात् समुद्रगामिन्यः सन्ति, काश्चित्तु तद्द्वारैव। किन्तु सर्वासां तासां यथा समुद्र एवैको गन्तव्योऽस्ति तथैव सर्वेषामपि प्रस्थानानां परस्परभेदेऽपि न तेषां गन्तव्यभेदो न वा तत् प्राप्तौ काचिद् विप्रतिपत्तिरिति। यथा कश्चित् काशी पद्भ्यां गच्छति, कश्चिच्च लौहशकटादिना, एवं च कश्चित् काशीतः पूर्वदिग्वर्ती पुरुषः पश्चिमां दिशमवलम्ब्य पश्चिमाभिमुखः सन् काशीं गच्छति, कश्चिच्च काशीतः पश्चिमदिग्वर्ती पुरुषः पूर्वां दिशमवलम्ब्य पूर्वाभिमुखः सन् काशीं गच्छति। किन्तु सत्यपि मार्गभेदे दिग्भेदे च यथा सर्वेऽपि गन्तारो विलम्बेनाविलम्बेन वा काशीं प्राप्नुवन्त्येव। एवमेव केनचिदपि प्रशस्तमार्गस्याप्तप्रणीतस्यानुसरणेन स्वाभीष्टोपलब्धिर्भवत्येव। नास्त्यत्र कश्चित् संदेहलेशोऽपि। किन्तु तत्रैव चेत् कश्चित् काशीतः पूर्वदिग्वर्ती जनः पूर्वामेवदिशमवलम्ब्य पूर्वाभिमुख एव यात्रां करोति, तेन तु काशी सर्वथा दुरापैव। अत आप्तप्रणीत एव कश्चित् प्रशस्तमार्गः (सम्प्रदायः) समाश्रयणीयो, न तु प्रतीपगामी कश्चित् गर्तादिनिपातात्मको मार्गः स्वकपोलकल्पितः। तत्र तावत् किन्नाम प्राशस्त्यम् इत्युच्यते- आप्तवाक्यं प्रमाणम्। आप्तवाक्यञ्च वेदास्तन्मूलका अन्येऽपि गीताब्रह्मसूत्रश्रीमद्भागवतादिस्मृतिपुराणादिग्रन्थाः। वेदानाञ्चानादित्वादपौरुषेयत्वाच्च पुरुषकर्तृकदोषाणामसम्भवात् सर्वथा निर्विचिकित्सितं प्रामाण्यमन्येषान्तु तन्मूलकमेव। काण्डत्रयात्मके तत्र वेदेऽपि वेदान्तपदवाच्यानामुपनिषदामेव प्राधान्यमङ्गीकृतं सर्वैरप्याचार्यवर्यैः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥

इत्युपनिषदां सारभूताया गीताया अपि प्रामाण्यं तद्वदेवेति निर्विवादमेव। एवमेव ब्रह्मसूत्राणामपि वेदान्तवाक्यार्थमीमांसापराणां वेदवाक्यवत् प्रामाण्यम्। तथा च श्रीमद्भागवतपुराणस्यापि। फलतः एतत् त्रयमेव (उपनिषत्, गीता, ब्रह्मसूत्राणि च) प्रस्थानत्रयीतिनाम्ना व्यवह्रियते। किन्तु शुद्धाद्वैतवेदान्ते श्रीमद्भागवत-पुराणस्यापि तत्र प्रस्थाने प्रवेशात् प्रस्थानचतुष्टयीति स्वीक्रियते। एतत् प्रमाण-चतुष्टयमालम्ब्यैव शुद्धाद्वैतवेदान्तसिद्धान्तप्रवर्तकैः श्रीमद्वल्लभाचार्यैः ब्रह्मजीव-जगतां विषये विचारविमर्शो व्यधायि। स एव ब्रह्मजीवगतां विचारविमर्शोऽत्र प्रकरणे संक्षेपेण प्रदर्श्यते।

शुद्धाद्वैतवेदान्तनये न किमपि वस्तु महद्वाणुर्वैतादृशं वर्तते, यत् भवेन्नाम ब्रह्मातिरिक्तम्। तस्मिन् सिद्धान्ते वेदानां परमं प्रामाण्यमभ्युपगम्यते। तत्राक्षर-मात्रस्याप्यन्यथार्थप्रतिपादकत्वन्नाङ्गीक्रियते। अतएव 'सर्वं खल्विदं ब्रह्म' (छा० 3.14.1) इत्येतज्जातीयवेदवचनान्याश्रित्य सम्पूर्णस्य प्रपञ्चस्य जड-जीवान्तर्याम्यात्मकस्य शुद्धब्रह्मत्वमेव स्वीक्रियते। किन्त्वन्येषां कतिपयानामा-चार्याणां मते द्वैतं द्वैताद्वैतं विशिष्टाद्वैतमद्वैतञ्चेत्यादिविभिन्नाः सिद्धान्ताः प्रति-पाद्यन्ते। तत्र सर्वेषामाचार्याणां स्वस्वसिद्धान्तपरिपोषणाय या या उक्तयो युक्तयश्च स्वानुकूल्येनाभिमताः सन्ति, तासां सर्वासां यावद्विशदाविचारणा न सञ्जायेत, तावत् यस्य कस्यापि सिद्धान्तस्य सर्वथा पूर्णत्वं निर्दुष्टत्वञ्च प्रति-पादयितुं न कोऽपि क्षम इति क्रमशो यथास्थानं सर्वेषां सिद्धान्तानां संक्षिप्त-विचारणा करिष्यते। तत्र तावत् संक्षेपेण प्रथमं श्रीमद्वल्लभाचार्यप्रतिपादितः सिद्धान्तः समुपन्यस्यते।

शुद्धाद्वैतवेदान्तमते 'सर्वं खल्विदं ब्रह्मे' ति श्रुत्या सर्वशक्ति (सम्पन्न) सर्व-भवनसमर्थसाक्षात् परब्रह्मैव स्वेच्छया 'यथा सुदीप्तात् पावकात् क्षुद्रा विस्फु-लिङ्गाव्युच्चरन्ति, एवमेव तस्मादात्मनः सर्वेप्राणः सर्वेलोकाः सर्वे जीवाः कुपूय-चरणा रमणीयचरणा (बृ० 2.20) इति साक्षात् परब्रह्मैव जगद्रूपेणाविर्भवति। 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति' (तै० 3 1) इति श्रुतिः समस्तस्य प्रपञ्चस्य ब्रह्मरूपतां प्रतिपादयति। 'सुवर्णस्य च ये खण्डाः कटका मुद्रिकादयः सुवर्णत्वेन गृह्णाति तथा ब्रह्मविदो मतिः' 'यथा हिरण्यं बहुधासमीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु, एवं वचोभिर्भगवानधोक्षजो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्याख्यायते लौकिकवैदिकैर्जनैः' (भा० 12.4.31)

यथा सुवर्णं स्वकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य ।
तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्यतद्वत् ॥

(भा० 11.28.19)

इत्यादिवचनैः स्पष्टमेव प्रतीयते यदेतत्सर्वमेवजगद् ब्रह्माभिन्नमतः सत्यमिति । जीवानामप्युपर्युक्तश्रुतिवाक्यैर्यथा सुदीप्तात्पावकादित्यादिभिरंशांशिभावेन सर्वथा ब्रह्मरूपत्वं निर्विवादमेव । एवं जडात्मकस्य जगतो जीवानाञ्च ब्रह्माभिन्नत्वं विस्पष्टमेव । न चैकस्मान्निर्विकारात् सच्चिदानन्दरूपाद् ब्रह्मणः प्रादुर्भूतस्य जगतो जीवानाञ्च सच्चिदानन्दरूपता, 'कारणगुणपूर्वकत्वात् कार्यस्येति' कुतो नेति चेन्न । 'एकाकी न रमते स द्वितीयमैच्छद्' इति रमणार्थं बहुत्वसम्पादनाय स भगवान् 'अनेन जीवेनात्मनाऽनुप्रविश्यनामरूपे व्याकरवाणि (छा० 6.3.2) इति स्वकीयमानन्दांशं जीवेषु तिरोभावयामास जडेषु च चिदानन्दयोरुभयोरप्यंशयोस्तिरोभावञ्चकार । लीलासंवरणकाले तु पुनस्तेषु तदंशयोराविर्भावेन शुद्धब्रह्मत्वं सच्चिदानन्दरूपत्वं जायते । अतो नास्ति कश्चित् संदेहावसर इति । 'एकमेवाद्वितीयम्' (छा० 6.2.1) 'अतोऽन्यदार्तम् (बृ० 4.2.1) नेहनानाऽस्ति किञ्चन' (बृ० 4.4.19) 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (क० 2.1.10) इत्यादिश्रुतयः प्रपञ्चस्य सम्पूर्णचराचरस्य, जीवानाञ्च निखिलानां शुद्ध ब्रह्मत्वं प्रतिपादयन्ति । श्रीमद्भागवतेऽपि—

मामेव सर्वभूतेषु बहिरन्तरपावृतम् ।
ईक्षेतात्मनि चात्मानं यथा खममलाशयः ॥

(भा० 11.29.12)

ब्राह्मणे पुल्कसेस्तेने ब्रह्मण्येऽर्के स्फुलिङ्गके ।
अक्रूरे क्रूरके चैव समदृक् पण्डितो मतः ॥

(भा० 11.29.14)

विसृज्य स्मयमानान् दृशं व्रीडां च दैहिकीम् ।
प्रणमेद्दण्डवद्भूमावाश्चाण्डालगोखरम् ॥

(भा० 11.29.16)

यावत् सर्वेषु भूतेषु मद्भावो नोपजायते ।
तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः ॥
सर्वं ब्रह्मात्मकं तस्य विद्ययात्ममनीषया ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परिपश्यन्नुपरमेत् सर्वतो मुक्तसंशयः ॥
(भा० 11.29.17, 18)

न नौ पश्यन्ति कवयश्चिद्वं जातु मनागपि ।

इत्यादिश्रीमद्भगवद्वचनात् सर्वस्य जीवजडात्मकस्य जगतो ब्रह्मरूपता सर्वथा प्रतिपादितेति जगतो मायिकत्वेन मिथ्यात्वप्रतिपादनं न कथमपि प्रमाणितं भवति। शुद्धाद्वैतवेदान्तमते भगवान् श्रीकृष्णः साक्षात् परब्रह्मैवेति सिद्धान्तितम् तत्सेवयैव जीवानामनाद्यविद्याजन्यबन्धाद् विनिर्मुक्तिर्भवति नान्यथा । उक्तञ्च—

'कृषिर्भूवाचकः शब्दः णश्चनिर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥
मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥
(गी० 7.7)

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥
(गी० 10.39)

बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥
(गी० 12.15)

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥
(गी० 10.42)

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ।
(छा० 6.2.1)

इत्यनेन ब्रह्मणः सजातीयविजातीयस्वगतत्रिविधभेदशून्यत्वं प्रतिपाद्यते । अन्यथा 'एकमेवाद्वितीयमिति पदत्रयस्य पौनरुक्त्यं प्रसज्जेत । अतः प्रतीयते यज्जीवानां जडानाञ्च ब्रह्मणा सह सर्वथाऽभेद एव । तेषां ब्रह्मणः पृथक् सत्ता स्वीकारे तु श्रुतिविरोधोऽपरिहार्यः स्यात् । एवमेव 'पुरुष एवेदं सर्वं यच्च भूतं यच्च भाव्यम्' (ऋ० 10.90.2) इत्यनयापि श्रुत्या विस्पष्टमुद्घोष्यते यद्—इदं सर्वं घटपटादिनानारूपेण प्रतीयमानं जगद् भूतत्वेन भावित्वेन च व्यवह्रियमाणं सर्वमपि पुरुष एव न ततो भिन्नमिति । सर्वमितिपदमहिम्ना चेतनाचेतना जीवजडपदवाच्या सर्वेऽपि ब्रह्मस्वरूपा एव । 'ऐतदात्म्यमिदं सर्वम्', 'स वै सर्वमिदं जगत्' 'सन्मूलाः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सौम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठानाः' 'स देव सौम्येदमग्र आसीत् स आत्मानं स्वयमकुरुत' इत्यादिश्रुतयः प्रपञ्चस्य ब्रह्मणोऽभिन्नत्वं प्रतिपादयन्ति। श्रीहरिरायजीविरचिते ब्रह्मवादे प्रपञ्चस्य ब्रह्मरूपता सम्यङ् निरूपिता। तथा हि—'स वै सर्वमिदं जगदित्यादि श्रुतिभिः प्रपञ्चरूपेणापि पूर्वं सन्नेव स्वस्याऽद्वयत्वेन तदतिरिक्तस्याभावात् स्वस्य क्रीडार्थमाधारत्वेन प्रपञ्चरूपं सम्पादयितुं तद्रूपेणाविर्भूतो भगवानेव। 'एकाकी न रमते स द्वितीयमैच्छत्', 'स ईक्षां चक्रे बहुस्यां प्रजायेय' इति स्वेच्छयैव सर्वभवनसमर्थः सर्वशक्तिमान् सकलविरुद्धधर्माश्रयो भगवान् प्रपञ्चरूपेणाविर्भूत इति।

रमणार्थमिदं सर्वं ब्रह्मैव स्वेच्छयाऽभवत्।
यथा सर्पः स्वेच्छया हि कुण्डलाकारतां गतः॥

क्रीडार्थमात्मन इदं त्रिजगत् कृतन्ते स्वाम्यन्तु तत्र कुधियः पर ईश कुर्युः
क्रीडाभाण्डमिदं विश्वम्।

इत्यादिवचनैर्भगवतोऽभिव्यक्तिरेवायं प्रपञ्च इति नास्त्यत्र काचिद् विप्रतिपत्तिः। 'इदं हि विश्वं भगवानिवेतरः' इत्यस्य व्याख्याने श्रीमद्वल्लभाचार्यैरपि स्पष्टं व्याख्यातं यद् उत्तमाधिकारिणां प्रतीतिस्तु 'इदं हि विश्वं भगवानिति जायते, मध्यमाधिकारिणान्तु प्रतीतिः 'इदं हि विश्वं भगवानिव' इति विश्वं भिन्नं भगवान् भिन्न इति जायते निकृष्टानामेव प्रतीतिः' इदं हि विश्वं भगवत इतरदिति जायते। अत उत्तमाधिकारिणामेव प्रतीतेः सर्वमान्यत्वात् तद्बलात् प्रपञ्चस्य सर्वथा भगवत्त्वमेवाङ्गीकार्यमिति। मध्यमानां प्रतीतिरपि कार्यरूपेण भेदमाश्रित्य स्वानुकूलेव। उक्तञ्च कार्यरूपेण भेदो हि न भेदः कारणात्मना भेदह्यस्त्वभेदोऽत्र तादात्म्यं परिकीर्तितम्। नानात्वप्रतीतिस्तु सर्वथा भ्रान्तिमूलिकैव। यथा घटशरावादिषु नानात्वप्रीतिः। तथा हि—'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्। न च ब्रह्मण एकत्वे नानात्वप्रतीतिः कथं सञ्जायत इति चेन्न। सितानिर्मितेषु क्रीडनकेषु बालानां नानात्वप्रतीतावपि वस्तुभूतायाः सिताया सर्वत्रानुस्यूतत्वेन प्रेक्षावतां नानेकत्वेन प्रतीतिः।

यथा सुवर्णं सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य।
तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत्॥

यथा च जले फेनबुद्बुद्दयोजलादाविर्भवन्ति, पुनश्च तत्रैव जले विलीयन्ते। यथा वाग्नेः स्फुलिङ्गा निर्गत्यापि नाग्नेर्भिन्ना भवन्ति। एवमेव ब्रह्मणः सकाशात् सर्वं चेतनाचेतनात्मकं विश्वं प्रादुर्भूय प्रलये तत्रैव विलीयते। 'आदावन्ते च

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यन्नास्ति वर्तमानेऽपि तत्तथा'। अतः कार्यकारणयोरभेदान्निखिलोऽयं प्रपञ्चो ब्रह्मात्मक एव, न ततो किञ्चिदपि भिन्न इति। नन्वेवं प्रपञ्चस्य भगवद्रूपत्वे शास्त्रे प्रपञ्चहेयत्वप्रतिपादनमयुक्तं स्याद् इति चेन्न। 'क्रीडार्थमात्मन इदं त्रिजगत् कृतन्ते स्वाम्यन्तु तत्र कुधियः पर ईशकुर्युः' 'क्रीडाभाण्डमिदं विश्वम्' इत्येतदविज्ञाय यद् अविद्यावशवर्तिनां जीवानां तत्र' अहमेतेषां, मदीयाश्चेमे' इति या भ्रान्तप्रतीतिर्जायते, तन्निरसनार्थमेव शास्त्रेषु हेयत्वप्रतिपादनम्। यथा 'कस्य के पतिपुत्राद्या मोह एव हि कारणम्' 'अहं ममेति स्वीकृत्य करोति कुमतिर्मतिम्' इति। ज्ञानिनां कृतब्रह्मसाक्षात्काराणां दृष्टौ तु 'वासुदेवः सर्वमिति समहात्मा सुदुर्लभः' मनसा वचसा दृष्ट्या गृह्यतेऽन्यैरपीन्द्रियैरहमेव नमत्तोऽन्यदिति-बुध्यध्वमञ्जसा'। विष्णोः सकाशात् सम्भृतं जगत्तत्रैव संस्थितम्, स्थितिसंयम-कर्ताऽसौ जगतोऽस्य जगच्च सः' 'सर्वत्रासौ समस्तञ्च वसत्यत्रेति वै यतः, ततः स वासुदेवेति विद्वद्भिः परिपठ्यत' इत्यादिवचनैः सर्वस्य ब्रह्मरूपत्वात्र हेयत्वमिति। 'विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि शुनिचैव श्वपाके च पण्डिताः समदर्शिनः' (गी०) अनेनोक्तप्रकारेण श्रुतिस्मृत्यादिप्रमाणबलात् प्रपञ्चस्य जडजीवाद्यात्मकस्य-शुद्धब्रह्मत्वं साधितं भवति। तत्र वैचित्र्यप्रतीतिस्तु भगवदिच्छयैव जडे चिदानन्दां-शयोस्तिरोभावाज्जीवे चानन्दांशस्य तिरोभावाद् भवति। वैचित्र्याभावे सम्यग्र-मणस्यानुपपत्तेः तथा हि—

रमणार्थमिदं सर्वं ब्रह्मैव स्वेच्छयाऽभवत्।
यथा सर्पः स्वेच्छया हि कुण्डलाकारतां गतः॥

मृदाविभगवद्रूपं घटाद्याकारसंयुतम्।
मूलेच्छातस्तथा तस्मिन् प्रादुर्भावो हरेस्तदा॥
तदेतदक्षयं नित्यं जगन्मुनिवराऽखिलम्।
आविर्भावतिरोभावजन्मनाशविकल्पवत्॥

तिरोभावे तु कार्यं हि वर्तते कारणात्मना।
आविर्भावे तु कार्यं हि यथा मृदि घटादयः॥

उक्तञ्चाविर्भावतिरोभावयोर्लक्षणम्—

यदाऽनुभवयोग्यत्वं वर्तमानस्य वस्तुनः।
आविर्भावः स विज्ञेयस्तिरोभावस्ततोऽन्यथा॥

इति पूर्वं विद्यमानस्यैव वस्तुनोऽनुभवयोग्यत्वे सत्त्वाविर्भाव इत्युच्यते:, नत्व-विद्यमानस्य। अत एवोक्त—'तदेतदक्षयं नित्यं जगन्मुनिवराऽखिलमिति'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अक्षयत्वानादित्वनित्यत्वादिधर्माणां ब्रह्मणोऽन्यत्रासम्भवात् सम्पूर्णोऽयं प्रपञ्चः साक्षाद् भगवानेवात्र नास्ति कश्चित् सन्देहः ।

यत्र येन यतो यस्य यस्मै यद् यद् यथा यदा ।
स्यादिदं भगवान् साक्षात् प्रधानपुरुषेश्वरः ।। प्रपञ्चस्य

यस्मिन्निदं यतश्चेदं य इदं स्वयम् ।
योऽस्मात् परस्माच्च परस्तं प्रपद्ये स्वयंभुवम् ।।
(भा० 8.3.3)

यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः ।
नामरूपविभेदेन फल्ग्व्या च कलयाकृता ।।
(भा० 8.3.22)

यथार्चिषोऽग्नेः सवितुर्गभस्तया निर्यान्ति संयान्त्यसकृत् स्वरोचिषः ।
तथा यतोऽयं गुणसम्प्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः ।।
(भा० 8.3.23)

एभिः श्रीमद्भागवतवचनैरपि प्रपञ्चस्य ब्रह्मरूपता प्रतिपादिता भवति । 'पचि विस्तारे' इति धातोर्निष्पन्नस्य प्रपञ्चशब्दस्य व्युत्पत्त्यापि प्रपञ्चोऽयं निष्प्रपञ्चस्य सूक्ष्मातिसूक्ष्मस्य ब्रह्मणः प्रपञ्चो विस्तार एवास्ति, न तु ततो भिन्नं वस्त्वन्तरमिति सुस्फुटं भवति । अनेन प्रकारेण शुद्धाद्वैतसम्मतं प्रपञ्चस्वरूपं संक्षेपेण प्रदर्शितम् ।

जीवानान्तु ब्रह्मणोऽभेदः 'तत्त्वमसि श्वेतकेतो' 'अनेन जीवेनात्मनाऽनुप्रविश्ये' त्यादिश्रुतिवचनैश्चित्सजातीयतया न निर्विवाद एव । तत्र जीवस्वरूपेऽपि नास्ति सर्वेषामाचार्याणामैकमत्यम् । केचिज्जीवं व्यापकं, केचिच्छरीरपरिमाणं, केचिदणुपरिमाणं, केचिन्नित्यमनित्यञ्च केचिदित्यादिमतभेदस्तत्रापि वर्तते । तत्र श्रीवल्लभाचार्याऽभिमतजीवस्वरूपं संक्षेपेण निरूप्यते । तथाहि तेषां मते—

विसर्पिगुणचैतन्यऽणुर्जीवोऽशो हरेः स्मृतः ।
जडे चिदानन्दयोस्तु चित्यानन्दस्य शर्वशः ।।

तिरोधानं हरीच्छातो निबन्धादिषु वर्णितम्,
आविर्भावे तु सर्वं हि ब्रह्मं वेति न संशयः ।।

अर्थाज्जीवः सच्चिदानन्दस्वरूपोऽपि हरीच्छयातिरोहितानन्दांशो भगवदंशः प्रसरणशीलचैतन्यगुणकोऽणुपरिमाण एव । यद्यपि—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वाचस्पतेरवच्छेद आभासो वार्तिकस्य च ।
संक्षेपशारीरकृतां प्रतिबिम्बमिहेष्यते ।।

इत्यादिवचनैरवच्छेदवादादयोऽपि बहुभिः स्वीक्रियन्ते, तथापि श्रुतिस्मृतिब्रह्मसूत्र-गीतादिविरोधान्नत आदरणीयाः । तथाहि—'पादोऽस्य विश्वाभूतानि त्रिपाद-स्याऽमृतं दिवि' इति श्रुत्या भूतानां जीवानामवयववाचिपादत्वकथनेनांशत्वमेव । एवञ्च 'यथा सुदीप्तात् पावकात् क्षुद्रा विस्फुलिङ्गाव्युच्चरन्ति, एवमेवतस्मा-दात्मन; सर्वे प्राणाः, सर्वे लोकाः, सर्वे जीवाः कुपूयचरणा रमणीयचरणा इति मुण्डश्रुतौ सर्वे जीवा इति विस्पष्टोक्त्या जीवानां ब्रह्मणोऽशत्वं सर्वथा श्रुति-सम्मतमिति नास्ति तत्र काचिद्विप्रतिपत्तिः । उत्तरमीमांसायामपि श्रीमद्व्यास-पादैः 'अंशो नानाव्यपदेशादिति सूत्रेण जीवानां ब्रह्मांशत्वमेव समर्थितं, तत्र नानाव्यपदेशादिति हेतुप्रदर्शनपुरःसरम् । नानाव्यपदेशस्तु सकलविरुद्ध-धर्माश्रयीभूतेब्रह्मण्येव सम्भवति नान्यत्रेति जीवानां नानाव्यपदेशस्तेषां ब्रह्मांशत्मेव द्रढयति । गीतायामपि—'ममैवांशो जीवलोके जीवभूतः सनातनः इति जीवानां सनातनत्वं भगवदंशत्वञ्च स्वयं भगवता श्रीकृष्णेनैवप्रतिपादितम् । न चैवं जीवानां भगवदंशत्वे भगवद्गुणैरपि सर्वज्ञत्व-सर्वशक्तिमत्त्वसर्वकर्तृत्वा-दिभिर्जीवेषु भाव्यमिति चेन्न ईश्वरेच्छयैव जीवेषु तत्तद्गुणानां तिरोभावात् । अन्यथा वैचित्र्याभावे रमणार्थं बहुत्वभवनस्य वैयर्थ्यं प्रसज्जेत् । तिरोधाने 'परामिथ्यानात्तुतिरोहितं ततो ह्यस्य बन्धविपर्ययाविति ब्रह्मसूत्रमेव प्रमाणम् । न च जीवानां ब्रह्मांशत्वे शुद्धाद्वैतवेदान्तसम्मतस्य भजनस्यानुपत्तिः, ब्रह्मांशत्वेन प्रयोजना-भावात् सर्वेषां ब्रह्मरूपत्वादिति चेन्न, ब्रह्मांशत्वेऽप्युच्चनमावेनैव तेषां सृष्टेः । तथा च मायामोहितचेतसां तेषां स्वांशभूतानां विस्मृतस्वरूपाणां पुनः स्वस्वरूपोपपत्तयेऽविद्याविनिवृत्त्यर्थं च भजनस्य परमावश्यकत्वात् । बन्धोऽस्या-विद्ययाऽनादिरित्यनावद्यविद्याविनिवृत्तिमन्तरेण न बन्धविनिर्मुक्तिः । देहेन्द्रि-यान्तःकरणाध्यासाः स्वरूपविस्मृतिश्चेतिपञ्चपर्वात्मिकाया अविद्याया विनि-वृत्तिस्तु—

वैराग्य सांख्ययोगौ च तपोभक्तिश्च केशवे ।
पञ्चपर्वेति विद्येयं ययाविद्वान् हरिं विशेत् ।।

इतिबन्धहेतुभूताया अविद्याया विनिवृत्त्यर्थं भगवद्भजनस्य परमावश्यकत्वम् । श्री मद्वल्लभाचार्याणां मते तु भक्तिर्मुक्तेर्गरीयसीति मन्यते । उक्तञ्च—'यदि भवति मुकुन्दे भक्तिरानन्दसान्द्रा विलुठति चरणाग्रे मोक्षसाम्राज्यलक्ष्मीः' इति ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी।
जरयत्याशु या कोशं निगीर्णमनलो यथा॥

(भा० 3.25,33)

भगवता कपिलेनापि स्वमातरं देवहूतिं प्रति मुक्तिप्रदत्वेन भक्तिरेवाङ्गीकृता प्रतिपादिता च। तथाहि—

चेतः खल्वस्य बन्धाय मुक्तये चात्मनो मतम्
गुणेषु सक्तं बन्धाय रतं वा पुंसि मुक्तये॥
अहं ममाभिमानोत्थैः कामलोभादिभिर्मलैः।
वीतं यदा मनःशुद्धमदुःखमसुखं समम्॥
तदा पुरुष आत्मानं केवलं प्रकृतेः परम्।
निरन्तरं स्वयं ज्योतिरणिमानमखण्डितम्॥
ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन चात्मना।
परिपश्यत्युदासीनं प्रकृतिञ्च हतौजसम्॥
न युज्यमानया भक्त्या भगवत्यखिलात्मनि।
सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये॥
प्रसङ्गमजरं पाशमात्मनः कवयो विदुः।
स एव साधुषु कृतो मोक्षद्वारमपावृतम्॥
मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम्।
मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः॥
मदाश्रयाः कथामृष्टाः शृण्वन्ति कथयन्ति च।
तपन्ति विविधास्तापा नैतान्मद्गतचेतसः॥

(भा० 3.25.15-20, 22, 23)

भक्तिरसास्वादनैकतत्परा महात्मानो भक्तशिरोमणयस्तु मुक्तिमनादृत्य भक्तिमेवाभिलषन्ति। तथाहि—

नैकात्मतां मे स्पृहयन्ति केचिन्मत्पादसेवाऽभिरता मदीहाः।
येऽन्योन्यतो भागवताः प्रसज्य सभाजन्ते मम पौरुषाणि॥

(भा० 3.25.34)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न साधिपत्यं ।
न योगसिद्धीरपुनर्भवं वा मर्य्यर्पितात्मेच्छति मद्विनाऽन्यत् ॥

(भा० 11.14.14)

त्रिभुवनविभवहेतवेऽप्यकुण्ठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् ।
न चलति भगवत्पदारविन्दाल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः ॥
भगवत उरुविक्रमाङ्घ्रिशाखानखमणिचन्द्रिकया निरस्ततापे ।
हृदि कथमुपसीदतां पुनः स प्रभवति चन्द्र इवोदितेऽर्कतापः ॥
विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः ।
प्रणयरशनया धृताङ्घ्रिपद्मः सभवति भागवतप्रधान उक्तः ॥

(भा० 11.2.53.55)

उपर्युक्तवचनैरेतत् सूपपादितं भवति यत् भगवदिच्छयैव लीलार्थंतिरोहितानन्दांशानां जीवानां पुनरानन्दांशाविर्भावार्थं स्वरूपोलब्धयेऽविद्याविनिवृत्तये च भक्तेः शिवतमो मान्यः पन्था इति । सा भक्तिः परमेश्वरे पुरुषोत्तमे परानुरक्तिरूपा भवति भक्तौ परत्वन्नाम फलाभिसन्धि राहित्यमिति । प्रह्लादेन स्पष्टमेवोक्तम्—यस्त आशिष आशास्ते न स भृत्यः स वैवाणिके (भा० 7.10.4) 'सा परानुरक्तिरीश्वरे (शाण्डिल्यभक्तिसूत्रम्) । देवर्षिणा नारदेनापि स्वकीये भक्तिसूत्रे 'सात्वस्मिन परमप्रेमरूपा' इति भक्तेः स्वरूपमुपदर्शितम् । नारदपञ्चरात्रेऽपि—

माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः ।
स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा ॥

स्वयं भगवता श्रीकृष्णेनोक्तं यत्—

न साधयति मां योगो न सांख्यं धर्म उद्धव ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥
भक्त्याहमेकया ग्राह्यश्श्रद्धयात्माप्रियः सताम् ।
भक्तिः पुनाति मन्निष्ठा श्वपाकानपि सम्भवात् ॥

(भा० 11.14. 20-21)

भगवत् परितोषणाय केवलं भक्तिरेव समर्था भवति, नान्यैर्गुणैर्भगवान् तथा परितुष्यति यथा तु भक्त्या । उक्तञ्चापि—

व्याधस्याचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का ।
कुब्जायाः किम् नाम रूपमधिकं किं तत् सुदाम्नो धनम् ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वंशः को विदुरस्य यादवपतेरुग्रस्य किं पौरुषं ।
भक्त्या तुष्यति केवलं न च गुणैर्भक्तिप्रियो माधवः ॥

गीतायामपि भगवता श्रीकृष्णेन स्वोपलब्धौ साधनत्वेन भक्तिरेव निर्दिष्टा। तथाहि—

नाहं वेदैर्न तपसा न दानेन न चेज्यया।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुञ्च परं तप ॥

(गी० 11.53-54)

अतो माहात्म्यज्ञानपूर्वकं सा भक्तिर्निःश्रेयसकामैः सर्वैरपि मानवैरहर्निशं निरन्तरं भगीरथप्रयत्नेन सम्पादनीया। नान्यथाऽस्ति कश्चिदेतादृश उपायो येनात्यन्तिकदुःखनिवृत्तिपूर्वकाक्षय्यसुखस्योपलब्धिः स्यात्। 'ऋते ज्ञानान्नमुक्ति' रित्यादिवाक्यानामप्ययमेवाभिप्रायो यत् भगवतो माहात्म्यज्ञानमन्तरा भगवति निरतिशया प्रीतिर्न भवितुमर्हति, तदभावे च का नाम मुक्तिरिति वक्तुमपि न शक्यते। उक्तञ्च—

नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्।
कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ॥

(भा० 1.5.12)

यथा वा सर्वाभरणभूषिता जगत्सुन्दर्यपियुवतिर्विवस्त्रा सती न शोभां समवाप्नोति, बीभत्सरूपा च प्रतीयते तथैव भक्तिविरहिता ज्ञप्तिरपि केवलं भारभूतैव भवति। गर्भस्तुतौ परमेष्ठिना तु विस्पष्टं प्रतिपादितं यद्—

येऽन्येऽरविन्दाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः।
आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः ॥
तथा न ते माधव तावकाः क्वचित् भ्रश्यन्ति मार्गात् त्वयि बद्धसौहृदाः।
त्वयाभिगुप्ता विचरन्ति निर्भया विनायकानीकपमूर्धसु प्रभो ॥
शृण्वन् गृणन् संस्मरयंश्चिन्तयन् नामानि रूपाणि च मङ्गलानि ते।
क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचेता न भवाय कल्पते ॥

(भा० 10.2.32-33, 37)

भगवता श्रीकृष्णेनापि श्रीमवद्भगद्गीतायामुक्तं यत्—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥ (गी० 9.26)

सुदामानं प्रति भगवानुक्तवान् 'किमुपायनमानीतं ब्रह्मन् मे भवता गृहात्। अण्वप्युपाहृतं भक्तैः प्रेम्णाभूर्येव मे भवेत्। भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते'॥

जीवानां ब्रह्मांशत्वे ब्रह्मरूपत्वात् भजनानुपत्तिरिति विप्रतिपत्तिमादाय भजनस्यावश्यकत्वसमर्थनरूपेण भक्तिविषये संक्षिप्तं प्रतिपादितम्। वस्तुतस्तु भक्तिस्वरूपविवेचनप्रकरणे भक्तेर्भेदादिकं विशदमभिधास्यते। अस्तु। श्रुतिस्मृतिसूत्रादिवचनैर्जीवस्य भगवदंशत्वे सिद्धेऽपि तत्परिमाणविषयेऽपि किञ्चिद् विचारणीयमेवावशिष्यते। यतः केषाञ्चिन्मते जीवानां व्यापकत्वं, केषाञ्चिन्मते देहपरिमाणत्वं, केषाञ्चिन्मतेऽणुपरिमाणत्वमिति विरुद्धनानामतानि विद्यन्ते तत्र कस्य मतस्य समीचीनत्वं कस्य वाऽसमीचीनत्वमिति शास्त्रदृष्ट्या विवेचनीयम्। तत्र शुद्धाद्वैतवेदान्तनये जीवानामणुपरिमाणत्वमेव समर्थितम्। तथाहि—

बालाग्रशतभागस्य शतधाकल्पितस्य च।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते॥
(श्वे० 5.1)

एषोऽणुरात्मा चेतसा वेदितव्यः (मु० 3.1.9)
स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्
सत्यं स आत्मा तत्त्वमसि श्वेतकेतो (छा० 6.8.7)

स यथोर्णनाभिस्तन्तुनोच्चरेद् यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति···' (बृ 2.1.20) तदेतत् सत्यं यथा सुदीप्ताद् पावकात् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः। तथाक्षराद्विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्ति' (मु० 21.1.1) इत्यादिश्रुतिवचनैर्जीवानामणुपरिमाणत्वं विस्पष्टमेवाभिहितम्। 'सरूपाः' इति सरूपवचनाज्जीवात्मनोऽपि परमात्मना सरूपा भवन्ति, अभिन्ना इति यावत्। ब्रह्मसूत्रेष्वपि जीवानामणुपरिमाणत्वमेव प्रतिपादितम्। तथा हि— 'उत्क्रान्तिगत्यागतीनाम्' (ब्र० सू० 2.3.19) उत्क्रान्तिगत्यागतीनां श्रवणाज्जीवानां परिच्छिन्नत्वमणुपरिमाणत्वञ्च स्फुटमेव प्रतीयते। उत्क्रान्तिस्तावत्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'स यदास्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामति' (कौषी॰ 3.3) गतिरपि 'ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेवते सर्वेगच्छन्ति' (कौषी॰ 1.2) आगतिरपि 'तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे' (बृ॰ 4.4.6)। अतः श्रुतिसूत्रप्रतिपादितोत्क्रमणादिभिर्जीवानामणुपरिमाणत्वं निर्विवादमेव। यत्र क्वचन 'सवा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु' (बृ॰ 4.4.12) 'आकाशवत् सर्वगतश्च नित्यः' 'सत्यज्ञानमनन्तं ब्रह्म' इत्येवंजातीयकाः श्रुतयो महत्परिमाणभिधायिन्यो लभन्ते, यास्तु परमात्मपरिमाण परकत्वेनोपपादनीया ब्रह्मप्रकरणस्थत्वात् तासाम्। जीवपरिमाणप्रकरणेतु 'बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यपरोऽपि दृष्टः' बालाग्रशतभागस्येत्यादि जातीयकैर्वचनैरणुपरिमाणमेव प्रतिपादितम्। ननु जीवस्याणुत्वे देहैकदेशस्थस्य तस्य सकलशरीरगतशीतोष्णत्वादैर्युगपदुपलब्धिर्विरुध्यते। जाह्नवीतौयादौनिमग्नस्य सर्वाङ्गशैत्योपलब्धिरातपतापितस्य च सर्वाङ्गतापानुभूतिर्जीवस्याणुत्वे सम्पूर्णशरीरवर्त्ति शैत्यादेयुगपदुपलब्धिरसम्भवेति चैन्न" अविरोधश्चन्दनवत्' (ब्र॰ सू॰ 2.3.23) यथा हि चन्दनैकबिन्दुः शरीरैकदेशसंलग्नोऽपि सर्वशरीरे सुखं शैत्यञ्चोत्पादयति। एवमेवाणुपरिमाणोऽपि जीवः शरीरैकदेशे हृदिस्थितोऽपि सकलशरीरवर्तिवेदनामनुभवत्येव ननु चन्दनविन्दोरैकदेशस्थितिः प्रत्यक्षतो गृह्यते अतस्तत्र तादृशीकल्पना कर्तुं शक्यते, न त्वत्र जीवे प्रत्यक्षत एकदेशस्थत्वं गृह्यते अतो जीवस्य प्रसारिचैतन्यगुणत्वमपि दृष्टान्तानुरोधान्न वक्तुं शक्यते इति चेन्न, प्रत्यक्षप्रमाणापेक्षया दृढतर-श्रुतिप्रामाण्यात् तस्य हृद्देशस्थायित्वनिश्चयात्। तथा हि—हृदि ह्येष आत्मा (प्रश्नो॰ 3.6) 'सवा एष आत्मा हृदि' (छा॰ 8.3.3) 'कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' (बृ॰ 4.3.7)। एवञ्च जीवस्याणुपरिमाणत्वे हृद्येकदेशस्थियत्वेऽपि सर्वशरीरगतसुखदुःखादेरनुभूतिस्तस्य प्रसरणशीलचैतन्यगुणत्वान्निर्वाधैव। प्रसरणशीलगुणत्वन्तु लोकेऽपि बहुषु पदार्थेषु दृष्टचरमेव। यथा मणिमार्तण्डादेरालोकस्तेषामेकदेशस्थितत्वेऽपि बहुदेशं व्याप्नोति, तथैव जीवस्यापि चैतन्यगुणः सर्वशरीरं व्याप्नोति। ननु मण्यादेः प्रभा तेजस्त्वाद् द्रव्यमेव न तु गुणः। अतो गुणानामधिकदेशवृत्तिता प्रभादृष्टान्तेन न कल्पयितुं शक्यत इति चेन्न, व्यतिरेको गन्धवत्' (ब्र॰ सू॰ 2.3.26) इतिसूत्रेण गन्धवद्द्रव्यव्यतिरेकेण यथा गन्धस्याधिकदेशवृत्तिता सर्वैरेवानुभूयतेअतो गुणानामप्यधिकदेशवृत्तित्वमङ्गयीकायमेव। न च तत्रापि गन्धोपलब्धिरवयवानां निःसरणेनैव संभवति, नान्यथेति वक्तुं शक्यते। अवयवानां निःसरणेन गन्धवद्द्रव्ये

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चम्पकरजनीगन्धादौ न्यूनत्वापत्तेः। भोग्यादृष्टत्वेन तदवयवपूर्तिकल्पनापेक्षया गुणानामप्यधिकदेशवृत्तिता स्वीकारे लाघवात । किञ्चोग्रगन्धादेः स्पर्शोक्ते सति मुहुर्मुहुर्मृदादिनाक्षालनेनापि गन्धानपगमोऽवयवानामनिर्गमने प्रमाणम्। अनेकचर्मपुटवेष्टितस्य मृगमदस्य सुगन्धोपलब्धेश्चाप्यवयवनिःसरणकल्पनानोचिता। किञ्च 'यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाति' (नारायणोपनिषद् 5.11) इति श्रुतेर्मया गन्धस्य द्रव्याधिकदेशवर्तित्वमेवं जीवस्य चैतन्यगुणोऽप्यधिकदेशवर्तीति सर्वथा बुद्धिगम्य एव। अवयवानां निःसरणकल्पनायान्तु गन्ध इव रसादेरपि ग्रहणं प्रसज्जेत। किञ्च चक्षुरिन्द्रियप्रणालिकया निर्गत्यान्तःकरणावच्छिन्नं चैतन्यं बहिःस्थितस्य घटादेरूपं चेद्ग्रहीतुं शक्नोति, तदा स्वशरीरगतसुखादिवेदनाग्रहणे काविप्रतिपत्तिः। तद्गुणसारत्वात्तु तद्व्यपदेशप्राज्ञवत्' (ब्र० सू० 2.3.29) इत्यत्र बुद्धिगुणेनाणुत्वमिति तु नैव वक्तुं शक्यते 'बुद्धेर्गुणेनात्मगुणेन न चैव आराग्रमात्रो ह्यवरोऽपि दृष्टः' (श्वे० 6.8) इत्यत्र आत्मगुणेन कथनाज्जीवस्यात्मगुणेनाप्यणुत्वमेव सिध्यति। 'अणोरणीयान् महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः। तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्' (नारायणो० 27) इत्यत्रापि जीवरूपेणाणोरणीयस्त्वं ब्रह्मरूपेण च महतो महीयस्त्वमेकस्यैव ब्रह्मण इति प्रतीयते। वस्तुतस्तु सर्वज्ञस्य सर्वशक्ति-सम्पन्नस्य सर्वविरुद्धधर्माश्रयस्य सर्वसमर्थस्य सर्वथास्वतन्त्रस्यापि भक्तपराधीनस्य स्तम्भान्नृसिंहरूपधारिणो ब्रह्मणो विषये 'जीवस्याणुत्वे कथं शरीरवृत्तिवेदनानुभव इत्यादीनां कुतर्काणामवसर एव नास्ति'। 'अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्' इति न्यायात्। जीवस्याणुत्वाभावे 'वालाग्रशतभागस्येत्यादिश्रुतीनां का गतिः स्यात्। 'स चानन्त्याय कल्पते' एतस्यापि वाक्यस्यायमेवार्थः प्रतीयते यत् स जीवोऽणुरपि ब्रह्मवेद ब्रह्मैव भवति' इति श्रुतेर्ब्रह्मभावे सति भगवद्धर्मविशे जाते व्यापकत्वमानन्त्यञ्च जायत इति। 'नित्यः सर्वगतस्थाणुरचलोऽयं सनातनः' इति गीतोक्तभगवद्वचनादपि जीवस्याणुत्वमेव सिद्धं भवति। तथा हि—अयं जीवो नित्यस्तथा सर्वगतस्थाणुश्चेति तत्र सर्वगतस्थाणुरिति समस्तमेकं पदं-सर्वगतेन ब्रह्मणा सह तिष्ठतीति सर्वगतस्थः सचासावणुश्चेति विग्रहः। अन्यथा स्थाणुपदस्याचलपर्यायत्वात् पुनरुक्तिदोषः प्रसज्जेत। सर्वगतेन ब्रह्मणा सहावस्थितौ 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरेकः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' इति श्रुतिरेव प्रमाणम्। (मु० 3.1.1) हनूमतापि मर्यादापुरुषोत्तमश्रीरामचन्द्रं प्रत्युक्तं यत् देहदृष्ट्यात्तु दासोऽहं जीवबुद्ध्या त्वदंशकः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वस्तुतस्तु त्वमेवाहमिति मे निश्चिता मतिः'। अर्थात् जीवो भगवदंश एव। फलतो जीवो भगवदंशोऽणुपरिमाणकोऽपि स्वीयप्रसारिचैतन्यगुणकत्वात् सर्वशरीरगतसुखदुःखादिकमनुभवितुं शक्नोति। नास्त्यत्र कश्चित् सन्देह इति। प्रतिपादितञ्च नारदपञ्चरात्रेऽपि लक्ष्मीतन्त्रे त्रयोदशाध्याये 'चैतन्यमस्य धर्मो हि प्रभाभानोरिवामला। तया स्फुरति जीवोऽसौ स्वत एवानुरूपया। इति संक्षेपेण जीवस्वरूपविषये प्रतिपादितम्।

आचार्यवर्यैः श्रीमच्छङ्कराचार्य-श्रीमद्रामानुजाचार्य-श्रीमन्मध्वाचार्यनिम्बार्काचार्य-श्रीमद्वल्लभाचार्यादिभिः प्राणिनामनादिकालतः संसारसागरे विविधविघ्नक्लेशाकुले जननमरणपरम्परापतितानां प्राणिनां समुद्धारार्थं ब्रह्मनिःश्वासभूतानामपौरुषेयाणां वेदानामनुशीलनात्मकोन्मथनं विधाय स्वस्वसिद्धान्तभूतरत्नानि समुद्धृतानि। उपनिषत् प्रतिपादिता त एव सिद्धान्तावेदान्तसिद्धान्तपदेन प्रायो व्यवह्रियन्ते। किन्तु वेदानां दुरवगाहत्वात् 'मुण्डे मुण्डे मतिर्भिन्ना' इति बुद्धिभेदाद्वा तेषामाचार्याणां सिद्धान्तेष्वपि सर्वथैकमत्यं नावलोक्यते उन्मथगोत्तरं विभिन्नवस्तुवांसमुः। श्रीमच्छङ्कराचार्याणां सिद्धान्ते 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' (श्वे० 6.19) इत्यादिश्रुतिवचनैर्नित्यशुद्धबुद्धमुक्तस्वभावं निर्गुणं निष्क्रियं सर्वविक्रियारहितं कूटस्थनित्यं ब्रह्मैव सत्यं तद्भिन्नं सर्वंमायिकमिति मिथ्या। तथा हि—

श्लोकार्द्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।
ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः॥

इति। श्रीमद्रामानुजाचार्याणां विशिष्टाद्वैतसिद्धान्ते भोक्तृभोग्यनियामकभेदेन चिदचिद्विशिष्टेश्वरस्य सत्ताङ्गीक्रियते। तदुक्तम्—

ईश्वरश्चिदचिच्चेति पदार्थत्रितयं हरिः।
ईश्वरश्चिदिति प्रोक्तो जीवो दृश्यमचित् पुनः॥

श्रीमन्निम्बार्काचार्याणां श्रीमन्माधवाचार्याणां च मते ब्रह्मजीवयोर्वास्तविकोभेदः स्वीक्रियते अभेदस्तुचित्त्वसाधर्म्यादिति द्वैताद्वैत प्रतिपादकास्ते। श्रीमद्भास्कराचार्याणां मतेऽप्युपाधितो भेदोऽभेदश्चेति एते सर्वेऽप्याचार्याः स्वीयं स्वीयं सिद्धातं श्रुतिमूलकत्वेनैव प्रख्यापयन्ति। किन्तु श्रीमद्वल्लभाचार्याणां दृष्टावेतेषु सर्वेष्वपि सिद्धान्तेषु यत्र तत्रांशे वेदविरोधोऽप्यवभासते। अत एतान् सर्वान् सिद्धान्तान् निरस्य श्रीमद्वल्लभाचार्याः स्वीये 'शुद्धाद्वैतवेदान्तसिद्धान्तं सर्वथा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रुतिमूलकं सर्वेषां विदुषां पुरः समुपस्थापितवन्तः। स एव श्रीमद्वल्लभाचार्य-प्रतिपादितसिद्धान्तोऽत्र संक्षेपेण विविच्यते।

तत्र तावत् सर्वतः प्रागस्त्येतद्विचारणीयं यत् किं नाम तावच्छुद्धाद्वैतं, कश्चार्थस्तस्य, किञ्च तल्लक्षणमिति। शुद्धाद्वैतपदस्य व्युत्पत्तिः कारिकाद्वयेन श्रीमद्गिरिधराचार्यैः शुद्धाद्वैतमार्तण्डे प्रतिपादिता। तद्यथा—

शुद्धाद्वैतपदे ज्ञेयः समासः कर्मधारयः।
अद्वैतं शुद्धयोः प्राहुः षष्ठीतत्पुरुषं बुधाः॥

मायासम्बन्धरहितं शुद्धमित्युच्यते बुधैः।
कार्यकारणरूपं हि शुद्धं ब्रह्म न मायिकम्॥
(शुद्धा० 27, 28)

शुद्धं च तदद्वैतमिति कर्मधारयसमासे विग्रहः। षष्ठीतत्पुरुषेतु शुद्धयोरद्वैतमिति। मायासम्बन्धराहित्यविशिष्टं ब्रह्म शुद्धपदवाच्यमिति। तथा च मायासम्बन्ध-रहितस्यैव शुद्धस्य ब्रह्मणः कार्यकारणरूपेण अंशांशित्वरूपेण वाऽद्वैतमिति शुद्धाद्वैतपदवाच्यमित्यर्थः। तल्लक्षणन्तु-इतरसम्बन्धानवच्छिन्नकार्यकारणा-दिरूपद्वित्वप्रकारकज्ञानप्रतियोगिताकाभाववत्त्वमिति। प्रमाणितश्चायमर्थः श्रुति-सूत्रस्मृत्यादिभिः। तद्यथा—

एकमेवाऽद्वितीयं ब्रह्म (छा० 6.2.1)
पुरुष एवेदं सर्वम् (ऋ० 10.90.2)
ऐतदात्म्यमिदं सर्वम् (छा० 6.8.7)
स वै सर्वमिदं जगत्

इत्यादिश्रुत्या ब्रह्म सजातीयविजातीयस्वगतभेदवर्जितम् इति ध्वनितम्। तद्भिन्नस्य द्वितीयस्याभावादेव भेदत्रयशून्यमित्यर्थः। न चेदन्तया साक्षात् प्रतीयमानस्य प्रपञ्चस्य सत्त्वात् कथं द्वितीयाभावत्वमिति चेन्न, 'पुरुष एवेदं सर्वम्', 'ऐतदात्म्यमिदं सर्वम्', स वै सर्वमिदं जगत्' इत्यादिश्रुतिसहस्रेण रमणे-च्छया प्रपञ्चरूपेण ब्रह्मण एवाविर्भावात्। तत्र जीवेषु चेतनत्वात् सजातीयत्वं, जडत्वात् प्रपञ्चे विजातीयत्वमन्तर्यामिषु च स्वगतत्वमिति प्रतीयमानसजातीय-त्वादिकं मिथ्याप्रत्ययनिमित्तकम्। तत्र सर्वत्रैव ब्रह्मणोऽनुस्यूतत्वात्। अत-एवोक्तम् 'एकमेवाऽद्वितीयं ब्रह्म' (छा० 6.2.1) 'पुरुष एवेदं सर्वम्' (ऋ० 10.90.12), 'ऐतदात्म्यमिदं सर्वम्' (छा० 6.8.7) इत्यादि। 'सदैव सौम्येद-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मग्र आसीत्' (छा० 6.2.1) अत्र एवेतिपदमन्यव्यवच्छेदार्थम् । अतो द्वितीयाभावादेव 'स आत्मानं स्वयमकुरुत' (तै० 2.7.1) जडजीवान्तर्यामिरूपेण स भगवान् पुरुषोत्तमः स्वयमाविर्भूत इत्यर्थः । इत्येतत् सर्वं ब्रह्मवादे श्रीमद्धरिरायविरचिते विशदं प्रतिपादितम् । एतेन वैनाशिकाद्वैवैनाशिकानामसत्त्वविनाशित्वे, मायावादिनां मायिकत्वञ्च सर्वथा निरस्तं भवति ।

'स वै सर्वमिदं जगत्' । 'सर्वं खल्विदं ब्रह्म' (छा० 3.14.1) इत्यादि श्रुतयः सडिण्डिमघोषं समस्तस्य प्रपञ्चस्य साक्षात् ब्रह्मात्मकत्वमुद्घोषयन्ति । सत्यप्येवं प्रपञ्चस्य मायिकत्वमाश्रित्य मिथ्यात्वप्रतिपादनादिकं सर्वथाऽसंगतमेव दुःसाहसश्च प्रतिभाति । 'पुरुष एवेदं सर्वं यद्भूतं यच्चभाव्यम्' (ऋ० 10.90.2) एतस्या ऋचो व्याख्या श्रीगोपालकृष्णभट्टैर्ब्रह्मवादस्य टीकायां या कृतास्ति, तयापि प्रपञ्चस्य साक्षात् ब्रह्मस्वरूपत्वमेव विज्ञायते । तथाहि 'इदं सर्वं यद्भूतं यच्चभाव्यं, भूतत्वेन भाव्यत्वेन च व्यवह्रियमाणमिदं घटपटात्मकं नामरूपेण भिन्नतया परिदृश्यमानमपि सर्वं जगत् पुरुष एव । एतस्मिन्नुपादानकरणत्वेन पुरुषोत्तमस्यैवानुस्यूतत्वात् पुरुषोत्तम एव, नान्य इत्यर्थः । एवकारस्यात्रान्यव्यवच्छेदार्थकत्वात् । यतो 'जन्माद्यस्य यतः' (ब्र० 1.1.2) 'यतो वा इमानि भूतानि जायन्ते' (तै० 3.1) 'तत्तु समन्वयात्' (ब्र० 1.1.4) इत्यादिश्रुतिसूत्रेषु पञ्चमीसमवायिकारणमेव वक्ति । एवञ्च 'ऐतदात्म्यमिदं सर्वम्' (छा० 6.8.7) एतस्या अपि श्रुतेर्व्याख्योपक्रमे 'अपि वा तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवति' इत्यादिनैकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातम् । तदेकमेव चेत् सर्वं भवेत्तदोपपद्यते । यथा सुवर्णखण्डाः सुवर्णकार्यञ्च सर्वं सुवर्णमिति सुवर्णज्ञाने तज्ज्ञानं भवति । एवमेवैकस्य ब्रह्मणो ज्ञानेन समस्तस्य जडजीवात्मकस्य प्रपञ्चस्य ब्रह्मरूपता स्फुटमेव प्रतीयते । वेदान्तपरिभाषाकारेण तु 'निखिलजगदुपादानत्वं ब्रह्मणो लक्षणे' स्वीकृत्योपादानपदेन च 'जगदध्यासाधिष्ठानत्वं, जगदाकारेण विपरिणममानमायाऽधिष्ठानत्वं वेति मत्वा 'इदं सर्वं यदयमात्मा' 'सच्च त्यच्चाऽभवत्' (तै० 2.6) 'बहुस्यां प्रजायेय' (तै० 2.6) इत्यादिश्रुतिषु ब्रह्मप्रपञ्चयोस्तादात्म्यव्यपदेशः' इति यत् प्रतिपादितं तत्सर्वथा निर्मूलमेव । यतः 'तत्तु समन्वयात्' (ब्र० 1.1.4) इत्यस्मिन् सूत्रे श्रीमद्वल्लभाचार्यैः 'समन्वयादिति पदस्य सम्यगनुवृत्तत्वादित्यर्थः कृतः । सम्यगनुवृत्तत्वञ्चानारोपितानागन्तुकरूपेणान्वितत्वामिति च । तादात्म्यसम्बन्धेन यदाश्रयं कार्यं भवति, तत्समवायिकारणम् । अस्यैव समवायिकारणस्यावस्थाविशेष उपादानम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तल्लक्षणञ्च स्वसमानसत्ताककार्याकारेण यदाविर्भवति तदुपादनम् । अतो घटे मृत्तिकेव जगत्यनारोपितानागन्तुकरूपेणास्ति, भाति प्रियाणां सच्चिदानन्दात्मकानामनुवृत्तत्वात् ब्रह्मैव जगदाकारेण रमणेच्छयाऽऽविर्भूतम् इति सिध्यति ।

ननु प्रत्यक्षतो नानात्वदर्शनेन कथं सर्वस्यैकरूपतेति चेन्न, 'नेह नानास्ति किञ्चन' (बृ० 4.4.19) इति श्रुत्या नानात्वस्य निषेधात् । शुद्धाद्वैतवेदान्तप्रवर्तकानां श्रीमद्वल्लभाचार्याणां तदनुयायिनाञ्च वेदे निरतिशया श्रद्धावर्तते । ते तु वेदस्याक्षरमात्रमप्यन्यथार्थकमर्थवादार्थकं वा नाङ्गीकुर्वन्ति । श्रीमद्वल्लभाचार्यास्तु वदन्ति यत् 'वेदश्च परमाप्तोऽक्षरमात्रमप्यन्यथा न वदति' । अन्यथा सर्वत्रैव तदविश्वासप्रसङ्गात् । 'वेदेऽक्षरमात्रमन्यथाकल्पनेऽपि दोषः स्यात्' । 'तस्माद्वेदेऽक्षरमात्रस्याप्यसत्यार्थज्ञानस्याभावात् वैदिकानां न सन्देहः' इत्यादि । तस्माद् श्रीमद्वल्लभाचार्यप्रतिपादितशुद्धाद्वैतवेदान्तसिद्धान्तः सर्वथा वेदसम्मतत्वात् सर्वैः सुधीभिः समाजनीय एव । नानात्वप्रतीतिस्त्वविद्ययाऽब्रह्मदृशां भासते, न तु ब्रह्मदशामिति । तत्र ब्रह्मवाद एव श्रीगोस्वामिश्रीमद्धरिरायचरणैः प्रतिपादितम् यद् 'ननु वस्तुतोऽतथात्वे कथं तथा प्रतीतिरिति चेन्न' । सितामूर्तांविवनानात्वप्रतीतावप्येकरूपत्वेन वस्तुतस्तथात्वाभावात् । अतएव न ब्रह्मदृशां तथा प्रतीतिः स्वरूपमात्रदृष्टित्वात् । ये पुनर्बहिर्दृष्टयस्तेषामेव तथात्वमानान्नवस्तुनि तथात्वम् । तात्पर्यन्तिविचाराभावेन तद्दृष्टेरसम्मतत्वात् । अत एव विचारसिद्ध्यर्थकत्वेन शास्त्रसार्थक्यम् । अतएव अखण्डं कृष्णवत् सर्वमित्याचार्यवर्याः (त० दी० नि० 2.1.18) । तस्मात् सर्वरूपमद्वयं ब्रह्मेति सिद्धम् ।' श्रीमद्गोपालकृष्णभट्टैश्च ब्रह्मवादविवरणे विस्पष्टीकृतं यद् अनानात्वेऽपि नानात्वप्रतीतिः यथा वालानां क्रीडार्थंसितायाः कङ्कणाद्याभरणानि, मन्दिराणि, हस्त्यश्वादिमूर्तीश्च कुर्वन्ति, भवति च तासु वालानां नानात्वप्रतीतिः । किन्तु तासां मूर्तीनां सितात्वेनैकरूपत्वात् सितारूपवस्तुनो न नानात्वम् । तथैव ब्रह्मणः सर्वरूपत्वेऽपि ब्रह्मत्वेन न नानात्वमिति । सारांशस्त्वयं यद् शुद्धाद्वैतवेदान्तमते 'सर्वं खल्विदं ब्रह्म (छा० 3.14.1) इति श्रुत्या यत् किमपि निखिलब्रह्माण्डे चेतनाचेतनात्मकवस्तु विद्यते, तत् सर्वं ब्रह्मैव न ततो भिन्नं, न वा मायिकत्वेन मिथ्येति । 'स आत्मानं स्वयमकुरुत' (तै० 2.7.1) इत्यादिश्रुत्या सर्वथैवं प्रतीयते यत् ब्रह्मैव तत्तन्नानानामरूपाभ्यां प्रपञ्चरूपेणाविर्भूय विचित्रां लीलां करोतीति । वाचारम्भणश्रुत्या विकाराणां स्वदोषेण प्रतीतानामवास्तवत्व मिथ्यात्वं वा वक्ति, न तु वस्तुनि ब्रह्मात्मके मिथ्यात्व-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मिति । उक्तञ्च ब्रह्मवादकारिकायाम्—

अवास्तवं रूपमेतद्वाचारब्धं विकारि यत् (ब्रह्मवाद 4)
ब्रह्मबोधेऽनृतस्यापि ब्रह्मत्वात्प्रत्ययस्तथा
यावद्बोधं तु सत्यस्यासत्यस्य कथनं पुनः,
पश्चात् सर्वस्य सर्वत्वं नानृतं किञ्चिदस्ति हि,
देहादयोऽनृतं तावद् यावत् कार्यतया मतिः,
तन्निवृत्तौ पुनः सर्वं ब्रह्मरूपं न संशयः
देहादिष्वपि भक्तानां वियुक्तानां हरेर्मतिः
कार्यं च तादृशं लीलानुकृतौ तेषु दृश्यते ॥
(ब्रह्मवाद कारिका 5-8)

शुद्धाद्वैतमार्तण्डेऽप्यद्वैतपदस्यनिर्वचनस्वरूपत्वेन सर्वस्य प्रपञ्चस्य शुद्धब्रह्मत्वमेव प्रतिपादितम् । तथाहि—

द्विधाज्ञानं तु यद्यत् स्यान्नामरूपात्मना मुहुः ।
ईशजीवात्मनावापि कार्यकारणतोऽथवा ॥
द्वैतं तदेवद्वैतं स्यादद्वैतं तु ततोऽन्यथा ।
सर्वं खल्विदं ब्रह्मतज्जलानिति पठ्यते ॥
(शु० मा० 3, 4)

इत्यनेन कार्यकारणादिरूपद्वित्वप्रकारकज्ञानाभावस्यैवाद्वैतपदवाच्यतेति 'सर्वं खल्विदं ब्रह्म' तज्जलानितिश्रुतिस्वारस्येन समर्थितम् । ईश जीवात्मनापि अंशांशिभावत्वेनापि कार्यकारणरूपेणापि यद् यज्ज्ञानं भवति, तत् सर्वं शुद्धाद्वैतवेदान्तानुसारं द्वैतपदवाच्यमेवेत्युल्लिखितकारिकाद्वयेन स्पष्टमेव प्रतिपादितं भवति । ततोऽन्यथा अर्थात् कार्यकारणादिभेदज्ञानशून्यं यत् 'सर्वं खल्विदं ब्रह्मे'ति' ज्ञानं संशयविपर्ययान्यादिरहितं जायते, तदेवाद्वैतमिति । 'सर्वं खल्विदं ब्रह्म' इत्येतच्छ्रुत्यर्थोऽपि तत्रैव प्रदर्शितः । तथाहि—

'सर्वं ब्रह्मात्मकं विश्वमिदमाबोधितं पुरः ।
सर्वशब्देन यावद्धि दृष्टश्रुतमवो जगत्,
बोध्यते तेन सर्वं हि ब्रह्मरूपं सनातनम् ।

सनातनमिति पदेन सदा वर्तन्ते नित्यमित्यर्थः । 'सन्मूलाः सौम्येमाः प्रजाः,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सदायतनाः सत्प्रतिष्ठाना इति। 'कथमसतः सज्जायेत, यदिदं किञ्च तत्सत्यमित्याचक्षते' इत्यादिश्रुतेः सर्वस्य सत्यत्वं सदावर्तमानत्वञ्च प्रतीयते अतो जगतोमायिकत्वेनासत्यत्वप्रतिपादनं न कथमपि युक्तिसंगतं प्रतिभाति। जगतोऽसत्यत्वेन ज्ञानस्यासुरत्वं गीतायामुक्तम्। तथाहि—

प्रवृत्तिञ्च निवृत्तिञ्च जना न विदुरासुराः। (गी० 16.7)
असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम्॥ (गी० 16.8)

विश्वस्य नित्यत्वेऽपि कार्यस्य विश्वस्य मृद्घटयोरिव कार्यकारणयोरैक्यान्न द्वैतापत्तिरितिभावः। 'कार्यस्य विश्वरूपस्य ब्रह्मैव स्यात्तुकारणम्' (शु० मा० 6) इति वचनाद् ब्रह्मकारणकं विश्वं, न तु तदतिरिक्तं मायिकमिति 'ब्रह्मैवेत्यत्रैव पदस्य महिम्ना ब्रह्मभिन्नकारणस्यनिषिद्धत्वात्। तस्य च ब्रह्मणो लक्षणमपि शुद्धाद्वैतमार्तण्डे साकारत्वं सर्वशक्तिमत्त्वं सर्वज्ञत्वं सर्वकर्तृत्वञ्च प्रतिपादितम्. तथाहि—

साकारं सर्वशक्त्येकं सर्वज्ञं सर्वकर्तृ च।
सच्चिदानन्दरूपं हि ब्रह्म तस्मादिदं जगत्॥

(शु० मा० 8)

तस्य साकारत्वे च 'विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्। संबाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमीजनयन् देव एकः' (श्वेता० 3.3) इति श्रुतिरेव प्रमाणम्। एतेन साकारस्य व्यापकत्वं सिध्यति। पुरुषसूक्तेऽपि 'सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपाद्' इति साकारत्वं प्रतिपादितम् गीतायामपि—

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम्।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥

(गी० 13.13)

'आनन्दमात्रकरपादमुखोदरादि' (नारदपाञ्चरात्रे)
अथवा परमात्मानं परमानन्दविग्रहम् (याज्ञवल्क्यस्मृतौ) ननु
अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः सशृणोत्यकर्णः।
(श्वे० उ० 3.19)

अस्थूलमनण्वादिनिषेधात् कथं साकारत्वमिति चेन्न, अपाणिपादत्वे जवनत्व-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रहीतृत्वयोरसम्भवामूल्लौकिकपाणिपादादिनिषेधपरं तदिति। अनेन ब्रह्मणोऽप्राकृत पाणिपादादिमत्त्व-साकारत्वमपि सिद्धमेव। सर्वशक्तिमत्त्वन्तु सर्वैरेवाचार्यैः श्रीमच्छङ्कराचार्यादिभिरपि स्वीक्रियत एव। 'परास्यशक्तिर्विविधैव श्रूयते स्वाभाविकीज्ञानबलक्रिया च' (श्वे० 6.8) इत्यादिश्रुतयोऽत्रानुसन्धेयाः। एव साकारत्वं सर्वशक्तिमत्वञ्च श्रुति-प्रमाणतः संसाधितम्। सर्वज्ञत्वं सर्वकर्तृत्वञ्चापि—

यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः।
तस्मादेतद्ब्रह्मनामरूपमन्नञ्च जायते॥ (मु० 1.1.9)

सर्वकर्ता सर्वभोक्ता चेत्यादिवचनैर्ब्रह्म 'साकारं सर्वशक्त्येकं सर्वज्ञं सर्वकर्तृ चेति' सप्रमाणं संसाध्यतस्क 'आनन्दो ब्रह्मेति व्यजानात्' (तै० 3.6) विज्ञानमानन्दं ब्रह्म (बृ० 3.18) 'विज्ञानं ब्रह्मेति व्यजनात्' (तै० 3.5) इत्यादिश्रुतिभिः तस्य सच्चिदानन्दरूपत्वमपि प्रतिपादितं भवति। तस्मादेवास्य प्रपञ्चस्य जडजीवान्तर्याम्यात्मकस्याविर्भावो भवति, नतूत्पत्तिः 'यतो वा इमानि भूतानि जायन्ते' इत्यत्र 'जनी' धातोः प्रादुर्भावार्थकत्वात्। तत्तु ब्रह्मैकमेव 'एकमेवाद्वितीयं ब्रह्मेति श्रुतैः' (छा० 6.2,1) अतो द्वैतवादसिद्धांतः सिध्यति।

रमणार्थमिदं सर्वं ब्रह्मैव स्वेच्छयाऽभवत्।
यथा सर्पः स्वेच्छया हि कुण्डलाकारतां गतः॥
(मु० भा० 12)

एकाकी न रमते स द्वितीयमैच्छत् स हेतावानास'
(बृ० 1.4.3)

'स आत्मानं स्वयमकुरुत' (तै० 2.7.1) इत्यादिश्रुतिस्वारस्याद् ब्रह्मणोऽतिरिक्तस्य सूक्ष्मचिदचिदात्मकस्य मायादेर्वा कल्पना सर्वथा निर्मूलैव प्रतिभाति।

न च प्रपञ्चरूपेण ब्रह्मण आविर्भावे तस्मिन् विकारित्वमायातीति चेन्न। 'उभयव्यपदेशात्त्वहि कुण्डलवत्' (ब्र० सू० 3.2.27) 'प्रकाशाश्रयद्वातेजस्त्वात्' (ब्र० सू० 3.2.28) इति सूत्रद्वयेन श्रीव्यासपादैरेवेतत् समर्थितं यत् श्रुतौ क्वचिज्जीवब्रह्मणोर्भेदः। प्रतिपाद्यते क्वचिच्चाभेदः। तथाहि—ततस्तु तं पश्यते ध्यायमानः' (मु० 3.1.8) इत्यत्र ध्यातृध्यातव्यत्वेन द्रष्टृ-द्रष्टव्यत्वेन च भेदः। एवञ्च 'परात्परं पुरुषमुपैति दिव्यम्' (मु० 3.2.8) इत्यत्र गन्तृगन्तव्यत्वेन

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भेदः। 'यः सर्वाणि भूतान्यन्तरो यमयतीति नियन्तृनियन्तव्यत्वेन भेदः प्रतिपादितः। अन्यत्र तु 'तत्त्वमसि श्वेतकेतो' (छा० 6.8.7) 'अहं ब्रह्मास्मि' (बृ० 1.4.10) इत्यादावभेदः प्रतिपाद्यते। जातेऽपि कुण्डलाकारे नाऽह्यौ मनागपि विकारित्वं समायाति। एवमेव ब्रह्मणः प्रपञ्चरूपेण विपरिणामेऽपि निर्विकारित्वमक्षुण्णमेव तिष्ठति। उक्तञ्च—

न विकारितथा ब्रह्मव्यासैः सूत्रे निरूपितम्।
सुवर्णस्याविकारित्वं कामधेनोर्मणेरपि ॥

(शु० भा० 13)

श्रीरामकृष्णभट्टविरचिते 'प्रकाशाख्ये' विवरणे सुस्पष्टं प्रतिपादितं यद् 'उभयोविरुद्धयोर्धर्मयोर्व्यपदेशाद् अर्थान्निर्गुणत्वेन सगुणत्वेन; परिणामित्वेनाविकारित्वेन च विरुद्धधर्मरूपेण श्रुतौ कथनात् सर्वाकारं ब्रह्मेत्यर्थः। यथा सर्पः सरलः कुण्डलाकारश्च भवति, तद्वद् ब्रह्म सर्वाकारं भवति। न हि सर्पस्य कुण्डलाकारे कोऽपि विकारः। अणुभाष्ये तु सर्वाणि तैजसान्यविकृतानीत्युक्तम्। एवञ्च सुवर्णस्यानेकाकारत्वेऽपि न सुवर्णस्यान्यथाभावः। सुबोधिन्यां तु कामधेनु कल्पद्रुमचिन्तामणिभ्यश्च जायमानाः पदार्था दृश्यन्ते। तेन न कामधेन्वादीनां विकृतत्वमित्युक्तम्। एतेनैतत् सुसिद्धं भवति यद् भगवानेव स्वकीयानन्तशक्त्या स्वरमणार्थं प्रपञ्चरूपेणाविर्भूय विचित्रां लीलां करोतीति ब्रह्मप्रपञ्चयोर्नास्ति कश्चिद्भेद इति। न चैवं प्रपञ्चस्य घटपटादेरुत्पत्तिविनाशदर्शनेन ब्रह्मणोऽपि घटपटादेरिवानित्यतास्यादिति चेन्न। घटपटादयोऽपि सर्वे नित्या एव। केवलमाविर्भावतिरोभावावेव तेषां भवतो न तु जन्मनाशाविति।

आविर्भावतिरोभावौ पदार्थानां यतस्ततः।
नाऽनित्यता तु विज्ञेया शास्त्रविद्भिर्विचक्षणैः॥

(शु० भा० 14)

निबन्धे श्रीमद्वल्लभाचार्यैरप्युक्तम्—

मृदादिभगवद्रूपं घटाद्याकारसंयुतम्।
मूलेच्छातस्तथा तस्मिन् प्रादुर्भावो हरेस्तदा॥

'तदेतदक्षयं नित्यं जगन्मुनिवराखिलम्। आविर्भावतिरोभावजन्मनाशविकल्पवत्'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(विष्णुपुराणे प्रथमेंऽशे) श्रीमद्भागवतेऽपि सर्वस्य प्रपञ्चस्य ब्रह्मरूपेता स्पष्टमेवाभिहिता । तथा हि—

यत्र येन यतो यस्य यस्मै यद् यद् यथा यदा ।
स्यादिदं भगवान् साक्षात् प्रधानपुरुषेश्वरः ॥ (भा०

यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु ।
एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकैर्जनैः ॥
(भा० 12.4.31)

यथा सुवर्णं स्वकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य ।
तदेवमध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत् ॥
(भा० 11.28.19)

'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् (छा० 6.1.4) इत्येच्छ्रुतिमूलको ब्रह्मप्रपञ्चयोरभेदः सम्यक् प्रतिपादितः शुद्धाद्वैतमार्तण्डे । तथा हि--

यथा सौम्येत्यादिश्रुतौ स्पष्टमेव निरूपितम् ।
तथा तत्त्वमसीत्यत्राभेदोंऽशांशिविचारतः ॥
(शु० भा० 21)

अयमाशयः—यथा मृत्तदवयवयोरभेदोंऽशांशिभावमादायभवति, तथैव दार्ष्टान्तिके ब्रह्मप्रपञ्चयोरप्यभेदो दृष्टान्तवलात् सुस्पष्टमेव । किन्त्वत्र 'तत्त्वमसीति' महावाक्ये सर्वेषां सम्प्रदायप्रवर्तकानामाचार्याणां तदनुयायिनाञ्च नास्त्यैकमत्यम् । तत्र सर्वेषां मतसङ्ग्रहात्मकोऽयं श्लोको वर्तते । यथा—

केचित्तत्त्वमसीति वाक्यविषये तत्त्वं पदे लक्षणाम्,
केचित्तत्र‌ङ्सोलुकं विवधते भाव्यन्तु केचिज्जगुः ।

केचिच्चिद्विषयादभेदमपरे छिन्दन्त्यतत्त्वं पदम्,
सिद्धान्ते तु सुवर्णवज्जगदिदं ब्रह्मैव, जीवस्तदा ॥

अस्यश्लोकस्यायमभिप्रायः—केचिच्छङ्कराचार्यास्तच्छब्देन सर्वज्ञत्वादिविशिष्टं ब्रह्म, 'त्वं'शब्देन स्वल्पज्ञत्वादिविशिष्टो जीवस्तयोरभेदस्तु न सम्भवतीति सर्वज्ञत्वाल्पज्ञत्वयोर्भागयोस्त्यागेन सोऽयं देवदत्त इतिवत् केवलचिदंशमात्रमादायाभेदः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति प्रतिपादयन्ति। अतस्तेषां मते 'तत्त्वमसी'ति वाक्ये भागत्यागलक्षणा क्रियते। अन्ये श्रीमद्रामानुजमाध्वशैवाः 'तत्त्वम्' इत्यत्र 'सुपां सुलुक् पूर्वसवर्णाच्छेया-डाड्यायाजालः (अष्टा० 7.1.39)' इति पाणिनीयसूत्रेण ङस् विभक्तेर्लुकं विदधते। तेषां मते तस्य त्वमसि तत्सम्बन्ध्यसीत्यर्थो भवति। सम्बन्धश्च सेव्यसेवकभाव इति। केचिद्रामानुजाचार्यादिमतव्याख्यातारो व्याकरणमहा-भाष्यमुद्गिरन्ते 'अचः परस्मिन् पूर्वविधौ' (अष्टा० 1.1.57) इति सूत्रे भाष्यकारेणोक्तं 'प्रातिपदिकनिर्देशे यां यां विभक्तिं बुद्धिरुपजायते सा साश्र-यितव्येति' तत्त्वमसीतिवाक्ये तदिति प्रातिपदिकमिति षष्ठीविभक्तिराश्रयणी-येति। अपरे निम्बार्काचार्यश्चिद्विषयादर्थाच्चित्वसाधर्म्यादभेदं प्रतिपादयन्ति। 'स आत्मा तत्त्वमसि श्वेतकेतो' इत्यत्र (छा० 6.10.3) केचिन्माध्वैकदेशिनः 'अतत्त्वमसीति पदं छिन्दन्ति। अर्थस्तु त्वं तद्भिन्नो जीवोऽसि। एवं तत्त्वम-सीति वाक्यार्थविषये सर्वेषामाचार्याणां वैमत्यं वर्तते। शुद्धाद्वैतवेदान्ते तु 'सिद्धान्ते तु सुवर्णवज्जगदिदं ब्रह्मैव, जीवस्तथा' अर्थात् यथा सुवर्णस्य खण्डा सुवर्णविकाराश्च सर्वे सुवर्णांशत्वात् सुवर्णमेव। एवं ब्रह्मांशत्वात् सम्पूर्णं जगज्जीवाश्च सर्वे ब्रह्मैव। न ततो किञ्चिद्भिन्नमिति। तत्त्वमसीतिवाक्यार्थ-विषये पूर्वप्रतिपादिताचार्याणां मतखण्डनात्मकोऽपि श्लोकः शुद्धाद्वैतवेदान्तविद्-भिर्निगद्यते। यथा—

तत्रोपक्रमसंगतिर्बहुविधा भग्ना प्रतिज्ञाश्रुतिः,
भक्तिः स्याद् यदि न त्वमेव कथयेद्, भेदे चनो तुल्यता।
साधर्म्येऽपितु भेद एव रसितश्छेदो न सम्यग् यतः,
सिद्धान्तः श्रुतिसम्मतो विलसति प्राज्ञैर्विचार्यं मुहुः॥

अस्यायमर्थः—श्रीमच्छङ्कराचार्यादीनां व्याख्यानेषूपक्रमस्य संगतिर्बहुभिः प्रकारै-र्भग्ना भवति। तथा हि—उपक्रमे 'अपि वा तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भव-त्यमतं मतं भवत्यविज्ञातं विज्ञातं' भवति (छा० 6.1.3) इत्येकविज्ञानेन सर्व-विज्ञानं प्रतिज्ञातम्। तदेकमेव सर्वं भवेत्, तदा सम्भवति। यथा सर्वे मृण्मयाः मृद्रूपा एवं सुवर्णखण्डा वा भूषणादयः सर्वे सुवर्णमेव। अत एकज्ञानेन सर्वज्ञानं भवितुमर्हति। एवमेव सर्वं विश्वं चेद्ब्रह्मैव भवेत्, तदैकेन ब्रह्मज्ञानेन सर्व-विज्ञानं संभाव्यते, नान्यथा। यथा वा मृत्तिकाया मृण्मयादीनां चैक्यमिति ज्ञानार्थं लक्षणा नैवाश्रीयते, तथैव ब्रह्मप्रपञ्चोरुभयोर्ब्रह्मरूपत्वाल्लक्षणाश्रयणं निष्प्रयो-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जनमित्यर्थः । 'स य एषोऽणिमैतदात्म्यमिदं सर्वं, तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' (छा० 6.8 7) इत्यत्र यथा 'ऐतदात्म्यमिदं सर्वम्' इत्यत्र सदंशे न भागत्यागलक्षणा, तथोत्तरत्रापि 'तत्त्वमसि' इत्यत्र चिदंशेऽपि न भागत्यागलक्षणेति विस्पष्टीकृतं श्रीमद्रामकृष्णभट्टैः प्रकाशाख्यव्याख्यायाम् । ये तु श्रीमद्रामानुजादयस्तन्मतव्याख्यातारश्च 'ङस् विभक्तेर्लुकं मत्वा तस्य त्वमसीत्यर्थं कुर्वन्ति, तेषां मते तत्सम्बन्ध्यसीति व्याख्यान' एकविज्ञानेन सर्वविज्ञानमिति प्रतिज्ञाभङ्गरूपदोष आपततीति तेषां व्याख्यानमप्यसंगतमेव । श्रीनिम्बार्काचार्याणां मते तु जगद्ब्रह्मणोरैक्यबोधकत्वमेव नास्ति । श्रीमद्भास्कराचार्याणां मतेऽपि जीवस्यांशत्वमुपाधिकृतमित्युच्यते । अणुत्वमपि जीवानां तेषां मते मनसो लिङ्गशरीरस्य चाणुत्वान्मन्यते । वस्तुतस्तुव्यापकत्वं तेषाम् । अतः सोपाधिको भेदो वास्तविकश्चाभेद इति सर्वथा भेदाभावप्रतिपादनाभावान्न समीचीनम् । चित्त्वसाधर्म्यादभेद इति वादिनां मते तु वस्तुतो भेद एव प्रतिपाद्यते तस्मात् सोऽपि सिद्धान्तो हेय एव । 'सर्वं खल्विदं ब्रह्म' इत्ययम् सिद्धान्तः शुद्धाद्वैतवेदान्तसम्मतः सर्वथा श्रुत्यादिप्रमाणानुसारित्वात् सर्वेभ्य एव सिद्धान्तेभ्य उत्कृष्टत्वेन विद्योतते । अत्र स्वयं विद्वद्भिस्तथ्यातथ्यं विचारणीयम् ।

भेदवादिनां मिथ्यावादिनाञ्च मत एकविज्ञानेन सर्वविज्ञान प्रतिज्ञाभङ्गोऽनिवार्य एव स्याज्जगतो भिन्नत्वात् । न हि सुवर्णज्ञाने मृद्विकारा ज्ञायन्ते, किन्तु सुवर्णविकारा एव । वास्तविकभेदाभेदवादिनां मतेऽपि भेदज्ञानस्य वास्तविकत्वेनोपक्रमविरोधः प्रतिज्ञाहानिश्च जायत एव । लक्षणास्वीकारेऽपि 'गङ्गायां घोषः' इतिवद् गङ्गापदस्य लक्षणया तीरवाचित्वेऽपि गङ्गातत्तीरयोरभेदानुपपत्तिरेव स्याद्, अर्थात् त्वं पदार्थस्येष्टमपि ब्रह्मत्वं नैव सिध्यतीति भेदे सति कस्यचिद्दुःखं कस्यचिच्चसुखमिति ब्रह्मणि वैषम्यनैर्घृण्यदोषावप्यापततः । कर्मानुसारित्वाङ्गीकारेऽपीश्वरत्वहानिरूपो दोषः समुज्जृम्भते अतोऽगत्या प्रपञ्चरूपेण भगवत आविर्भाव एव श्रुतिस्मृत्यादिप्रमाणबलान्मन्तव्यः । तथा हि—

भेदपक्षे तु जीवानां सुखदुःखादिदानतः,
वैषम्यनैर्घृण्यसंज्ञे दूषणे द्वे परे स्थिते ।
अनादिकर्म चाश्रित्य समाधाने त्वमीशता ॥
(शु० भा० 43, 44)

शुद्धाद्वैतवेदान्तिनां मते तु सर्वेषां जीवानां जडानाश्च ब्रह्मरूपत्वेन भेदाभावान्नेमौ वैषम्यनैर्घृण्याख्यौ दोषौ जायेते । 'तदात्मानं स्वयमकुरुत' (तै० 2.7.1) ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऐतदात्म्यमिदं सर्वम्' (छा० 6.8.7)
स वै सर्वंरिदं जगत् (ना० 23.1)
स हैतावानास' (बृ० 1.4.3)

इत्यादिश्रुतिसहस्त्रैर्ब्रह्मैव जगदाकारेण स्वेच्छया रमणार्थमुच्चनीचादिभावेन जातमिति भेदाभावान्नवैषम्यं नापि नैर्घृण्यमिति। उक्तञ्च—

आत्मसृष्टेर्नवैषम्यं नैर्घृण्यं चापि विद्यते।
श्रीमदाच र्यचरणैर्निबन्ध इदमीरितम् ॥
श्रीमत्प्रभुवरैर्विद्वन्मण्डनेऽपि निरूपितम् ।
रमणार्थमिदं विश्वमुच्चनीचाविभावतः।
आत्मरूपं चकारातो हरिर्यस्मान्न दूषणम् ॥
(शु० मा० 46-48)

शुद्धाद्वैतघटकशुद्धपदस्यार्थोऽपि शुद्धाद्वैतमार्तण्डे सम्यक् प्रतिपादित —

मायासम्बन्धरहितं शुद्धमित्युच्यते वुधैः।
कार्यकारणरूपं हि शुद्धं ब्रह्म न मायिकम् ॥
(शु० मा० 28)

न च शुद्धाद्वैतवेदान्तेऽपि अहन्ताममताध्यासस्य मायाकृतत्वाङ्गीकारात् तत्रापि मायासम्बन्धसद्भाव इति चेन्न, 'मम मायादुरत्ययेति भगवद्वचनान्मायाया भगवच्छक्तित्वेन शक्तिशक्तिमतोश्चाभिन्नत्वेन न मायाया ब्रह्मणः पार्थक्यं, येन तया सह सम्बन्धोऽङ्गीक्रियेत। अहन्ताममतारूपाध्यास एव भगवच्छक्तिभूतया माययाकृत इति स एव मायिको न तु पदार्थाः।

इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसम्भवाः।
तद्धि स्वयं वेद भवांस्तथापि वै प्रादेशमात्रं भवतः प्रदर्शितम् ॥
(भा० 1.5.20)

इतिश्लोकस्य व्याख्यायां सुबोधिन्यां श्रीमद्वल्लभाचार्यैर्विस्पष्टं विशदीकृत यद् 'इदं विश्वं भगवानिति' प्रतीतिर्ब्रह्मविदामुत्तमाधिकारिणां भवति। इदं विश्वं भगवानिवेति प्रतीतिर्मध्यमाधिकारिणां भवति। ये कनिष्ठाधिकारिणो भवन्ति; तेषामेव प्रतीतिर्भिन्नत्वेन भवति। 'इद विश्वं, भगवानितर इति'। तेषामय-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

माशयो यद् यथा घटनिर्माता कुलालो घटाद्भिन्नो भवति, तथैव जगत्स्रष्टा भगवानपि जगतो भिन्न इति। किन्तु तेषां कनिष्ठाधिकारिणां मतं सर्वथा श्रुतिविरुद्धत्वादुपेक्षणीयमेव। यतस्ते न विचारयन्ति यद् उपादानकारणमेव कार्यरूपेणाविर्भवतीति। 'तादात्म्यसम्बन्धेन यदाश्रयं कार्यं भवति, तत् समवायिकारणमिति सिद्धान्तात्। तत्तु समन्वयादिति सूत्रे (ब्र० १.१.३४) ऽणुभाष्ये 'समन्वयात् सम्यगनुवृत्तत्वादिति प्रतिपादनाच्च। सम्यगनुवृत्तत्वं नामानारोपितानागन्तुकरूपेणान्वयित्वम्। अतः कनिष्ठाधिकारिणां भेदवादिनां मतं सर्वथाऽग्राह्यमेव। 'सर्वं भगवानेवेति या प्रतीतिरुत्तमाधिकारिणां भवति, सैव शुद्धाद्वैतवेदान्तसम्मता श्रेष्ठा च। तथापि 'इदं विश्वं भगवानिवेति' या प्रतीतिर्मध्यमाधिकारिणां भवति, सापि शुद्धाद्वैतवेदान्ते नातिप्रतिकूला मन्यते। यतस्तत्र केवलं कार्यत्वेन कारणत्वेन च भेदोगृह्यते, न तु ब्रह्मणो विश्वस्य भिन्नत्वमिति शुद्धाद्वैतस्य न काचित् क्षतिर्जायते। अतः साऽपि प्रतीतिर्मध्यमेति भण्यते। 'सर्वत्र भगवत्स्फूर्त्या विषयान्तरानुसन्धानानुदयाद् 'इदं विश्वं भगवान्' इति या प्रतीतिः सोत्तमा, सैव च शुद्धाद्वैतवेदान्तविदां मुख्येति सर्वं शुद्धाद्वैतमार्तण्डे प्रतिपादितम्। तथा हि—

शुद्धाद्वैतविदां या हि प्रतीतिः सोत्तमा मता।
भेदाभेदप्रतीतिस्तु मध्यमानां प्रकीर्तिता॥ (शु० मा० 34)

अतो हि मध्यमः पक्षः शुद्धाद्वैतानुरोधतः।
बोधाय बहुसन्दर्भे गोस्वामिपुरुषोत्तमैः।
श्रीमदाचार्यचरणैर्यत्रकुत्रापि दर्शितः॥
(शु० मा० 35, 86)

तत्रैव शुद्धाद्वैतमार्तण्डे समस्तस्य जगतो ब्रह्मत्वं प्रतिपादितं, तथा कार्यात्मनाभेदः कारणात्मनात्वभेद इत्यपि प्रतिपादितम्। तथा हि—

सर्वं ब्रह्मैवतत्राद्ये द्वितीये भगवान् यथा।
तथा विश्वमिदं सर्वं ब्रह्मकार्यं निजेच्छया॥

कार्यरूपेण भेदो हि न भेदः कारणात्मना।
भेदसह्यस्त्वभेदोऽत्र तादात्म्यं परिकीर्तितम्॥
(शु० मा० 31, 32)

निराकृतश्च भेदवादः। तथा हि—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तृतीये भगवान् भिन्नो जगतः कर्तृतः स्फुटः ।
इति द्वैतप्रतीतिस्तु श्रुतिबाधान्न गृह्यते ॥

(शु० मा० 33)

यद्यपि 'द्वितीये भगवान् यथा' इत्यनेन सादृश्यं प्रतिपाद्यते, सादृश्यञ्च "तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वमिति भिन्नत्वं कारिकाबलादपि सिध्यतीत्यपि वक्तुं शक्यते, तथापि नैतत् विचारसहतामाधत्ते । यतो 'भगवान् यथा' इति कथनेन भगवति यथा सच्चिदानन्दत्वं नित्यत्वं शुद्धत्वञ्चेत्यादिधर्माः सन्ति, तथैव विश्वस्मिन्नपि तस्य ब्रह्मात्मकत्वात्ते सर्वेऽपि सच्चिदानन्दत्वादयो धर्मा अक्षुण्णा एव विद्यन्ते । तिरोधानवशाद् भगवदिच्छया जडे चिदानन्दयोर्जीवे पूर्णानन्दस्य च प्रतीतिर्न भवति । पुनश्च भगवदिच्छयैवाविर्भावे सति 'सर्वं ब्रह्ममयं जगद्' इति प्रतीतिर्भवत्येव । ब्रह्मविदां दृष्टौ तु सर्वत्र सर्वथा सर्वथा च ब्रह्मस्फूर्तिरेव जायते । अतो भ्रान्त्या कर्तृत्वलिङ्गकानुमानेन वा भेदसाधनन्तु न समीचीनमिति ।

शुद्धाद्वैतपरिष्कारकारेण तु तत्र प्रतिपादितं यद् 'अत्र नरसिंहतापिन्यां योनित्वं ब्रह्मणः समर्थयित्वा 'सर्वं सर्वमयं, सर्वे जीवाः सर्वमयाः, सर्वावस्थासु तथाप्यल्पाः 'इत्याद्युक्त्वा 'सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वय आनन्दः परः प्रत्यगेकरसः प्रमाणैरेतैरवगम्यते' इति वाक्यं पठितम् । अग्रे च 'सर्वंयत एव शुद्धोऽबाध्यस्वरूपः सुखरूप आत्मेति निरूपितम् । 'सर्वंखल्विदं ब्रह्मे'त्यादिश्रुतिषु शुद्धाद्वैतं स्पष्टमेव प्रतीयत इति बोध्यम ।

सर्वं खल्विदं ब्रह्म
ऐतदात्म्यमिदं सर्वम् (छा० 6.8.7)
पुरुषएवेदं सर्वं यद्भूतं यच्च भाव्यम् (ऋ० 10.20.2)
य एतस्मिन्नुदरमन्तरं कुरुतेऽथ तस्य भयं भवति

योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मि न स वेद यथा पशुः' (बृ० 1.4.10) इत्यादिश्रुतिबाधात् भेदवादः सर्वथा श्रुतिविरुद्धत्वादुपेक्षणीय एव ।

एकाकी न रमते स द्वितीयमैच्छद् 'एकोऽहं बहु स्याम' (तै० 2.6) इत्यादिश्रुतिभिरेकस्यैव ब्रह्मणः सर्वस्वरूपैराविर्भाव एव क्रीडार्थं प्रतिपाद्यते । उक्तञ्च—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रीडार्थमात्मन इदं त्रिजगत् कृतं ते,
स्वाम्यं तु तत्र कुधियः पर ईश कुर्युः ॥ (भा० 4.7.43)
क्रीडाभाण्डमिदं विश्वम् (भा० 4.7.43)

त्वय्यग्र आसीत्त्वयि मध्य आसीत्त्वय्यन्त आसीदिदमात्मतन्त्रे ।
त्वमादिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्मात् ॥
(भा० 8.6.10)

यद्यपि श्रीनिम्बार्काचार्या अपि भेदाभेदवादिनः सन्ति, तथापि तेषां भेदाभेदे शुद्धाद्वैतभेदाभेदे चास्ति महदन्तरम् । तेषां मते माधवाचार्याणां च मते भेदो वास्तवोऽभेदस्तु चित्त्वसामर्थ्याति व्यवस्था । अस्माकं शुद्धाद्वैतवादिनां मते तु 'अभेदोवास्तवो जीवानां ब्रह्मांशत्वाद्, अंशांशिनोरभेदाच्च । तथाहि—

माधवाचार्यं निम्बार्काचार्ययोर्मते—

विभिन्नांशाः सदा जीवा न स्वांशा इति निश्चयः ।
अभेदश्चित्त्वसाधर्म्यादेवं तेषां मतस्थितिः ॥
कनिष्ठा सा प्रतीतिस्तु नास्मन्मतमवेक्षते ।
अभेदो वास्तवः स्वांशा जीवा इति निजे मते ॥
(शु० मा० 38, 39)

शुद्धाद्वैतवेदान्तनये कारणस्य केवलं कार्याकारेणाविर्भावमात्रमवलम्ब्यभेद-व्यवह्यारोऽङ्गीक्रियते । वस्तुतस्तु कार्यस्य कारणे तिरोभावे सति कार्यकारणयो-रैक्यान्नाणुमात्रोऽपि भेद इति सिद्धान्तः । अत एवोक्तम्—

'त्वमादिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्मात्'
(भा० 8.6.10)

यथा घटस्य पूर्वावस्था मृद्रूपा भवति, तदनन्तरं मध्ये घटावस्था जायते । साऽपि मृद्रूपैव नान्या । पश्चाल्लये सत्यपि घटोमृद्रूपतामेवैति । एवमेव सृष्टेः प्राग् ब्रह्मैकमेवासीन्नान्यत्किञ्चित्ततोभिन्नम् ।

सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम् । (छा० 6.2.1)
तत एकाकी न रमते स द्वितीयमैच्छदिति ॥

इतीच्छया तद्ब्रह्मैव बहुत्वमापद्यत । तदनन्तरं लीलासंवरणकाले—
एकोऽहं बहुस्याम' (तै० 2.6)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथोर्णनाभिः सृजते गृह्णते च । (मु० 1.1.7)

यथोर्णनाभिः हृदयादूर्णां संतत्यवक्त्रतः ।
तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः ॥

(भा० 11.9.21)

एको नारायणो देवः पूर्वसृष्टं स्वमायया ।
संहृत्य कालकलया कल्पान्त इदमीश्वरः ॥
एक एवाद्वितीयोऽभूदात्माऽऽधारोऽखिलाश्रयः ।
कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु ॥

(भा० (11.9.17)

इत्यादिश्रुतिस्मृत्यादिप्रमाणसहस्रैः सम्यगेवमवगम्यते यद् ब्रह्मणोऽतिरिक्तं द्वितीयस्य गन्धमात्रोऽपि नास्ति सम्भव इति । स एवादिदेवो नारायणो लीलार्थं जगद्रूपेणाविर्भवति तिरोधते चावसाने ।

बिभ्रद्वपुः सकलसुन्दरसन्निवेशं कर्माचरन् भुवि सुमङ्गलमाप्तकामः ।
आस्थाय धाम रममाणउदारकीर्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेषः ॥
कर्माणि पुण्यनिवहानि सुमङ्गलानि गायज्जगत् कलिमलापहराणि कृत्वा ॥

(भा० 11.1.10-11)

इति भागवतोक्त दिशा गायज्जगत् कलिमलापहराणि सुमङ्गलानि पुण्यपुञ्जप्रदानि लीलाचरितानि कर्तुमानन्दयितुञ्च भक्तजनान् भगवान् नारायणः श्रीकृष्णादिनानारूपेणावतीर्य भक्तजनानानन्दयति, नान्यत् किञ्चित् प्रयोजनम् । यथा च सुप्त, उत्थित, उपविष्टे च पुरुषेऽवयविन्यासभेदो न पुरुषभेदः, यथा वा कटककुण्डलाद्याकारेण परिणतस्य सुवर्णस्य, सुवर्णत्वं घटशरावादिरूपेण परिणताया मृत्स्नाया मृद्रूपता च न ह्रीयते, एवमेव जगद्रूपेणाविर्भूतस्य ब्रह्मणोऽपि ब्रह्मताऽक्षुण्णैव वर्तत इति निष्कर्षः ।

इति संक्षेपतः शुद्धाद्वैतवेदान्तसम्मतं ब्रह्मस्वरूपं प्रतिपादितम् । किन्त्वन्यैरद्वैतवेदान्तसिद्धान्तप्रतिपादकाचार्यैं द्वैताद्वैतद्वैतसिद्धान्तप्रतिपादकाचा-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

यैश्च सह नात्र विषय ऐक्यमत्यं वर्तते अतस्तेषांप्रदिपादितसिद्धान्तैः सह साम्यवैषम्यप्रदर्शिकेका तालिका या श्रीहरिरायविरचिते 'ब्रह्मवादाख्यग्रन्थे संलग्नाऽस्ति; मयाप्यविकलं सा समुपन्यस्ते विदुषां पुरः समीक्षणार्थम् ।

श्रीमद्वल्लभाचार्याणां मतम्	श्रीमच्छङ्कराचार्याणां मतम्
1. शुद्धाद्वैतवादः	1. अद्वैतवादः
2. प्रमाणादिसर्वं सत्यं, केवलं ब्रह्मैव स्वेच्छावशात् प्रमाणादिरूपैर्विचित्रां लीलां करोति ।	2. प्रमाणादीनि व्यवहारकाणि, परमार्थतः सत्यं ब्रह्मैव ।
3. शब्द एव मुख्यं प्रमाणं तदनुकूलतयाऽन्येषां प्रामाण्यं, किन्तु तत्संख्याऽनपेक्षिता । शब्दप्रमाणेऽप्यखण्डशुद्धाद्वैतज्ञानपर्यन्तं स्वतः. प्रमाणं वेदाः साङ्गाः, श्रीमद्भगवद्गीता, मीमांसाद्वयम्, श्रीमद्भागवतं (समाधिभाषा व्यासस्य) चेति प्रस्थानचतुष्टयम् ।	3. प्रमाणानां व्यावहारिकीं सत्तामभ्युपेत्य तेषां प्रत्यक्षानुमानोपमानशब्दार्थापत्यनुपलब्धय इति षट्त्वमभ्युपगम्यते । (क) प्रस्थानत्रयं प्रमाणम् । (ख) शब्दप्रमाणस्यैवान्यप्रमाणापेक्षया श्रैष्ठ्यम् ।
4. 'वेदो नारायणः साक्षात्' इति प्रामाण्यात् तस्य पारमार्थिकत्वम्	4. जगदन्तः पातित्वाद्वेदानामपि न पारमार्थिकत्वम् ।
5. प्रमेयं ब्रह्मैव ।	5. प्रमेयं ब्रह्मैव ।
6. सर्वधर्मविशिष्टत्वं ब्रह्मणः । सर्वधर्माणाञ्च ब्रह्माभिन्नत्वं स्वाभाविकत्वञ्च, धर्मधर्मिणोऽविकृतरूपाः ।	6. निर्गुणं निराकारं ब्रह्म ।
7. आनन्दमयमेव ब्रह्म, सैव पराकाष्ठा, न ततः परं किञ्चिदस्तीति ।	7. आनन्दमयो न ब्रह्म, किन्तु ततः परं ब्रह्म अन्यदेव ।
8. सगुण-निर्गुणेति कल्पना परापरेति विद्याद्वैविध्यं नाङ्गीक्रियते, ब्रह्मणो	8. सगुण-निर्गुणेति कल्पना परापरेति विद्या द्वैविध्यञ्च स्वीक्रियते ।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विरुद्धधर्माश्रयतया सर्वस्य सुसङ्गतत्वात् ।	
9. ब्रह्मैव स्वतोऽभिन्ननिमित्तोपादान कारणतया कर्तृ ।	9. परमार्थतोऽकर्तृभूतं ब्रह्मैव मायावशात् कर्तृत्वेन प्रतीयते ।
10. जगतः सत्यत्वादभेदसम्भवः ।	10. जगतोऽसत्यत्वाद् ब्रह्मणानन्यत्वं न सम्भवति ।
11. सच्चिद्गुप्तानन्दाद्ब्रह्मणोऽग्नेर्विस्फुलिङ्गवदंशात्मकजीवोत्पत्तिः। स च जीवो नित्यः ।	11. अविद्यावशाद् ब्रह्मैव जीवरूपेण भासते ।
12. तदविद्यानाशे तत्संसारनाशः, न तु जीवनाशः ।	12. विद्ययाऽविद्यानिवृत्तौ जीवत्वनाशः ।
13. जीवो ज्ञातृरूपो धर्मी च ।	13. जीवश्चैतन्यज्ञानस्वरूपो न तु ज्ञातृरूपः ।
14. आनन्दांशतिरोभावेन व्यापकोऽणुरूप एव पुनरानन्दांशाविर्भावे व्यापकश्च ।	14. जीवो विभुर्बुद्धिसंयोगादणुरूपेण भासते ।
15. ईशेच्छया जायमानं जीवस्य कर्तृत्वभोक्तृत्वादिकं पारमार्थिकम् ।	15. जीवस्य कर्तृत्वभोक्तृत्वादिकं बुधिसम्बन्धजं न पारमार्थिकम् ।
16. विरुद्धधर्माश्रयतया जीवो ब्रह्मणोंऽशो गर्भदासश्च ।	16. जीवः प्रतिबिम्बभूत आभासः ।
17. ब्रह्मैव स्वेच्छावशादनेकजीवःरूपाणि धारयित्वा विचित्रलीलाः करोति ।	17. ब्रह्ममाययानैकजीववद्भासते ।
18. अंशांशिभावेनाभेदसिद्धिः ।	18. जहदजहल्लक्षणयाऽभेदसिद्धिः ।
19. जगद् ब्रह्मण आधिभौतिकस्वरूपमत एव सत्यम् ।	19. जगदसत्यमविद्यया भासते च ।
20. द्वैतज्ञानमविद्याकार्यम् ।	20. द्वैतज्ञानमविद्याकार्यम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

21. जगद्भिन्नं संसारो भिन्नश्च । जगत् सद् भगवत्कार्यं, भगवद्पञ्च । तस्य न नाशः संसारस्त्वविद्या कार्यमसन् ज्ञाननाश्यश्च ।	21. जगत्संसारयोर्भेदो नाभिमतः ।
22. अविकृतपरिणामवादः ।	22. विवर्तवादः ।
23. आविर्भावतिरोभावौ ।	23. अध्यारोपापवादौ ।
24. प्रकारभेदेनाख्यातिरन्यथाख्यातिश्च	24. अनिर्वचनीयख्यातिः ।
25. भक्तिरन्या, उपासना चान्या ।	25. कर्मोपासनाज्ञानमिति साधनक्रमः । भक्त्युपासनयोर्भेदो नाभिमतः ।
26. सर्वाणि साधनानि फलात्मकानि ब्रह्मरूपाणि च ।	26. कर्मादीनि साधनानि जगदन्तःपातित्वादपारमार्थिकानि ।
27. आत्यन्तिकदुःखनिवृत्तिपूर्वक परमानन्दप्राप्तिरूपो मोक्षः ।	27. अविद्यानिवृत्तिरूपो मोक्षः ।
28. मोक्षः प्रवेशात्मकसायुज्यमभिधीयते ।	28. मोक्षः कैवल्यमित्यभिधीयते ।
29. भगवदिच्छा भगवल्लीलाद्यालम्बनेनाद्वैतं प्रतिपाद्यते ।	29. अविद्यामायाऽङ्गीकारेणाद्वैतं प्रतिपाद्यते ।
30. एकमेवाद्वितीयं वस्तु स्वेच्छया तत्तद्रूपेण परिणमत इति मत्वाऽद्वैतं साध्यते ।	30. सर्वमलीकमिति मत्वाऽद्वैतं साध्यते ।
31. वेदस्याक्षरमप्यन्यथा न कल्प्यते । सर्वविरुद्धधर्माश्रयंब्रह्मेति स्वीकारेण सर्वोऽपि श्रुत्यर्थो व्यवस्थाप्यते ।	31. तत्तच्छ्रुतिव्यवस्थार्थं निर्गुणसगुणोपजीव्यत्वोपास्यत्वपरब्रह्मत्वादिकल्पनम् ।

अथात्र रामानुजमततो वाल्लभमतवैलक्षण्यमुपन्यस्यते

श्रीमद्वल्लभाचार्याणां मतम् ।	श्रीमद्रामानुजाचार्याणां मतम् ।
1. शुद्धाद्वैतम् ।	1. विशिष्टाद्वैतम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

2. चिदानन्दांश प्रादुर्भावे जडमपि ब्रह्मैव भवति, तथाऽऽनन्दांश-प्रादुर्भावे चिदपि ब्रह्मैव ।	2. जडस्य जडेनैवाभेदश्चितश्चितैव ।
3. वेदानुकूलानि सर्वाणि प्रमाणानि । तत्संख्यानियमो नास्ति ।	3. प्रमाणानां त्रयम्, तत्रागमस्य मुख्यत्वम् ।
4. ब्रह्मैव प्रमेयम् ।	4. ब्रह्मैव प्रमेयं, परन्तु ब्रह्मणश्चिदचिद्रूपे शरीरे, तयोः परिणामं चाभ्युपगम्यते ।
5. विरुद्धधर्माश्रयं ब्रह्म, सर्वदिव्यधर्मवदपि ।	5. सर्वदिव्यधर्मवद्ब्रह्म ।
6. ब्रह्मणः कर्तृत्वम् ।	6. ब्रह्मणः कर्तृत्वम् ।
7. अविकृतपरिणामवादः ।	7. ब्रह्मशरीरं परिणमते । (तेन द्वैतस्वीकारात् वैषम्यनैर्घृण्यपरिहारो दुष्करः । श्रीमद्वल्लभाचार्याणां मते त्वखण्डाद्वैतस्वीकारात् सुलभः ।
8. जीवोऽणुरूपो व्यापकश्चानन्दाविर्भावे ।	8. जीवोऽणुर्नित्यः कर्तृरूपश्च ।
9. ब्रह्मैव स्वेच्छया नानारूपाणि धारयतीत्याविर्भावतिरोभाववादस्वीकारात् ।	9. सर्वदैवजीवानां नानात्वम् ।
10. जगत्संसारयोर्भेदः ।	10. जगत्संसारयोर्भेदो नास्ति ।
11. भक्त्युपासनयोर्भेदः ।	11. नास्ति भक्त्युपासनयोर्भेदः ।
12. अविद्वद्दशायामन्यथाख्यातिः, पूर्णज्ञानिदृष्ट्याऽख्यातिश्च .	12. सत्ख्यातिः ।

।। माध्वमततो वाल्लभस्य वैलक्षण्यम् ।।

श्रीवाल्लभमतम्	श्रीमाध्वमतम्
1. शुद्धाद्वैतम् ।	1. द्वैतम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

2. वेदानुकूलं सर्वंप्रमाणं तत्संख्यानास्ति ।	2. प्रत्यक्षानुमानशब्देति प्रमाणत्रयम् ।
3. ब्रह्मैव प्रमेयम् ।	3. ब्रह्मणः प्रमेयत्वेऽपि जीवो जगदिति पृथक् तत्त्वद्वयम् ।
4. ब्रह्मजीवजगतां सर्वथैवाभेदः ।	4. ब्रह्मजीवजगतां कदापि नास्त्यभेदः ।
5. ब्रह्मणिविरुद्धधर्माश्रयता वर्तते ।	5. न विरुद्धधर्माश्रयत्वं ब्रह्मणः ।
6. ब्रह्म सधर्मकं निर्धर्मकञ्चेत्युभयविधम् ।	6. ब्रह्म सर्वदा सधर्मकमेव ।
7. ब्रह्मैवाभिन्ननिमित्तोपादानकारणम् ।	7. ब्रह्मनिमित्तकारणं, प्रकृतिश्चोपादानकारणम् ।
8. अखण्डाद्वैतम् ।	8. अनन्यत्वं नास्ति ।
9. आध्यात्मिकमक्षरब्रह्मस्वरूपम् ।	9. न तथाऽभिप्रेतम् ।
10. जीवो ब्रह्मण एवेच्छागृहीतं रूपम् ।	10. जीवः पृथक् तत्त्वम् ।
11. जीवस्य नित्यत्वं ज्ञातृत्वञ्च ।	11. तथैवात्रापि ।
12. अखण्डरूपस्यापि तस्यानन्दांशप्रादुर्भावे व्यापकत्वम् ।	12. जीवः सर्वदाऽणुरूपः ।
13. जीवस्य कर्तृत्वभोक्तृत्वे वर्तेते ।	13. तथैवात्रापि ।
14. इच्छाविपरिणामवत्त्वं जीवस्य ।	14. नानात्वं पारमार्थिकत्वञ्च ।
15. अंशत्वादेवांशांशित्वेन जीवस्य ब्रह्मणा सहाभेदः ।	15. यद्यपि जीवस्यांशत्वमुररीक्रियते; तथापि तस्मादेवांशत्वरूपकारणात् तस्य ब्रह्मणः सकाशाद्भेदः ।
16. जगत् संसारयोर्भेदः ।	16. जगत् संसारयोर्भेदो नाभिमतः ।
17. भक्त्युपासनयोर्भेदः ।	17. नाभिमतो भक्त्युपासनयोर्भेदः ।
18. अविद्वद्दशायामन्यथाख्यातिः । पूर्णज्ञानिदृष्ट्याऽख्यातिश्च ।	18. अन्यथाख्यातिः ।

तदेवं प्रदर्शितं वाल्लभमततो मतान्तराणां वैलक्षण्यम् - यद्यपि सर्वैरप्याचार्यैः स्वबुद्ध्यनुसारं ब्रह्मजीवगतां स्वरूपं प्रतिपादितं, तथापि "यत्र वाचो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निवर्तन्ते अप्राप्य मनसा सह' इत्यादिश्रुतिभिरगम्यरूपस्याज्ञेयस्यानिर्वचनीयस्य ब्रह्मतत्त्वस्य सर्वथेदृक्तयेदन्तया च प्रतिपादनं ब्रह्मबृहस्पत्यादीनामपि नितान्तं दुष्करमिति न कोऽपि सर्वथा संशयादिरहितं मतविशेषस्य समीचीनत्वमसमीचीनत्वं वा वक्तुं शक्नोति। सत्यप्येवमेतत्तु निर्विवादमेवास्ति यन्नाद्यावधि केनापि ब्रह्मणः स्वरूपं निःशेषतया प्रतिपादितं, न वा भविष्यत्यपि संभाव्यते। उक्तञ्चापि श्रुत्या—

"यस्यामतं तस्य मतं मतं यस्य न वेद सः।"

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शुद्धाद्वैतवेदान्तसम्मतो जीवविषयो सिद्धान्तः

शुद्धाद्वैतवेदान्ते जीवो ब्रह्माभिन्नोऽणुर्ब्रह्मांशः इति सिद्धान्तितम् । तत्र ब्रह्माभिन्नत्वे— तत्त्वमसि श्वेतकेतो (छा० 6।10।3)

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति (क० 2।1।10)

अथ तस्यभयं भवति य इह उदरमन्तरं कुरुते

इत्यादिश्रुतयो 'न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपि' इत्यादिस्मृतयश्च प्रमाणम् । अणुत्वे च –एषोऽणुरात्मा चेतसा वेदितव्यः (मु० 3।1।9)

बालाग्र शतभागस्य शतधा कल्पितस्य च भागो जीवः

स विज्ञेयः स चानन्त्याय कल्पते (श्वे० 5।9)

आराग्रमात्रो ह्यवरोऽपि दृष्टः (श्वे० 5।8) इत्यादिश्रुतयः

प्रमाणम । एवं ब्रह्मांशत्वेऽपि-ममैवांशो जीवलोके जीवभूतः सनातनः' (गी० 15।7) तदेतत्सत्य 'यथा सुदीप्तात्पावकाद् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथा क्षराद् विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्ति' (मु० 2।1) इत्यादिश्रुतयः अंशो नानाव्यपदेशादन्यथा चापि दाशक्तिवादित्वमधीयत इत्येके' (ब्र० सू० 2।3।43) इत्यादिब्रह्मसूत्राणि व प्रमाणमित्यवधारितम् ।

यद्यपि जीवस्याणुत्वेंऽशत्वे च नानाविधा विप्रतिपत्तयः समुपस्थाप्यन्ते वादिभिस्तथापि तासां विप्रतिपत्तीनां निरासोऽप्युक्ति युक्तिपुरःसरं विधीयते तत्तदाचार्यैः । तथा हि—ननु जीवस्य विस्फुलिङ्गवन्निः सरणेंऽशत्वेऽणुपरिमाणे च सर्वशरीरगतशैत्याद्यनुपलम्भ इति चेन्नं ।

विसर्पि गुणचैतन्योंऽणुर्जीवोंऽशो हरेः स्मृतः' (शु० भा० 10; तत्र श्रीमद्रामकृष्णविरचितप्रकाशाख्यटीकायां सम्यक् प्रतिपादितं यज्जीवो विसर्पिगुण-चैतन्योऽस्ति, अर्थात् यथा मणेः प्रभा मणावेकदेशस्थेऽपि समीपस्थमधिकदेशं व्याप्नोति । तथा च चम्पकादीनां पुष्पाणामन्येषाञ्च सुगन्धिद्रव्याणां गन्धः पुष्पादिभ्योऽधिकदेशमभिव्याप्य वर्तते । तद्वज्जीवानामपि चैतन्यं गुणः सर्वशरीरम-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भिव्याप्नोति। पुष्पादीनां गन्धस्याधिकदेशवृत्तितायां तदवयवानामत्यन्तसूक्ष्माणां निःसरणममादाय समाहितिस्तेषाँ न्यूनत्वापातदोषादसमीचीनेति, भोगदृष्टमादाय पूतिकल्पनायां गौरवम्। किञ्चोग्रगन्धादेः स्पर्शे मुहुर्मुहुः क्षालनेनापि गन्धानपगमात् अनेकचर्मपुटवेष्टितस्य कस्तूरिकादेः हिंगुलशुनादेश्च गन्धोपलब्धैरवयवनिःसरणकल्पना सर्वथा निराधारैव।

एवञ्च जीवानां ब्रह्मांशत्वाद् ब्रह्मगतानां धर्माणामपि तत्र वर्तमानता स्वीकर्तव्यैव। ब्रह्म च 'अण्वपि ब्रह्म व्यापकं भवति, यथा कृष्णो यशोदाक्रोडे स्थितोऽपि सर्वजगदाधारो भवति। इति निबन्धोक्तरीत्या जीवानामणुत्वेऽपि न कश्चिद्दोषः। तथा च व्याससूत्रम् 'अविरोधश्चन्दनवत्'। प्रतिपादितञ्च भाष्यादौ यद् 'यथा हि हरिचन्दनविन्दुः शरीरैकदेशशंलग्नोऽपि सकलशरीरव्यापिनमाह्लादं करोति। एवं जीवात्मापि देहैकदेशे हृदिस्थितोऽपि सकलशरीरव्यापिनी शैत्याद्युपलब्धि करिष्यतीति।'

न च जीवात्मन एकदेशस्थत्वे निश्चिते सत्यैव चन्दनविन्दुरिव सकलदेहव्यापिचेतनोपलब्धिर्वक्तु' शक्यते। तद्धि तावज्जीवानामेकदेशस्थत्वमेवानिश्चितं वर्तते अतोऽयं चन्दनविन्दुदृष्टान्तो विषम इति चेन्न, श्रुतौ जीवानामपि शरीरैकदेशवर्तित्वस्याभ्युपगमात्। तथा हि—

हृदि ह्येष आत्मा (प्रश्न० 3.6)
स वा एष आत्मा हृदि (छा० 8.3.3)
कतम आत्मेति, योऽयं विज्ञानमयः प्राणेषु
हृद्यन्तर्ज्योतिः पुरुषः (बृ० 4.3.7)
उत्क्रान्तिगत्यागतीनाम् (ब्र० सू० 2.3.19)

इति बादरायणसूत्रेष्वपि जीवस्याणुत्वं निर्धारितम्। विभोश्चलनस्यासम्भवात्। जीवस्योत्क्रान्तौ 'स यदाऽस्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामति' (कोषीत० 3।3) इति श्रुतिः प्रमाणम्। एवं गतावपि—'यै वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव सर्वेगच्छन्ति' (कोषी० 1.2) इति प्रमाणम्। आगतावपि 'तस्माल्लोकात्पुनरेत्यस्मैलोकायर्मणो' (बृ० 4.4.6) इति प्रमाणम्। सारांशस्त्वयं यज्जीवस्याणुत्वं, ब्रह्मांशत्वं, विसर्पिगुणचैतन्यत्वमित्यादि श्रुतिस्मृतिब्रह्मसूत्रादिभ्यः सर्वथा सप्रमाणमिति। गीतायामपि 'ममैवांशो जीवलोके जीवभूतः सनातनः' इति भगवता श्रीकृष्णेन स्वयमभिहितम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स जीवोऽवस्थात्रयवान् भवतीति प्रमेयरत्नार्णवे विशदं प्रतिपादितम् । 'शुद्धसंसारिमुक्तभेदात्' तथाहि—'कारणभूतादक्षरब्रह्मणः सकाशाद् यथाऽग्नेः क्षुद्रा विस्फुलिङ्गाव्युच्चरन्ती' (बृ० 2।1।20) तिश्रुतेः सच्चिदानन्दात्मकोऽणुरंशो निःसरति । क्षुद्रा इति विशेषणेन जीवानामणुत्वं प्रतिपादितं भवति । ततः कारण-रूपाक्षरगतस्य विशुद्धसत्त्वस्यांशभूतेन सत्त्वेन भगवदिच्छया प्रवली-कृतेनानन्दांशस्तिरोभवति । तदा निरुपाधिकोऽणुरूपोऽक्षरांशचित्प्रधानस्तिरो-हितानन्दो जीवशब्दवाच्यो भवति । वेदस्तुतिसुबोधिन्यां 'स्वकृतपुरेष्वमीषु' इत्यत्रोक्तमाचार्येण यद् "जीवो नाम भगवतश्चिदंश" इति । भाष्येऽपि "आनन्दांशस्तु पूर्वमेवतिरोहितो येन जीवभाव' इति । निबन्धे च 'ततः साकारा भगवद्रूपा अपि उच्चनीचभावेच्छया निर्गता इति निराकारा अर्थात् तिरोहिता-नन्दा जाता इति ।

'व्युच्चरणोत्तरमानन्दांशतिरोधाने सत्यविद्यासम्बन्धात् पूर्ववर्तिन्याम-वस्थायां शुद्धजीव इति व्यवहारः' । जीवे शुद्धत्वन्त्वविद्यासम्बन्धराहित्यम् । ततोऽस्मिन् जीवरूपे भगवदंशे भगवदैश्वर्यादि षड्गुणांशभूतानामैश्वर्यादीनां हरीच्छया तिरोभावः । 'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ (ब्र०सू० 3.2.5) । तदा तिरोधानानन्तरं 'एकोऽहं बहुस्याम्' (तै० 2.6) इति बहुत्व-सम्पादनाय केषु जीवेषु दैवत्वं सम्पादयति भगवान् । ततस्ते जीवा मुक्तियोग्या भवन्ति 'दैवीसम्पद्विमोक्षाय, निबन्धायासुरी मता:' (गी० 16.5) । एतादृशा दैवीसम्पत्सम्पन्ना जीवा भगवत् कृपया सत्संगादिलब्ध्वा,

वैराग्यं सांख्यायोगौ च तपो भक्तिश्च केशवे ।
पञ्चपर्वेति विद्येयं यथा विद्वान् हरिं विशेत् ॥

इति पञ्चपर्वात्मिकां विद्यां प्राप्य परमानन्दलक्षणां मुक्तिं लभन्ते ।

येषु च जीवेषु दैवीसम्पद् भगवतानेनैवाधीयते ते पञ्चपर्वात्मिकयाऽविद्यया बद्धाः सन्तः संसारिणो दुःखिता च भवन्ति । एवं जीवानां शुद्धसंसारिमुक्तभेदात् त्रैविध्यं भवति । अर्थाद् ब्रह्मणो व्युच्चरणानन्तरमविद्यासम्बन्धात् प्राक् शुद्धत्वम् । ततो 'देहेन्द्रियान्तःकरणाध्यासस्वरूपविस्मृतयः' इति पञ्चपर्वात्मिकयाऽविषया -सम्बद्धो बद्धः संसारी चोच्यते । भगवत्कृपया लब्धसत्सङ्गादिः पञ्चपर्वात्मिकया वैराग्यादिपञ्चकविशिष्टया विषया सम्बद्धः सन् मुक्त इत्यभिधीयते ।

संक्षेपतो जीवानां विषये शुद्धाद्वैतवेदान्तिनामयन्निष्कर्षो यज्जीवा ब्रह्मणोंऽश

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भूता एव 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति' (बृ० 2.1.20) इति श्रुत्यांशत्वस्य स्पष्टमेवोक्तत्वाद्, अंशो नानाव्यपदेशादन्यथाचापि वा शक्तिवादित्वमधीयत एके (ब्र० सू० 2.3.43) इति ब्रह्मसूत्राच्च। जीवानामणुपरिमाणत्वमपि 'एषोऽणुरात्मा चेतसा वेदितव्यः' (मु० 3.1.9) इत्यादिश्रुतिबलात् सुष्ठु प्रतिपादितम्। एवञ्च जीवानां नित्यत्वं ब्रह्माभिन्नत्वञ्चापि 'एवमेव खलु सौम्य विद्धीति होवाच जीवापेतं वाव किलेदं म्रियते न जीवा म्रियते इति स य एषोऽणिमैतदात्म्यमिद सर्वं, स आत्मा, तत्त्वमसि श्वेतकेतो' (छा० 6 11.3) इति श्रुत्या जीवस्य नित्यत्वम्, अणुत्वं ब्रह्माभिन्नत्वञ्च स्पष्टमेव निगदितम्। तथा च 'ममैवांशो जीवलोके जीवभूतः सनातनः' (गी० 15.7) इत्यादि गीतावाक्याच्चांशत्व, सनातनत्वादिकं चाभिहितमेव।

ननु 'नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः' गी० 2।24) इति सर्वगत इति भगवद्वाक्याज्जीवानां व्यापकत्वमिति चेन्न, ब्रह्मवेद ब्रह्मैव भवति (मु० 3।2।9) इति श्रुतेः ब्रह्मभावे प्राप्ते सति भगवद्धर्मांऽशे जायमानस्य व्यापकत्वस्य भगवद्वाक्यविषयत्वात्। तदुक्तं निबन्धे, 'व्यापकत्वश्रुतिस्त्वस्य भगवत्त्वेन युज्यत इति। तर्हि व्यापकतायां जातायामणुत्वस्य निवृत्तेरवास्तवमणुत्वमिति चेन्न। ब्रह्मणो विरुद्धधर्माश्रयत्वेनाणुत्वेऽपि व्यापकत्वस्य सुस्थत्वात्। एतदुपपादितं निबन्धे 'अण्वपि ब्रह्मव्यापक भवति यथा कृष्णो यशोदाक्रोडे स्थितोऽपि जगदाधारो भवति'। अतो जीवोऽणुरेव। तस्य चैतन्याख्यो गुणः सर्वदेहव्यापको भवति। तदुक्त नारदपञ्चरात्रे लक्ष्मीतन्त्रे त्रयोदशाध्याये—

चैतन्यमस्य धर्मो हि प्रभा भानोरिवामला।
तया स्फुरति जीवोऽसौ स्वत एवानुरूपया॥

इत्येवमुपर्युक्तविवेचनेन शुद्धाद्वैतवेदान्तसम्मतं जीवस्वरूपमखिलं सर्वथा संशयविपर्ययादिरहितमनवद्यमिति। तथा हि—

'विसर्पिगुण चैतन्योऽणुर्जीवोंऽशो हरेः स्मृतः' (शु० भा० 10)

एतादृशाः सर्वेऽपि जीवा सुरनरतिर्यगादयश्चराचरा मायामोहितचेतसो मिथ्याज्ञानमाश्रित्य देहादावहन्ताबुद्धिमुपादाय ममताञ्चाश्रित्यानुदिनमनुक्षणञ्च त्रितापार्त्ती भृशं तप्यन्ते। अतस्तेषां समुद्धारार्थमेव त्रिकालद्रष्टॄणां

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

महर्षीणामन्येषाञ्चाचार्याणां दयार्द्रहृदयानामनवरतमयं प्रयासो भवति यद् येन केनापि प्रकारेणैतेषां भवाटव्यां बंभ्रम्यमाणानां जीवानां मिथ्याज्ञानापनयनपूर्वकं सन्मार्गप्रदर्शनेन समुद्धारो विधेय एव। मिथ्याज्ञानापनयनार्थमेवानेकेषां ग्रन्थानां निर्माणं स्वसिद्धान्तप्रचारश्च तैः क्रियते। तत्र शुद्धाद्वैतवेदान्तसिद्धान्ते भगवदनुग्रहादेव प्राणिनां कल्याणं भवति नान्यथा स चानुग्रहस्तपत्क्रयेन सत्सङ्गादिसमुपलब्धानन्यभक्त्या लब्धुं शक्यते अतोऽस्ति जीवानामेतत् प्रधानकर्तव्यं यत् अनन्यगतिकत्वमाश्रित्य भगवच्चरणारविन्द शरणं ...येरन्निति। साक्षात् भगवता श्रीकृष्णेन गीतायामुक्तमर्जुनं प्रति यत्—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥

(गी० 18.66) तथान्यत्रापि

सकृदेव प्रपन्नाय तवास्मीति च याचते।
अभयं सर्वसत्वेभ्यो ददामीति व्रतं मम॥

अत एव 'श्रीकृष्णः शरणं मम' त्ययं मन्त्रः शुद्धाद्वैतवेदान्ते सर्वश्रेष्ठत्वेन मन्यते। अर्थान्ममासहायस्याकिञ्चनस्य भगवान् श्रीकृष्ण एव गतिर्नान्य इति भावनयाऽहर्निशं भगवन्नामोच्चारणं तद् ध्यानपूर्वकं भवबन्धान्मुक्तिमिच्छद्भिर्विधेयमिति। उक्तञ्च—

"सर्वसाधनहीनस्य पराधीनस्य सर्वथा।
पापलीनस्य दीनस्य कृष्ण एव गतिर्मम॥"

"यदि भवति मुकुन्दे भक्तिरानन्दसान्द्रा
विलुठति चरणाग्रे मोक्षसाम्राज्यलक्ष्मीः॥"

"भक्त्या तुष्यति केवलं न च गुणैर्भक्तिप्रियो माधवः"। इति श्रीमद्भागवतेऽपि भक्तेर्महिमा सर्वसाधनेभ्यो गरीयानिति विस्पष्टमेवाभिहितम्। सुदामानं प्रति श्रीकृष्णवचनम्—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किमुपायनमानीतं ब्रह्मन् मे भवतागृहात् ।
अण्वप्युपाहृतं भक्तैः प्रेम्णाभूर्येव मे भवेत् ।
भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते ॥

(श्रीमद्भाग० 10.80.3)

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥

(श्रीमद्भाग० 10.80.4=गीता 9.26)

अतः शुद्धाद्वैतसिद्धान्ते भक्तिरेव सर्वेभ्यः साधनेभ्यः श्रेष्ठेति मन्यते । सा च भक्तिर्द्विधा भवति (1) मर्यादाभक्तिः (2) पुष्टिभक्तिश्चेतिभेदात् । 'कृष्णाधीना तु मर्यादा, स्वाधीना पुष्टिरुच्यत' इति निबन्धोक्तेः । तत्र 'पोषणं तदनुग्रहः' (भा० 2.10.4) इति शुकवाक्यात् 'कृष्णानुग्रहरूपाहि पुष्टिः कालादिबाधिकेति' निबन्धोक्तेश्च । 'अनुग्रहरूपो भगवद्धर्मः पुष्टिरिति निष्कर्षः । सा न विलक्षणा लौकिकालौकिक फलसाधिका । अतोऽधिकारिविशेषे निःसाधने श्लाघ्यफलं जनयन्ती तेनैवानुमीयते 'अनुग्रहो लोकसिद्धो गूढभावान्निरूपित' इति निबन्धे । अर्थात् गूढभावात् अनुग्रहो लोक उत्तमफलजननेन प्रकटीभवति, यथा अजामिलादिषु । निन्दिक्तकर्मनिरतोऽप्यजामिलः संकेतितभगवन्नाम्ना यमदूतानां पाशाद्विमोचितः । एवं विश्वरूपदधीचिवृत्रासुराणां हन्ताऽनिष्टफलभोगयोग्योऽपि शक्रो भगवदनुग्रहादेव पापफलभोगाद्विमोचितः । वज्रहतोऽपिऽदितेर्गर्भो न ममार; प्रत्युतैकोनपञ्चाशत्वं गत इति सर्वं भगवदनुग्रहेणैव सम्पन्नम् । उच्यते च—

एवमिन्द्रे महापुष्टिः सर्वबाधा निरूपिता ।
सर्वबाधकरूपाहि दैत्ये पुष्टिरथोच्यते ॥

महापुष्टित्वं नाम—बलवदनिष्टनिवृत्तिपूर्वकप्रभुपादावाप्तिसाधकत्वम् । सर्वबाधेत्यत्र सर्वशब्देन कालकर्मस्वभावाग्राह्या । तदिह कुत्सितकर्मणामनिष्टफलाजनकत्वेन कर्मबाध इन्द्रेऽजामिले च स्पष्ट एव । दितिगर्भप्रसङ्गे वज्रप्रहारस्य प्राणवियोगकर्तृत्वरूपः स्वभावो बाधितः ।

न ममार दितेर्गर्भः श्रीनिवासानुकम्पया ।
बहुधा कुलिशक्षुण्णो द्रौण्यस्त्रेण यथा भवान् ॥

(श्रीमद्भाग० 6.18.65)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवमन्यत्रापि। तत्र विशेषानुग्रहजन्या या भक्तिः, सा पुष्टिभक्तिः। तल्लक्षणञ्च- 'भगवत्स्वरूपातिरिक्तफलाकांक्षारहितत्वे सति भगवत्स्वरूपात्मकफलाकांक्षावत्त्वम्'। अतः पुष्टिमार्गीया भक्ता भगवत्स्वरूपातिरिक्तं न किमप्यन्यत् कामयन्ते। उक्तञ्च—

न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यम्।
न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनाऽन्यत्॥
(श्रीमद्भाग० 11.14.14)

मद्गुणश्रुतिमात्रेण, मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना, यथा गङ्गाम्भसोऽम्बुधौ॥

लक्षणं भक्तियोगस्य, निर्गुणस्य ह्युदाहृतम्।
अहैतुक्यव्यवहिता, या भक्तिः पुरुषोत्तमे॥

सालोक्यसार्ष्टि सामीप्य सारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति, विना मत्सेवनं जनाः॥

स एव भक्तियोगाख्य, आत्यन्तिक उदाहृतः।
येनातिव्रज्य त्रिगुणं, मद्भावायोपपद्यते॥
(श्रीमद्भाग० 3.29.11-14)

अहं सर्वेषु भूतेषु, भूतात्मावस्थितः सदा।
तमवज्ञाय मां मर्त्यः, कुरुतेऽर्चाविडम्बनम्॥

यो मां सर्वेषु भूतेषु, सन्तमात्मानमीश्वरम्।
हित्वाऽर्चां भजते मौढ्याद्भस्मन्येव जुहोति सः॥

द्विषतः परकाये मां, मानिनो भिन्नदर्शिनः।
भूतेषु बद्धवैरस्य न, मनः शान्तिमृच्छति॥

अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयाऽनघे।
नैव तुष्येऽर्चितोऽर्चायां भूतग्रामावमानिनः॥

अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत्।
यावन्न वेदस्वहृदि सर्वभूतेष्ववस्थितम्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आत्मनश्च परस्यापि, यः करोत्यन्तरोदरम् ।
तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्वणम् ॥
(श्रीमद्भाग० 3.29.21-26)

उपर्युक्त श्रीमद्भागवतस्थभगवद्वाक्यात् स्पष्टमेव प्रतीयते यत् भगवानेव सर्वभूतेषु जीवरूपेण प्रविश्य विराजते । अतो जीवान् परमात्मनो भिन्नभावेन ये पश्यन्ति, तेषां भिन्नदर्शिनां मृत्युर्महदुल्वणं भयं विधत्त इति ।

श्रीमद्वल्लभाचार्यसिद्धान्तप्रतिपादके 'ब्रह्मवादनामके' ग्रन्थे प्रपञ्चविषये विशदं विचारितं यत् प्रपञ्चोऽयं ब्रह्माभिन्नोऽथवा ब्रह्माभिन्न इति । तत्र प्रथमं सन्देहमुत्थापयति ।

ब्रह्माभिन्नः प्रपञ्चश्चेदस्मद्दृग्विषयः कथम् ।
ब्रह्मभिन्नः प्रपञ्चश्चेद् ब्रह्मविद्विषयः कथम् ॥

अतोऽभेदस्तथा भेदः शक्यते वक्तुं कथम् ।
इति चेन्न यथाब्रह्म रूप्यते तत्प्रपञ्चयोः ॥

अयमाशयः—श्रीमद्भगवद्गीतायां भगवता साक्षात् कृष्णेनैतदभिहितं यत्—

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ (गी० 2.69)

अर्थात् सर्वभूतानामस्मदादीनां मायामोहितचेतसां कृते ब्रह्मस्वरूपं सर्वथाऽज्ञेयमेवास्ति, ब्रह्मविदां ज्ञानिनां कृते तु तद्ब्रह्मस्वरूपमेव सुज्ञेयमस्ति, न तु प्रपञ्चः । एवञ्च प्रपञ्चोऽयमस्माकं ब्रह्मविदाञ्चापि ज्ञानविषयत्वाद् ब्रह्मभिन्नो ब्रह्माभिन्नो वेति संदेहः समुत्पद्यते समुत्पन्ने चैवंविधे संशये वेदानां परमप्रमाणभूतानां प्रामाण्यमवलम्ब्य प्रपञ्चस्य निःसन्दिग्धरूपेण ब्रह्माभिन्नत्वमेवावगन्तव्यम् । तथा हि—

सर्वं खल्विदं ब्रह्म (छा० 3।10।1)

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति । (क० 2।1।10)

पुरुष एवेदं सर्वम् । (ऋ० 10।90।2)

पादोऽस्य विश्वाभूतानि । (ऋ० 10।90।3)

स हैतावानसा । (बृ० 1।4।3)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवञ्च— यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम् ।
योऽस्मात्परस्माच्च परस्तं प्रपद्ये स्वयं भुवम् ॥ (भा० 8.3.3)

यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः ।
नामरूपविभेदेन फल्ग्व्या च कलयाकृताः ॥ (भा० 8.3.22)

यथार्चिषोऽग्नेः सवितुर्गभस्तयो निर्यान्ति संयान्त्यसकृत् स्वरोचिषः । तथा अतोऽयं गुणसम्प्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः ॥ (भाग० 8.3.23)

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥
(श्रीमद्भगवद् गी० 10.42)

जगतामादिभूतस्त्वं जगत्वं, जगदाश्रयः ।
सर्वभूतेष्वसंयुक्त एको भाति भवान् परः ॥
(अध्यात्मरामायणे 1.5.52)

एवमसंख्येयप्रमाणैः प्रपञ्चस्य ब्रह्मरूपता, सुविशदं प्रतिपादितास्ति । एवञ्च ब्रह्मविदां दृष्टिरपि प्रपञ्चे ब्रह्माभिन्नत्वेनैव पतति, न तु ब्रह्मभिन्नत्वेन । प्रपञ्चविषयेऽस्माकं दृष्टिर्नार्थनियामिका भवितुमर्हति मायावृतत्वात् । मायानामभगवतः शक्तिः, सा द्विप्रकारिका भवति । एका आवरणरूपा, द्वितीया विक्षेपरूपा । तत्रावरणरूपाया मायास्ति, सा समस्तं प्रपञ्चमावृत्य वास्तविकं स्वरूपं तिरोभावयति । द्वितीया विक्षेपात्मिका वस्तुनि धर्मान्तरं विक्षिपति । अतोऽस्माकं दृष्टौ ब्रह्मभूतमपि जगद् ब्रह्मभिन्नत्वेन प्रतीयते । किन्तु ब्रह्मविदां दृष्टौ तेषां माययाऽनावृतत्वात् समस्तं जगद् ब्रह्मत्वेनैव भासते । 'नहि मायादोषदुष्टेन्द्रियजीवप्रत्यक्षविरोधमात्रेण सर्वप्रमाणमूर्धन्यरूपाऽप्रामाण्यशङ्काकलङ्करहिता श्रुतिरन्यथयितुं शक्या' इति ब्रह्मवाददीपिकायां प्रतिपादितम् । किञ्च शुद्धाद्वैतवेदान्तसिद्धान्तप्रतिपादके 'ब्रह्मवादोख्यग्रन्थे स्पष्टमुल्लिखितं यत् प्रपञ्चस्य ब्रह्मणो भेददर्शनमस्माकं भ्रान्तिरेव, मायावृतत्वादस्मदादीनामिति । तथा हि—

सर्वोपनिषदाऽभेदः स्पष्टमेव निरूपितः ।
अतोऽस्मत्प्रत्ययो भ्रान्तो मायावृतविलोकनात् ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उत्पन्ने ब्रह्मविज्ञाने सद्यस्तद्बाधदर्शनात्
अवास्तवं रूपमेतद्वाचारब्धं विकारि यत् ॥

ब्रह्मबोधेऽनृतस्यापि ब्रह्मत्वात् प्रत्ययस्तथा ।
यावद्बोधन्तु सत्यस्यासत्यस्य कथनं पुनः ॥

पश्चात् सर्वस्य सर्वत्वं नानृतं किञ्चिदस्ति हि ।
देहादयोऽनृतं तावद् यावत् कार्यतया मतिः ॥

तन्निवृत्तौ पुनः सर्वं ब्रह्मरूपं न संशयः ।
देहादिष्वपि भक्तानां वियुक्तानां हरेर्मतिः

(ब्र० वा० 3-7)

। इति ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संक्षेपतः सर्ववेदान्तसिद्धान्तसमन्वयः

प्रस्तुतनिबन्धस्य यद्यपि 'शुद्धाद्वैतवेदान्तसम्मतं ब्रह्मस्वरूपप्रतिपादनमात्रमेव मुख्यो विषयोऽस्ति, तथापि एतदपि नान्तरीयकमेव प्रतीयते यत् अन्याचार्यैः श्रीमच्छङ्कराचार्यादिभिः प्रतिपादिता ब्रह्मविषयकाः सिद्धान्ता अस्मात् शुद्धाद्वैतवेदान्तसिद्धान्तात् विरुद्धयन्ते न वेत्येतदपि विशदीकरणीयमेव।

नास्त्येतदविदितं विदुषां यत् सर्वैरप्यास्तिकाचार्यैः स्वीयः स्वीयः सिद्धान्तो निर्विचिकित्सितापौरुषेयवेदमूलकत्वात् सर्वथा सत्योऽभ्रान्तश्चेति समर्थ्यते। स्मृतिपुराणेतिहासादिभिश्चानुकूलतर्कैरपि स्वप्रतिपादितसिद्धान्तस्य पुष्टिः क्रियते। सत्यप्येवं सर्वेषां सिद्धान्तानां वेदमूलकत्वे प्रतीयमानोऽयं भेदो विरोधो वा किं भ्रान्त्या प्रतीयत उत वस्तुतोऽस्ति तत्र विरोधः। चेत् वस्तुतो विरोधो वेदप्रतिपादित एव, तर्हि वेदान्तानां वेदानाञ्च विरुद्धवादिनामप्रामाण्यं प्रसज्जेत, तत्तु सर्वथा दुर्वचमेव, साक्षात् परमेश्वरप्रतिपादितत्वाद्वेदानाम्। तथा हि—'स यथार्द्रैन्धनाग्नेरभ्याहितात् पृथग् धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानि' (बृ० 2.4.10)।

अत एवं प्रतीयते यत् चेदस्ति विरोधः परस्परं सिद्धान्तानां तदा स विरोधो मनुष्याणां परमेश्वरातिरिक्तानां येषां केषांचिदपि वा परिमितज्ञानत्वात्तत्कृतभ्रान्तिवशादेव भवितुमर्हति। किन्त्वेतदपि वक्तुं न कस्यापि विज्ञस्य साहसः समुदेतुमर्हति। यैर्हि ब्रह्मचर्यादिव्रतपालनपूर्वकं वेदादिसर्वशास्त्राणि ब्रह्मनिष्ठसर्वज्ञकल्पगुरुशुश्रूषापरायणैराजीवनं सश्रद्धमधीतानि। तेषां भ्रान्तत्वकल्पनादुःसाहसमात्रमेव। अतो निःसङ्कोचं येन केनापि वक्तुं शक्यते यत् प्रतीयमानोऽयं मिथः सिद्धान्तानां विरोधः केवलमविचारित एव रमणीयः। वस्तुतस्तु सर्वसिद्धान्तानां समन्वयः सुसाध एव। तदुक्तं श्रीपुष्पदन्ताचार्येण प्राग्भवीयगन्धर्वराजेन धूर्जटेरनन्यदासेन शिवमहिम्नस्तोत्रे—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति,
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषाम्,
नृणामेकोगम्यस्त्वमेसि पयसामर्णव इव ॥ (शि० म० 7)

एतेनैतत्सुस्पष्टं भवति यद्भवतु नाम रुचीनां वैचित्र्यात् परस्परं प्रस्थानभेदः। किन्तु पयसामर्णव इव स एकः शिवः परब्रह्मैव सर्वेषां प्राप्यः। इतोऽधिकं न किमपि सिद्धान्तसमन्वयायापेक्ष्यते। तथापि भ्रान्तिनिराकरणं तु कार्यमेव अन्यथा संशयात्मा विनश्यति।

तत्र तावद् वेदबाह्यानां बार्हस्पत्यादीनां सर्वथोपेक्ष्यमाणानां नास्तिकानां सिद्धान्तविषये न तावदस्ति किमपि विचारणीयम् 'कथापि खलु पापानामलमश्रेयसे सताम्।' साधूक्तं श्रीपुष्पदन्तेन—

किमीहः किं कायः स खलु किमुपायस्त्रिभुवनं,
किमाधारो धाता सृजति किमुपादान इति च।
अतर्क्यैश्वर्यैत्वय्यनवसरदुःस्थो हतधियः,
कुतर्कोऽयं कांश्चित्मुखरयति मोहाय जगतः ॥ (शिव० म० 5)

तेषां कुतार्किकाणां मुखमुद्रणमुत्तरमपि तेनैव पुष्पदन्ताचार्येण तत्रैव तर्कान्वितं (तर्कपूर्ण) प्रदत्तम्।

अजन्मानो लोकाः किमवयववन्तोऽपि जगता-
मधिष्ठातारं किं भवविधिरनादृत्य भवति।
अनीशोवा कुर्याद्भुवनजनने कः परिकरः,
यतो मन्दास्त्वां प्रत्यमा वर संशेरत इमे ॥ (शिव० म० 6)

अत उपर्युक्तानां हतधीनां मन्दानां विषये मयापि मौनमेवालम्ब्यते। विचारणीयानि तु केवलान्यास्तिकदर्शनान्येव, यतनीयमपि किञ्चित् तेषामेव समन्वयविषये। तानि चास्तिकदर्शनानिषंऽव। तथा हि—

कपिलस्य कणादस्य गौतमस्य पतञ्जलेः।
व्यासस्य जैमिनेश्चापि शास्त्राण्याहुः षडेव हि ॥

आस्तिकत्वन्नाम 'अस्ति नास्ति दिष्टं मतिः' (पा० अ० 4.4.60) इति पाणिनीयसूत्रेणास्ति परलोक ईश्वरश्चेति। एवं मतिर्येषां त आस्तिका इति व्युत्प-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्त्येमे सर्वेऽप्याचार्या आस्तिकादर्शनानि च तेषामास्तिकान्येवेत्यत्र नास्तिकस्यापि काचिद् विप्रतिपत्तिः । अत एवेमानि षड्दर्शनानि सेश्वराणीति निगद्यन्ते । अस्ति चेदिदमेवं तदा समायातमेवैतद्यत् समेषामेषामाचार्याणां सिद्धान्ताः सेश्वरत्वात् सुतरां प्रयासमन्तरैव स्वत एव समन्वितंतिसमन्वयस्थापनक्लेशेनालम् । कपिल-मुनिप्रणीतसांख्यशास्त्रस्य सेश्वरत्वं 'सांख्यतत्त्वविमर्शप्रकरणेऽस्मिन्निबन्धे प्रागे-वोपपादितं तत्तु तत एवावगन्तव्यम् ।

अवशिष्यते ब्रह्मण ईश्वरस्य स्वरूपविषये विरोधोऽविचारितरमणीयः अत-स्तस्य परिहारोऽवश्यमेव कर्तव्यत्वेनापतति । परिहृते च विरोधे सर्वसिद्धान्ता-नामेकस्मिन्नद्वितीये सत्यज्ञानानन्तानन्दात्मके सर्वमये सर्वस्वरूपे निर्गुणे निष्क्रिये शान्तेऽनवधिकनिरतिशयासंख्येयसद्गुणगणाश्रये च निर्णीते तात्पर्येऽधिष्ठानभूत-रज्जुस्वरूपावगते सर्पभ्रान्तिरिव विरोधभ्रान्तिरपि व्यपगमिष्यत्येवेति संक्षेपेण भ्रान्तिमूलकविरोधनिरसने प्रयासो विधीयते । तथा हि—

सर्वैरप्याचार्यैरेकस्वरेण 'ऋते ज्ञानान्न मुक्तिः' ।

'यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिंल्लोके जुहोति, यजते, तपस्तप्यते, बहूनि-वर्षसहस्राण्यन्तवदेवास्य तद्भवति । यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोका-त्प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात् प्रैति स ब्राह्मणः (बृ० 3.8.10) 'आत्मा वा रे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम् (बृ० 2.4.5), 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (श्वे० 3 8) इत्यादि-श्रुतिबलादात्मज्ञानस्य नान्तरीयकत्वमङ्गीक्रियते । उक्तञ्च —

अन्यथा सन्तमात्मानं योऽन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चौरेणात्मापहारिणा ॥

अत आत्मयाथात्म्यज्ञानाय प्रयतितव्यमेवान्यथोपर्युक्तवाक्येन सर्वपापकार्यकारि-त्वरूपो दोषः शिरस्यापतति । श्रीमच्छङ्कराचार्येणापि स्वकीये 'अथातो ब्रह्म-जिज्ञासे'त्येतद् ब्रह्मसूत्रभाष्ये ब्रह्मस्वरूपसाधारण्ये विप्रतिपत्त्यभावेऽपि तद्विशेष-विषये बह्व्यो विप्रतिपत्तयः प्रदर्शिता । उक्तञ्चान्ते यत् 'तत्राविचार्य यत्कि-ञ्चित् प्रतिपद्यमानो निःश्रेयात् प्रतिहन्येतानर्थं चेया'दिति । अतः प्रतीयते यद् अयथावदात्मस्वरूपावगमादनर्थप्राप्तिः श्रीमच्छङ्कराचार्यस्याप्यभिमतैव । अत एव प्रायः सर्वेऽपि साम्प्रदायिकास्तत्स्वरूपावधारणाय प्रायो मिथो विवदन्ते । विवदन्तु नाम ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किन्तु चित्रमेतद् यत् यत्स्वरूपावधृतिः शतधृतिनापी यत्तयेदन्तया वा स्वायुःसहस्रेणापि कर्तुन्नशक्यतेऽनवधार्यत्वात्तत्स्वरूपस्य, तत्रापरिच्छेद्यस्यानिर्वचनीयस्य परिच्छिन्नत्वे निर्वचने वा प्रयासो यस्य कस्यापि किन्न स्यात्, असफल एव भविष्यति। अनाद्यनन्तस्याद्यन्तपरिमार्गणप्रयासः किं कदापि सफलतां समुपलब्धुं शक्नोति। उक्तञ्च—

तवैश्वर्यं यत्नाद् यदुपरि विरिञ्चिर्हरिरधः,
परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः। (महि० स्तो० 10)

चेद्धरिविरिञ्च्योरपि नास्ति सामर्थ्यमपरिच्छिन्नस्य परिच्छेदकरणे, तत्र का कथान्येषामिति। श्रुतयस्तु मुक्तकण्ठेनोच्चैः श्रावयन्ति, कश्चिच्छृणोतु न वा यद् 'यतो वाचो निवर्तन्ते अप्राप्यमनसा सह' (तै० 2.4.1, 2.9.1) 'यन्मनसा न मनुते येनाहुर्मनो मतम्' (के० 1.5), 'यद्वाचानभ्युदितं' (के० 1.4) 'यस्यामतं तस्य मतं मतं यस्य न वेद सः अविज्ञातं विजानतां विज्ञातमविजानताम्' (के० 2.3) इति। अतो येन यथावगम्यते श्रवणादिभिः तत्कृते ब्रह्म तथैव चेत् स्यात् का हानिः। 'न विद्मस्तत्तत्त्वं वयमिह हियत्त्वं न भवसि।'

श्रीपुष्पदन्ताचार्येणाप्युक्तं 'अतीतः पन्थानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि। स कस्यस्तोतव्यः कतिविधगुणः कस्य विषयः पदेत्वर्वाचीने पतति न मनः कस्य न वचः) श्लोकस्यास्य टीकायां श्रीस्वामिमधुसूदनसरस्वतीभिर्ब्रह्मणो निर्गुणत्वं सगुणत्वञ्चोभयमपि सम्यक् प्रतिपादितम्। लिखन्ति च तत्र ते 'स कस्य स्तोतव्य' इत्येतस्य प्रसङ्गे यद्—न केनापि स्तोतुं शक्य' इत्यर्थः। सगुणस्य स्तोतव्यत्वाभावे हेतुमाह, कतिविधगुणः कतिविधा अनेकप्रकारा गुणा यत्र स तथा (कतिविधगुणः) गुणानाम् अनन्तत्वादेव न स्तुत्यर्हं इत्यर्थः। निर्गुणस्य स्तोतव्यत्वाभावे हेतुमाह 'कस्य विषय' इति, न कस्यापि विषयो निर्धर्मकत्वात्। अतएवाविषययत्वान्नस्तुत्यर्हः।

अनेनोपर्युक्तश्रीमधुसूदनसरस्वतीकृतव्याख्यानेन सम्यक् प्रतिपादितं भवति यद् निर्गुणब्रह्मणोऽज्ञेयत्वम् इति सगुणस्य च तस्यैवानवधिकनिरतिशयकल्याणगुणगणाश्रयत्वमिति च। अनेन सुस्फुटितमेतद्यदेकमेव ब्रह्मनिर्गुणं सगुणञ्चोभयथा भवति सर्पस्य सरलत्ववत् कुण्डलाकारवच्च, मृदो वा घटशरावादिवत्।

एवञ्च श्रीमच्छङ्कराचार्येणापि 'यस्यामतं तस्यमतम्' एतन्मन्त्रस्य भाष्येऽभिहितं ब्रह्मणोऽज्ञेयत्वम्। तथा हि—यस्य ब्रह्मविदः अमतम् अविज्ञातम्, अवि-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दितं ब्रह्म इति मतम् अभिप्रायः निश्चयः, तस्य मतं ज्ञातं सम्यग् ब्रह्मेत्यभिप्रायः। यस्य पुनः मतं ज्ञातं, विदितं मया ब्रह्मेति निश्चयः, न वेदैव सः, न ब्रह्म विजानाति सः।

अस्ति चेदेवं यत् तद्ब्रह्माज्ञेयं वस्तु तदा तस्य ब्रह्मणो यथावज्ज्ञानम् अज्ञेयत्वमेवास्ति (अज्ञेयत्वेनैव ज्ञातं भवितुमर्हति) नान्यथा। 'पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि' (पुरुषसूक्त 3)।

एतद्विषयद्वयन्तु पूर्वोक्तप्रकारेण प्रायो निर्धारितप्रायमेव यन् नास्ति वैमत्यलेशोऽपि सर्वेषामप्यास्तिकाचार्याणां ब्रह्मणः सत्ताविषये तस्याचिन्त्यस्वभावविषये च। अवशिष्यत एतद् यत् तदेव ब्रह्मचेतनाचेतनरूपाभ्यां सचराचरेऽस्मिञ्जगति सर्वमावृत्य तत्तद्रूपेण स्वयं विभाति प्रतीयते च। अथवा रज्जौ भुजङ्गवत् प्रपञ्चप्रतीतिः केवलं प्रातिभासिकी भ्रान्तिरूपेति।

तत्रास्त्येतदवधेयं यद् आरुणेः श्वेतकेतोश्च सम्वादे "कथन्नु भगवः स आदेशो भवति" इत्येवं श्वेतकेतुना पृष्टः सन्नारुणिस्तत् पिता प्रोक्तवान् यद् 'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छा० 6.1.4) 'यथा सौम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम्' (छा० 6.1.4) 'यथा सौम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं कृष्णायसमित्येव सत्यमेवं सौम्य स आदेशो भवतीति' (छा० 6.1.6)। अत्रैकविज्ञानेन सर्वविज्ञानप्रदर्शनप्रसङ्गे आरुणिनोक्तोदाहरणत्रयेऽप्यविकृतपरिणामवादात्मकान्येवोदाहरणानि प्रदर्शितानि, न तु मायावादमिथ्यात्ववादादिसमर्थकं किमप्युदाहरणं 'रज्जुभुजङ्गरूपं मृगमरीचिकारूपं वा शुक्तौ रजतत्वभ्रान्तिर्वा प्रदर्शिता। अतो ज्ञायते यत् समस्तोऽप्ययं प्रपञ्चः मृदो घटशरावादिवदभिन्न एव, हेम्नः कटककुण्डलादिवद्वा। अन्यथा तेनारुणिनैकविज्ञानेन सर्वविज्ञानप्रसङ्गे तथाविधमुदाहरणमेव वक्तव्यमासीत्।

अस्ति विचारणीयोऽयं विषयो यद् ब्रह्मणो जीवानाञ्च नित्यत्वे श्रुतिसम्मतेऽपि जगतो विषये कास्ति सम्मतिः श्रुतीनामिति। अत्र सन्ति बह्वयो विप्रतिपत्तयः साम्प्रदायिकानाम्। प्रधानतयापक्षद्वयमेव तावत् समक्षं समुपतिष्ठते—जगतः सत्यत्वं मिथ्यात्वं वेति। तत्र सन्ति केचन जगन्मिथ्यात्ववादिनः सत्यत्ववादिनश्च केचन। अस्ति मिथ्यात्ववादिनां कथनमेतद् यज्जगतः पारमार्थिकी सत्ता चेत् पृथक् स्वीक्रियेत, तदा एकमेवाद्वितीयम्' (छा० 6.2.1), 'मृत्योः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स मृत्युमाप्नोति य इह नानेव पश्यति (क० 2.1.10) द्वितीयाद्वै भयं भवति' इत्यादिश्रुतयो व्याकुप्येरन्निति। अतो भावरूपमज्ञानमाश्रित्य रज्जौभुजङ्गवद्, रविरश्मिषु वारिवच्च जगतः प्रतीतिर्मिथ्यैवेति। मिथ्यात्वञ्च प्रतीतिविषयत्वे सति यथावद्वस्तुपरिज्ञाननिवर्त्यत्वमिति व्यवहरन्ति। सत्यत्वन्नाम कालत्रयाबाधितत्वमिति च।

श्रीमच्छङ्कराचार्यैः स्वकीयायां दशश्लोक्यां 'न भूमिर्न तोयं', 'न वर्णा न वर्णाश्रमाचारधर्माः', 'न शुक्लं न कृष्णं', 'न चोर्ध्वं न चाधः' इत्यादिभिः श्लोकैः 'अनेकान्तिकत्वात्', 'अनात्माश्रयाहंमपाध्यासहानात्', 'अविद्याश्रयत्वात्' वियद्व्यापकत्वाच्च हेतुभिः सम्पूर्णस्य प्रपञ्चस्य मिथ्यात्वं प्रदर्शितम् प्रोक्तञ्च साक्षात् स्वकण्ठेन 'न च त्वं न चाहं न चायं प्रपञ्चः' इति। अत एव च तदनुसारिभिः प्रायः जगन्मिथ्यात्ववादः समर्थ्यते कथ्यते च 'ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापर' इति।

अत्रास्त्येतदवधेयं यद् श्रीमच्छङ्कराचार्याः किं जगतस्त्रैकालिकीमसत्तामङ्गीकुर्वन्ति, उत विकारभूतस्य नामरूपात्मकमात्रस्येति। तत्र छान्दोग्योपनिषदः षष्ठाध्यायद्वितीयखण्डसम्बन्धितद्भाष्येणैव विस्पष्टं भवितुमर्हति। तथा हि—

तत्रास्त्येकाऽऽख्यायिका षष्ठाध्याये आरुणिश्वेतकेतुसम्वादात्मिका। प्रतिपादितञ्च तत्र 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्। तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत॥ (छा० 6.2·1) अत्रत्यं श्रीशाङ्करभाष्यम्। तथा हि—

"सदेव सदित्यस्तितामात्रं वस्तु सूक्ष्मं निर्विशेषं सर्वगतमेकं निरञ्जनं निरवयवं विज्ञानं यदवगम्यते सर्ववेदान्तेभ्यः। एव शब्दोऽवधारणार्थः। किं तदवध्रियत इत्याह—'इदं जगन्नामरूपक्रियावद्विकृतमुपलभ्यते यत् तत्सदेवासीदित्यासीच्छब्देन सम्बध्यते। कदा सदेवेदमासीदित्ययुच्यते, अग्रे जगतः प्रागुत्पत्तेः।

किं नेदानीमिदं सद् येनाग्र आसीदिति विशेष्यते ? न। कथं तर्हि विशेषणम् ? इदानीमपीद सदेव, किन्तु नामरूपविशेषणवदिदं शब्दबुद्धिविषयं चैतीदं च भवति। प्रागुत्पत्तेस्त्वग्रे केवलसच्छब्दबुद्धिमात्रगम्यमेवेति सदेव सौम्येदमग्र आसीदित्यवधार्यते। न हि प्रागुत्पत्तेर्नामवद्रूपवद्वेदमिति ग्रहीतुं शक्यं वस्तु सुषुप्तकाल इव। यथा सुषुप्तादुत्थितः सत्त्वमात्रमवगच्छति सुषुप्ते सन्मात्रमेव केवलं वस्त्विति तथा प्रागुत्पत्तेरित्यभिप्रायः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथेदमुच्यते लोके पूर्वाह्णे घटादिसिसृक्षुणा कुलालेन मृत्पिण्डं प्रसारितमुपलभ्य ग्रामान्तरं गत्वा प्रत्यागतोऽपराह्णे तत्रैव घटशरावाद्यनेकभेदभिन्नं कार्यमुपलभ्य मृदेवेदं घटशरावादिकेवलं पूर्वाह्ण आसीदिति, तथैहाप्युच्यते सदेवेदमग्र आसीदिति। एकमेवेति, स्वकार्यपतितमन्यन्नास्तीत्येकमेवेत्युच्यते। अद्वितीयमिति; मृद्व्यतिरेकेण मृदो यथान्यद्घटाद्याकारेण परिणमयितृ कुलालादिनिमित्तकारण दृष्टं तथा सद्व्यतिरेकेण सतः सहकारिकारणं द्वितीयं वस्त्वन्तरं प्राप्तं प्रतिषिध्यतेऽद्वितीयमिति, नास्य द्वितीयं वस्त्वन्तरं विद्यते इत्यद्वितीयम् ॥)

इत्युपर्युक्तशाङ्करभाष्यतः स्पष्टं प्रतीयते यद् श्रीमच्छङ्कराचार्यस्यापि जगतः सत्ताऽभिमतेवास्ति, अन्यथा कथमेवं वदेत् 'इदानीमपि सदेव' इति। मन्त्रेऽपि 'असतः सज्जायत' इत्युक्तम्। अत्र सन्नाम इदं शब्दवाच्यंजगदिति। सज्जायत, जगदजायत इत्यर्थः।

एवञ्चेज्जगतः सत्त्वं श्रुत्या भाष्येणचापि समर्थितं स्वीकृतञ्च तदा न जाने किम्मूलकं जगन्मिथ्यात्वं तदनुसारिभिर्मन्यते। षष्ठाध्यायद्वितीयखण्डस्य द्वितीयमन्त्रेऽपि 'कथमसतः सज्जायेत' इत्यत्र सच्छब्देन जगदेवोपात्तमिति सुस्पष्टमेव। एतदप्युपर्युक्तभाष्ये, अद्वितीयशब्दस्य व्याख्यावसरेऽभिहितं यद् घटशरावादेरुपादानकारणं यद्यपि मृदेवास्ति तथापि घटशरावादेर्निमित्तकारणं मृदो भिन्नं कुलालोऽप्यस्ति, किन्तु जगतो भिन्नोपादाननिमित्तकारणम् एकं ब्रह्मैव, न द्वितीयमिति। तादात्म्यसम्बन्धेन यत्र कार्यमुत्पद्यते तदेवोपादानकारणं भवति। अतः समायातमेतद् यज्जगतः सर्वात्मना ब्रह्मणोऽभिन्नत्वमेव, अर्थात् ब्रह्मैव जगदाकारेण स्फुरतीति।

कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेतेति। सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छा० 6.2.2) इत्येतन्मन्त्रस्यापि भाष्ये भाष्यकारेण स्पष्टमेवोक्तम्। तथा हि—भाष्यम्।

'सत्यमेवं न सतः सदन्तरमुत्पद्यते, किं तर्हि? सदेव संस्थानान्तरेणावतिष्ठते। यथा सर्पः कुण्डली भवति, यथा च मृच्चूर्णपिण्डघटकपालादिप्रभेदैः।

न च सर्वेषां प्रमितवस्तूनां निषेधाज्जगतस्तुच्छत्वं निगद्यते, समर्थ्यते चापि तदाऽप्रमितस्य वस्तुनो ब्रह्मणोऽपि सत्ता अज्ञातत्वात् सन्दिग्धैवेति विनिश्चितमेव। चित्रन्त्वेतत् प्रतिभाति यत्, प्रत्यादिप्रमाणप्रमिते जगति मिथ्यात्वं प्रतिपाद्यते 'जगत्तुच्छमेतत् समस्तं ततोऽन्यत्' (दश० श्लो० 8) अननुभूतविषये

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मणि मनोवाचामगोचरमित्युक्त्वा समर्थ्यते च तत्सत्ता। 'न शास्ता न शास्त्रं' (द० श्लो० 7), 'न च त्वं न चाहं न चायं प्रपञ्चः' (द० श्लो० 7) इत्येवं प्रकारेण चेत्, समस्तस्य जगतः, आत्मनः, अन्येषामपि मिथ्यात्वमनर्गलं वक्तुं शक्यते तदा मिथ्याभूतेन शास्त्रेण मिथ्याभूतेन च प्रमात्रा कथं 'सत्यं ज्ञानमनन्तं ब्रह्म' इति तस्य भवदभिमतस्य ब्रह्मणः सत्यत्वादिकं साधयितुं शक्यम्। नहि मिथ्याभूतैर्मोदकैर्बुभुक्षानिवृत्तिर्न वा रसास्वादनं जायते, न वा मिथ्याभूतेन धूमेनाग्निरनुमातुं शक्यते, न वा निःसत्ताकेनानुमात्रा। अतः स्थलमेतद् गाम्भीर्येण विवेचनीयमिति प्रतिभाति।

तत्र विविधविचित्ररचनाविशिष्टस्य जगतः कार्यत्वमाश्रित्यैव तत्कर्तृत्वेनेश्वरसिद्धिः क्रियते नैयायिकादिभिराचार्यैः। वेदान्तिभिरपि 'यतो वा इमानि भूतानि' (तै० 3 1), 'तन्मनोऽकुरुत' इत्यादिश्रुतिभिरनुकूलतर्कैश्च साध्यते ब्रह्मणः सत्ता। परन्तु चेज्जगतः सत्तैव नास्ति यस्य कार्यत्वमाश्रित्येश्वरसिद्धिः क्रियते तदा असत्त्वस्य तस्य जगतः किं नाम कार्यत्वं, शशविषाणस्य च किन्नाम सौन्दर्यम्। एवं सर्वोऽपि गुडो गोमयो भविष्यति। अतः स्थिरेण चेतसा श्रीमच्छङ्कराचार्याणामाशयस्तदुक्तीनां तात्पर्यञ्च किमिति सम्यग् विवेचनीयम्।

तैरपि सत्तात्रयन्त्वङ्गीक्रियत एव (1) पारमार्थिकी, (2) व्यावहारिकी, प्रातिभासिकी चेति। यदि प्रातिभासिकी सत्ताऽपि तैः स्वीक्रियते तदा व्यावहारिकसत्ताविषये किमुत वक्तव्यम्। समायातमेतदनेन यत् तेऽपि प्रपञ्चं सर्वथानिःसत्ताकं नैव मन्यन्ते। किन्त्वेतत्तु सर्वथासिद्धमेवास्ति यत् तन्मतेऽपि जगदेतत् स्थूलदृष्ट्या व्यावहारिकसत्तावदिति। परमार्थतस्तु साक्षादपरोक्षाद्ब्रह्मैवेति।

न च कथं पुनस्तैरेव 'जगत्तुच्छमेतदित्यभिहितमिति शङ्कनीयम्। तदुक्ततुच्छपदस्य किं तात्पर्यमिति गवेषणीयमेव। मां त्वेवं प्रतिभाति यत् तेषामस्त्येतदेव तात्पर्यं यन्मृदतिरिक्तत्वेन घटशरावादीनां घटत्वादिना यथा सत्तानास्ति तथैव ब्रह्मातिरिक्तत्वेन नानानामरूपादिमत्त्वेन प्रतीयमानस्य जगतोऽपि जगद्रूपेण सत्ताऽभाव एवास्ति। नहि घटत्वेन निःसत्ताको घटो मृत्तिकात्वेनापि निःसत्ताको भवितुमर्हति, तत्र पारमार्थिकमृत्तिकायाः सद्भावात्। एवमेव पारमार्थिकत्वेनासत्यस्यापि जगतस्तदधिष्ठानभूतब्रह्मत्वेनापि मिथ्यात्वमस्तीति कोनाम वक्तुं शक्नोति। अत एवैवं प्रतीयते यच्छ्रीमच्छङ्कराचार्याणां नास्ति कदाप्ययमभिप्रायो यज्जगत् सर्वथा शून्यमसदिति, प्रत्युत 'सर्वं खल्विदं ब्रह्म' (छा० 3.14.1)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्येतच्छ्रुतिवाक्यं दृढयितुमेव ब्रह्मातिरिक्तत्वेन प्रतीयमानानां गगनानिलानलसलिलादिभूतानां भौतिकानाञ्च सर्वेषां पदार्थानां तत्तद्रूपेण मिथ्याप्रतीयमानानां तादृशी प्रतीतिरेव मिथ्या। अत एवोक्तं 'ब्रह्मसत्यं जगन्मिथ्या' इति। यथा घटशरावादयो मिथ्या मृत्तिका सत्यमितिवत्।

न भूमिर्न तोयमित्यादिनिषेधस्याप्ययमेवाभिप्रायः प्रतीयते यदपरिच्छिन्नस्य ब्रह्मणो भूम्यादिनेदन्तयेयत्तयेदृक्तया वा परिच्छेदो न भवितुमर्हति। परिच्छिन्नस्यानित्यत्वात् विनाशित्वापत्तेः, अनिर्वचनीयत्वानुपपत्तेश्च। उक्तञ्च तत्रैव दशमश्लोकेतैः। तथा हि—

न चैकं तदन्यद् द्वितीयं कुतः स्यान्,
न वा केवलत्वं न चाकेवलत्वम्।

न शून्यं न चाशून्यमद्वैतकत्वात्,
कथं सर्ववेदान्तसिद्धं ब्रवीमि॥ (दश० श्लोक० 10)

उपरितनश्लोके 'अद्वैतकत्वात्' अयं शब्दो हेतुत्वेनोपात्तः। एकत्वादिसंख्यावाचकाः शब्दाः, केवलत्वशून्यत्वादयश्च सर्वेऽपि शब्दाद्वैतसापेक्षा इति न केनापि शब्देन वेदान्तसिद्धस्य ब्रह्मणो निर्वचनं कर्त्तुं शक्यते सहस्रास्येनापि भगवता शेषेण किमुत वक्तव्यमन्येनेति।

एवं श्रीमत् पुष्पदन्ताचार्येणापि ब्रह्मणः परिच्छेदराहित्यं तस्य सर्वात्मकत्वं सर्वरूपत्वमेव समर्थितम्। तद्यथा—

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहः,
त्वमापस्त्वं व्योमत्वमु धरणिरात्मात्वमिति च।

परिच्छिन्नामेवं त्वयि परिणताबिभ्रतुगिरं नविद्मस्तत्तत्त्वं वयमिह हि यत्त्वन्न भवसि॥ (शि० म० स्तो० 26)

अत्रास्मिञ्श्लोके श्रीमत्पुष्पदन्ताचार्येण सर्वेषां तत्त्वानां ब्रह्मरूपत्वं प्रतिपादितं, न तु तेषां मिथ्यात्वमसत्त्वरूपम् मिथ्यात्वञ्चेत् प्रतिपादनीयं स्यात् तदा येन केन प्रकारेण स्पष्टमेव मिथ्यात्वं वदेत्। उक्तन्तु न तथा, प्रत्युत सर्वेषां तत्त्वानां ब्रह्मरूपत्वं प्रतिपादितम्। अतः 'सर्वं खल्विदं ब्रह्म' सिद्धान्तोऽयं ‾स्याप्यभिमत एवेति प्रतीयते।

श्रीमच्छङ्कराचार्यसिद्धान्तं प्रत्यक्षरमनुसरद्भिर द्वैतसिद्धिसिद्धान्तविन्दु-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वेदान्तकल्पलतिकादिविविधग्रन्थप्रणेतृभिर द्वैतिचक्रचूडामणिभिः श्रीमन्मधुसूदन-स्वामिभिरपि श्लोकस्यास्य टीकायां यल्लिखितं तेनापि निखिल-जगतो ब्रह्मरूप-तैव तेषामप्यभिमतैवेति प्रतीयते। तथा हि—'हि यस्मादिह जगति तत्तत्त्वं वस्तु वयन्न जानीमो यद्वस्तु त्वं न भवसि त्वद्भिन्नमिति यावद्' 'वयन्तु त्वदभिन्नत्वेनैव युक्त्या सर्वं जानीम इत्यर्थः' एवञ्च तव सर्वात्मकत्वादर्का-दिविशेषरूपाभिधानं व्यर्थमेव। 'चकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरि-श्वानमाहुः' 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' इत्यादिश्रुत्या प्रवेष्टुरविकृतस्यैव जीवरूपेण प्रवेशप्रतिपादनात्'। इत्यादिश्रीमधुसूदनसरस्वती-कृत श्रीमहिम्नस्तोत्रटीकातः सुस्फुटमेवैतत् प्रतीयते यद् ब्रह्मणोऽविकृतपरिणाम-वादस्तेषामप्यभिमतमेव।

श्रीमच्छङ्कराचार्यविरचिते 'अपरोक्षानुभूति' नाम्निग्रन्थेऽधस्तनानि जगद्-ब्रह्मणोरभेदप्रतिपादकानि पद्यानि समुपलभ्यन्ते। तानीहोपन्यस्यन्ते—

उपादानं प्रपञ्चस्य ब्रह्मणोऽन्यन्न विद्यते।
तस्मात्सर्वप्रपञ्चोऽयं ब्रह्मैवास्ति न चेतरत्॥

व्याप्यव्यापकता मिथ्या सर्वमात्मेति शासनात्।
इति ज्ञाते परे तत्त्वे भेदस्यावसरः कुतः॥

श्रुत्या निवारितं नूनं नानात्वं स्वमुखेन हि।
कथं भासो भवेदन्यः स्थिते चाद्वयकारणे॥

दोषोऽपि विहितः श्रुत्या मृत्योर्मृत्युं स गच्छति।
इह पश्यति नानात्वं मायया वञ्चितो नरः॥

ब्रह्मणः सर्वभूतानि जायन्ते परमात्मनः।
तस्मादेतानि ब्रह्मैव भवन्तीत्यवधार्यताम्॥

ब्रह्मैव सर्वनामानि रूपाणि विविधानि च।
कर्माण्यपि समग्राणि बिभर्तीतिश्रुतिर्जगौ॥

सुवर्णाज्जायमानस्य सुवर्णत्वञ्च शाश्वतम्।
ब्रह्मणो जायमानस्य ब्रह्मत्वञ्च तथा भवेत्॥

स्वल्पमप्यन्तरं कृत्वा जीवात्मपरमात्मनोः।
यः संतिष्ठति मूढात्मा भयं तस्याभिभाषितम्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यत्राऽज्ञानाद्भवेद् द्वैतमितरस्तत्र पश्यति ।
आत्मत्वेन यदा सर्वं नेतरस्तत्र चाण्वपि ॥

यस्मिन् सर्वाणि भूतानि ह्यात्मत्वेन विजानतः ।
न वैतस्य भवेन्मोहो न च शोकोऽद्वितीयतः ॥

अयमात्मा हि ब्रह्मैव सर्वात्मकतया स्थितः ।
इति निर्धारितं श्रुत्या बृहदारण्यसंस्थया ॥
(अपरो० 45-55)

स्वयं श्रीमच्छङ्कराचार्यैरपि रचितानि बहूनि स्तोत्राणि श्रीविष्ण्वादिदेवविषयाणि समुपलभ्यन्ते । चेत् तेषां मते देवादीनां मिथ्यात्वं सर्वथाऽभिप्रेतं स्याद् अलं तेष स्तोत्रैः । स्वरचितषट्पदीति नामके स्तोत्रे लिखन्ति—

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरङ्गः क्वचनसमुद्रो न तारङ्गः ॥
(षट्पदी 3)

अनेनापि श्लोकेनाविकृतपरिणामवादस्तेषामप्यप्रतिकूल एवेति प्रतिभाति । उद्धृतनगनगभिदनुज दनुजकुलामित्र इत्यादिविशेषणशब्दैरवतारवादोऽपि तत्-स्वीकृत एव । स्पष्टञ्चापि व्यक्ति –

मत्स्यादिभिरवतारैरवतारवता ऽवता सदावसुधाम् ।
परमेश्वर परिपाल्यो भवता भवतापभीतोऽहम् ॥
(षट्पदी 5)

सत्स्वप्येवंविधेषु प्रमाणसहस्रेषु प्रपञ्चस्य मृगमरीचिकादिकल्पनं गन्धर्वनगरत्वं वा कीदृशमिति सुधिय एव विभावयन्तु । पारमार्थिकी सत्ता तु सर्वेरप्याचार्यैश्च लीलोपात्तानैकल्पप्रपञ्चस्य परमेशितुः काचिदन्यैवानिर्वचनीया मनोवागगोरेति मन्यत एव ।

जगतो मायिकत्वकथनेनापि 'तत्सत्तैव नास्तीति धारणा' न कथमपि विचारसहतां सहते । मायानाम्न्या शक्त्या सर्वभवनसमर्थस्य ब्रह्मणो विविध-विचित्रप्रपञ्चरूपेण परिणतिः कं नाम दोषमाधत्ते तत्र, येन बहुभिर्विचारशीलैरपि जगतो मिथ्यात्वमलीकत्वञ्च प्रतिपाद्यतेऽनाद्योचितरमणीयमिति ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उपरितनप्रतिपादितेन सन्दर्भेण प्रदर्शितमेतद् यद् यादृशं मिथ्यात्वं 'वाचारम्भणादिश्रुत्या, स्मृतिपुराणादिभिश्चोक्तं यत्र तत्र श्रीशङ्कराचार्येणाप्यभिहितं तादृशं तन् मिथ्यात्वं किमप्यन्यदन्यच्चास्माभिरभिमन्यमानं मिथ्यात्वमिति ।

इतः परं वैष्णवाचार्याणामपि मिथो विरोधो यः कश्चिदापाततः प्रतीयते तत्रापि किमपि विचारणीयमस्ति । मिथ्या प्रतीयमानस्य विरोधस्य निराकरणमपि यथाशक्ति विधेयमेवास्ति । अतस्तस्मिन्नपि विषये किमपि विविच्यते । एतत्तु प्रतिपादितमेव यद् 'यद्रूपेण यद्वस्तु यथा प्रत्येतव्यं तद्रूपेण तथा चेन्न प्रतीयते तदा स प्रत्ययो मिथ्याप्रत्यय इत्युच्यते । प्रलीयमानवस्त्वपि मिथ्या प्रत्ययविषयत्वात् तद्रूपेण मिथ्यैवेति श्रीमच्छङ्कराचार्याणामपि जगतो मिथ्यात्वकथनन्नात्यन्तमसङ्गतं प्रतिभाति । यावद्व्यवहारकालं बाधराहित्यत्तेषामपि सत्यत्वमेव । परमार्थतस्तु सर्वेषामप्यद्वैतसिद्धान्तानुयायिनां वैष्णवाचार्याणां श्रीमद्रामानुजाचार्यं श्रीमद्वल्लभाचार्यादीनामपि 'हरिरेव जगद्' इत्ययं सिद्धान्तोऽभिमत एव । अतो ममाल्पीयस्यां बुद्धौ प्रभयोः सिद्धान्तयोर्न कापि गभीरा परिखा प्रतीयते, केवलं 'नाममात्रे विवाद' इत्यैव प्रतिभाति । घटकलशयोर्नाममात्रमादाय केचन विवदन्ति चेत् विवदन्तु नाम, नैतावता वस्तुति कश्चिद्विकारो भेदो वा समुपजायते । श्रीमद्रामानुजाचार्यैश्चिदचिद्विशिष्टं ब्रह्मेति स्वीक्रियते, स्वीकर्त्तव्यमप्येवम् । न हि कम्बुग्रीवादिविशिष्टो घट इति कथनात् कम्बुग्रीवादीनां घटात् पार्थक्यं प्रतीयते, अपितु घटत्वमेव । कम्बुग्रीवादिकार्यध्वंसे कारणरूपायां मृदि यथानामरूपक्रियादीनां विलयो भवति, यथा वा तत्तन्नाम्ना प्रसिद्धानां नदीनां स्वीयस्वीयनामरूपे विहायान्ततः समुद्ररूपतैव समुत्पद्यते । एवमेव सर्वेऽपि चिदचिद्वाच्या पदार्था ब्रह्मण्यस्तं गच्छन्ति । तथा हि श्रुतिः—

यथा नद्यः स्यन्दमानाः समुद्रे—
ऽस्तं गच्छन्ति नामरूपे विहाय ।

तथा विद्वान् नामरूपाद् विमुक्तः ।
परात् परं पुरुषमुपैति दिव्यम् ॥
(मु० 3.2.8)

अनया श्रुत्या तु स्पष्टमेवैतत्प्रतिभाति यत् प्रलयावस्थायां सृष्टेः प्राक् च परात्परपुरुषोत्तमाद् भिन्नन्न किमपि वस्तु पृथगासीत् । निरवयवस्य ब्रह्मणः क्वचित् कस्मिंश्चित् कोणे चितां जीवानामावासः, क्वचित् कस्मिश्चिच्चकोणेऽचितां जडानां

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वसतिरिति तु न स्वीकरोति कस्यचिदपि विज्ञस्य मानसम्। किन्तु तत्रापि सूक्ष्मातिक्ष्मरूपेण सूक्ष्मातिसूक्ष्मबीजे सशाखपल्लवानन्तबीजकणिको महान् वृक्ष इव समस्तोऽयं प्रपञ्चोऽविभक्त एव वर्तते, शुक्रशोणिते वा यथा त्वङ्मांसरुधिरस्नायुभेदोमज्जानेत्रनासिकादि विभिन्नेन्द्रियाणि। अनेन प्रकारेण ब्रह्मणश्चिदचिद्वैशिष्ट्यमपि कथञ्चित् वक्तुं शक्यते, किन्तु पार्थक्येन तेषां तत्रावस्थानन्त्वस्वीकरणीयमेवेति प्रतिभाति। एषां मते—

ईश्वरश्चिदचिच्चेति पदार्थत्रितयं हरिः।
ईश्वरश्चिदितिप्रोक्तो जीवो दृश्यमचित्पुनः॥

अस्य श्लोकस्यार्थस्तु मयैवमवगम्यते यद्—'ईश्वरः, चिद्, अचिच्च यदेतत् पदार्थत्रयम् प्रतीयते तत्सर्वं' हरिरेव, न तु ततो भिन्नमिति पदार्थत्रितयं हरिः। समायातमेतेन यत् 'सर्वं खल्विदं ब्रह्म' इति सिद्धान्तो नास्ति तत्प्रतिकूल इति।

मुक्तिविषयेऽपि 'भक्तिर्मुक्तिप्रदायिनी' अथवा भक्तिमुक्तेर्गरीयसी' इत्यस्ति तेषां सुनिर्णयः। अन्येषान्तु केषांचित् 'ऋते ज्ञानान्न मुक्तिः' इति सिद्धान्तः। अत्रापि भ्रान्त्याभेदः प्रतीयते। वैष्णवाचार्यैः श्रभद्रामानुजाचार्यश्रीवल्लभाचार्यादिभिः स्वसिद्धान्तपोषकत्वेन 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन' (क० 2.23) 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया' (गी० 8.22) इत्यादिश्रुतिस्मृतिवचनान्युद्रियन्ते। 'ऋते ज्ञानान्न मुक्ति' रिति सिद्धान्तानुसारिभिश्च ज्ञानमेव मुक्तेर्मुख्यंकारणमिति मन्यते। अत्रापि तथ्यातथ्योर्विचारणा कार्यैव, किं तथ्यमतथ्यं वा। मम तु 'मुरारेस्तृतीयः पन्थाः'। आत्मा वा० अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ० 2.4,5, 4.5.6) इत्यस्मिन् मन्त्रे आत्मनो दर्शनं मुख्यं साध्यमस्ति, साधनत्वेन तु श्रवणं मननं निदिध्यासनञ्चोक्तम्। तत्रात्मदर्शनं किं श्रवणं प्रधानं साधमुतानन्तर्यान्निदिध्यासनमिति विचारणायां यः कोऽपि निःशङ्‌कं वक्तुं शक्नोति स्वेच्छया श्रवणं वा निदिध्यासनं वा न तत्र कश्चिद्विरोधः प्रतिभाति। प्रतिभाति चेद, बुद्धेः पराकाष्ठा। श्रवणेन विना निदिध्यासनस्यासम्भवात्। जातेऽपि श्रवणेऽकृतनिदिध्यासनस्यात्मदर्शनासम्भवात्। अतः यथात्रत्यो विवादो विदुषां हास्यजनकस्तथैव ज्ञानभक्त्योरपि मुक्तिकारणत्वविषये विवादो विषाद एवेति मया मन्यते।

ज्ञानस्फूर्तिस्तु निर्मले चेतसि सञ्जायते, निर्मलचेतस्त्वञ्चेत् ज्ञानमाश्रयेत तदाऽपरिहरणीयोऽन्योन्याश्रयत्वमापततीति चेतसो निर्मलत्वं परिपक्वकषायत्वं च

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्पादयितुं किमपि साधनान्तरमवश्यमेवान्वेषणीयम्। तदेव साधनं भक्तिरिति निगपते। भक्तिं विना ज्ञानस्य, तद्विना च मुक्तेराशा निर्मेघवृष्टिरिव केवलं दुराशामात्रमेव। अत: कश्चिदाचार्य: मुक्ते: साधनं ज्ञानं कश्चिच्च ज्ञानजननीं भक्तिं वा कथयति, नास्त्यत्रापि कश्चिद् विरोधाक्सर:। भट्टोजिदीक्षितेन 'क्लृपिसम्पद्यमाने च' एतद्वार्तिकस्योदाहरणं 'भक्तिर्ज्ञानाय कल्पते' इत्युक्तम्। गीतायामपि—

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥
(श्रीमद्भ० गी० 10.10)

तेषामेवानुकम्पार्थमहमज्ञानजं तम:।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥
(श्रीमद्भ० गी० 10.11)

श्रीमद्भागवतेऽपि—

यर्ह्यं जनामचरणैषणयोरुभक्त्य, चेतो
मलानि विधमेद् गुणकर्मजानि।
तस्मिन् विशुद्ध उपलभ्यत आत्मतत्त्वं/साक्षाद्
यथाऽमलदृश: सवितृप्रकाश: ॥ (11.3.40)

यथाग्निनाहैममलं जहाति ध्मातं पुन: स्वं भजते च रूपम्।
आत्मा च कर्मानुशयं विधूय मद्भक्तियोगेन भजत्यथो माम् ॥
यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानै:।
तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जन सम्प्रयुक्तम् ॥
(11.14.25-26)

कथं विना रोमहर्षं द्रवता चेतसा विना।
विनानन्दाश्रुकलया शुद्ध्येद् भक्त्या विनाशय: ॥
(11.14.22)

स वेद धातु: पदवीं परस्य दुरन्तवीर्यस्य रथाङ्गपाणे:।
योऽमायया सन्ततयानुवृत्त्या भजेततत्पादसरोजगन्धम् ॥
(1.3.38)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ।
(1.5.12)

आशयस्त्वयं यज्ज्ञानेन केवलेन, भक्त्या वा केवलया मुक्तिर्भवतीति येषां सिद्धान्तः ते सर्वेऽपि तथ्यवादिन एव । एकस्यैव वस्तुन उपलब्धये साधनबहुत्वस्याप्यदोषावहत्वात् । वस्तुतस्तु जाते सति ज्ञाने भक्तैरनुत्पादोऽसम्भवः, असम्भवश्च जातायां भक्तौ ज्ञानस्याऽनुत्पत्तिरत्यत्रत्योऽपि विवादो निर्मूल ।

निम्बार्काचार्यस्य मतन्तु भेदाभेदपक्षमाश्रयते । एवं माध्वाचार्यस्यापि मतं भेदाभेदप्रतिपादकम् तत्र तेषामयमभिप्रायो यत् वस्तुतस्तु जीवा ब्रह्मणो भिन्ना एव, किन्तु चित्त्वसाधर्म्यादभेदोऽपि भवितुमर्हतीति । एतन्मतमद्वैतिमिनाद्रियते 'एकमेवाद्वितीयम्', 'सर्वं खल्विदं ब्रह्म', 'स आत्मानं स्वयमकुरुत', 'स दता।वानास', 'स वै सर्वमिदं जगत्', 'इदं सर्वं यदयमात्मा', आत्मेदं सर्वं भवति', पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्' इत्यादिभिरनेकामि, श्रुतिभिः सर्वस्य ब्रह्मात्मकत्वप्रतिपादनात् । तैस्तु द्वैतिभिर्द्वैताद्वैतिभिर्वा स्वपक्षसमर्थनार्थं' द्वा सुपर्णा सयुजा सखायः समानं वृक्षं परिसष्वजाते, तमोरेकः पिप्पलं स्वाद्धत्यनश्नन्नन्यो अभिचाकशीति' इति श्रुतिं समुपस्थापयन्ति । तत्रास्त्येतद्विचारणीयं यज्जीवा सर्वेऽपि स्वात्मानं ब्रह्मत्वेन नैव मन्यन्ते प्राग्ज्ञानोत्पतेरित्यत्र तु नास्ति कस्यापि काचिद् विप्रत्तिरिति । परस्परमपि एकोऽपरतो भिन्न इत्येव प्रायो जनसाधारणानां धारणा । सा धारणा तु ज्ञानमन्तरा न केनापि प्रकारेण दूरीकर्तुं शक्या । ज्ञानञ्च निर्मलान्तः—करणे स्फटिकजलादौ सूर्यप्रतिबिम्बवदुदेतुमर्हति । नेर्मल्यञ्चान्तः करणस्योपासनामन्तराऽसम्भवीति चेतः प्रसादानार्थमेव सेब्यसेवकमावादिकल्पनापूर्वकं भेदस्वीकरणं चेत् स्यात्, कात्र हानिः । वस्तुतस्तु भेदवादिभिरपि चित्त्वसाधर्म्यादभेदः स्वीक्रियत एव । प्रासादोपर्यारोहणार्थं सोपानाश्रयणं नाहितकरमिति को नाम नाङ्गीकरोति । स्थालीपुलाकन्यायेना द्वैतद्वैताद्वैतद्वैतादिसिद्धान्ताः प्रायः प्रदर्शितप्राया एव । शुद्धाद्वैतसिद्धान्तस्तु पूर्वं संक्षेपतः प्रदर्शित एव स सिद्धान्तस्तु प्रायः सर्वसिद्धान्तसमन्वयरूप एव । यतस्तस्मिन् सिद्धान्ते ब्रह्मणः सर्वविरुद्धधर्मात्रयित्वमाश्रितम् । अत एकत्वविरोधिद्वैतमपि चेतत्र तिष्ठेत्तदा का क्षतिः । उक्तञ्च—

एकत्वे सति नानात्वं नानात्वे सति चैकता ।
अचिन्त्यं ब्रह्मणो रूपं कस्तद्वेदितुमर्हति ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीशङ्कराचार्येण तु एकत्वमपि ब्रह्मणि नाङ्गीक्रियते । उक्तञ्च तेन 'न चैकं तदन्यद्द्वितीयं कुतः स्याद् कथं सर्ववेदान्तसिद्धं ब्रवीमि' इति ।

वस्तुतस्तु सर्वैरपि श्रुतिप्रामाण्यवादिभि र्ब्रह्मणोऽनिर्वचनीयताऽङ्गीकर्तव्यैव । 'यस्यामतं तस्य मतं मतं यस्य न वेद स', अविज्ञातं विजानतां विज्ञातं त्वविजानताम् इति (के० 2.3) । अतो येन केनापि यत्किञ्चिदप्युक्तं यदनुभूतं च तत्सर्वमपि तत्तद्बुद्ध्या सत्यं सदप्य पूर्णमेवाज्ञेयत्वादनिर्वचनीयत्वाच्च ब्रह्मणः । 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति (तै० 2.9.1)

मन्यतामस्त्येका चित्रा शाटी, यत्र सर्वेऽपि शुक्लपीतादिवर्णाः सन्ति, तथापि तत्र सत्स्वपि सर्वेषु शुक्लपीतादिवर्णेषु तां न कश्चिच्छुकलां पीतां वा वक्तुं शक्नोति, न वा सा शुक्ला नास्ति पीता वा नास्तीत्यैव वक्तुं शक्यते तत्र सर्ववर्णानां सत्त्वात् । अत एव 'चित्रा' विचित्रेत्यर्थः । वैचित्र्यन्त्वेतदेवयत् सत्स्वपि सर्वेषु वर्णेषु विशिष्य सर्ववर्णराहित्यम् उच्यते । एवमेव ब्रह्मणि सर्वेषां समावेशात् तद् ब्रह्म विशिष्ये दन्तया नैव किमपि वक्तुं शक्यते न वा किमपि वस्तु तद्भिन्नं वक्तुं शक्यते । अतोऽपि तस्य निर्वचनीयता समर्थयितुं शक्या तस्य सर्वात्मकत्वात् ।

समायातमेतद् यत् सर्वैरप्याचार्यैः स्वानुभूतितो यत्किञ्चिदुक्तं तत्सर्वमपि 'गजान्धन्यायेन सत्यमेव । हस्तीसूर्पाकारोप्यस्ति तत्कृते येन कर्णः स्पृष्टो, मूसलाकारोप्यस्ति तत्कृते येन शुण्डागृहीता । वस्तुतस्तु हस्ती कश्चिद्भिन्नाकार एव । इयमेव दशा ब्रह्मणोऽप्यस्ति । यथा येनाप्तेनानुभूयते तथा तेन वर्ण्यते । तथात्वेऽपि न तथात्वंतस्यानन्तानिर्वचनीयरूपत्वाद् ब्रह्मणः स्वरूपनिरूपणविषये न कोपि पूर्णतया समर्थ इति । तस्य निरुपत्वात् (रूप्यते इति रूपमिति व्युत्पत्त्या) उक्तञ्च—

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं, निचाय्य तन्मृत्युमुखात् प्रमुच्यते ॥
(क० 1.3.15)

एवञ्च निर्गुणत्वेऽप्य नवधिकानिरतिशयकल्याणगुणगणार्णवत्वपितत्र न विरुध्यते । अत एव श्रीपुष्पदन्ताचार्येण स्वमहिम्नस्तोत्रस्यान्ते परमंसत्यमेवोक्तम्—

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे,
सुरतरुवरशाखालेखनी पत्रमुर्वी ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लिखति यदि गृहीत्वा शारदा सर्वकालं,
तदपि तव गुणानामीश पारन्न याति ॥
(महि० स्तो० 32)

तथा च—

तवैश्वर्यं यत्नाद् यदुपरिविरञ्चिर्हरिरधः,
परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः ।
(महि० स्तो० 10)

यत्र ब्रह्मणि ब्रह्मणो विष्णोश्चेयं दशा । शारदा च स्वयं वाग्देव्यपि सर्वकालं न तु केवलं स्वजीवनावध्येव ब्रह्मगुणानां लेखनेऽसमर्था भवति तत्र—'तदान्येषां केषां कथयकथमस्मिन्वसरः', 'गजा यत्र निमज्जन्ते मशकानान्तु का कथा' इत्यस्माकं चर्चैव कीदृशी, तथापि 'अथावाच्यः सर्वः स्वमतिपरिणामावधिगृणन्', 'नभः पतन्त्यात्मसमं पतत्रिणः' इत्यस्माभिरपि यत्किञ्चिदुक्तं तत्सर्वं क्षम्यमेवेति, चेत् स्वयमवतारभूतेन वादरायणेनापि यथामति निर्गुणसगुणरूपस्य ब्रह्मणः स्वरूपं प्रदर्श्य स्वस्याऽसामर्थ्यमेव स्वीकृतं तद्वर्णने । तथा च क्षमापि प्रार्थिता । अयथावद्वर्णनरूपो दोषोऽप्यङ्गीकृतः स्वकीयः । ब्रह्मणः स्वरूपनिर्धारणविषये मदीयोऽयं दुःसाहसो हास्यास्पद एवेति नास्त्यत्र स्वल्पोऽपि सन्देहः । तेन श्रीमद्वेदव्यासेनोक्तं यद्—

रूपं रूपविवर्जितस्य भवतो ध्यानेन यत् कल्पितं,
स्तुत्याऽनिर्वचनीयताऽखिलगुरोर्दूरीकृता यन्मया ।
व्यापित्वञ्च निराकृतं भगवतो यत्तीर्थयात्रादिना,
क्षन्तव्यं जगदीशतद्धि भवता दोषत्रयं मत्कृतम् ।

अतोऽहमपि स्वकीयमनर्गलं प्रलापं स्थगयितुमिच्छामि । आशासे च नीरक्षीरविवेककुशलाविद्वांसो गुणग्राहिणोऽस्मिन्निबन्धे चेत् क्वचित् कश्चिद् गुणः स्यात्, क्षीरमिवाङ्गीकरिष्यन्ति परित्यज्यनीरमिव दोषबाहुल्यम् । अन्ततो श्रीपुष्पदन्ताचार्यशब्दैर्नमनमेव विधीयते—

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो,
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नमो वर्षिष्ठाय त्रिनयनयविष्ठाय च नमो,
नमः सर्वस्मैते तदिदमिति सर्वाय च नमः ॥

(म० स्तो० 29)

श्लोकेऽस्मिन् महता कौशलेन ब्रह्मणः सर्वविरुद्धधर्माश्रयत्वं सर्वात्मकत्वञ्च श्रुतिप्रामाण्यपुरःसरं प्रतिपादितम् । तथाहि—नेदिष्ठ दविष्ठशब्दाभ्यां विरुद्धार्थं-प्रतिपादकाभ्यां 'दूरात् सुदूरे तदिहान्तके च' इति श्रुत्यर्थः प्रदर्शितः । क्षोदिष्ठमहिष्ठशब्दाभ्याञ्च तथाविधाभ्यां 'अणोरणीयान् महतो महीयान्' इति श्रुत्यर्थः प्रदर्शितः । वर्षिष्ठयविष्ठशब्दाभ्याञ्च 'त्वं जीर्णो दण्डेनाञ्चसि त्वं जातो भवसि विश्वतो मुखः' इतीयं श्रुतिः समुपन्यस्ता । 'नमः सर्वस्मैते तदिदमिति सर्वाय च नमः' अनेन श्लोकस्यान्तिमेन चरणेन 'सर्वं खल्विदं ब्रह्म' 'त्रिपादस्यामृतं दिवि' इति प्रतिपादितम् । इतोऽधिकं ब्रह्मविषये किं वक्तुम-वशिष्यते यदस्माभिः प्रतिपाद्येत ।

यद्यपि यस्य कस्यापि ग्रन्थस्य तात्पर्यनिर्णयार्थमभ्यासस्यातीवावश्यकता भवति, तथापि कश्चिदवधिर्भवति विद्यते । 'च वा तु हि चवातु हि' इति रीत्या पादपूरणं कवित्वपराकाष्ठां प्रकाशयतीति पुनः पुनः चर्वितचर्वणाचरण-मरमणीयतां भजते अतो मयाऽप्यतिपिष्टपेषणाद्विरम्यते ।

प्रयोजनं विना मन्दोऽपि न प्रवर्तत इति ब्रह्मज्ञानस्यापि केनचित् प्रकृष्टेन प्रयोजनेन भाव्यम् अन्यथा प्रयोजनाभावान्न तस्मिन् कस्यापि प्रवृत्तिः स्यात् निबन्धेस्मिन् ब्रह्मज्ञानस्य 'दुःखात्यन्तिकनिवृत्तिपूर्वकाक्षय्यसुखस्यैकान्तिकात्यन्ति-कोपलब्धिरूपं प्रयोजनं पूर्वं संक्षेपेण प्रदर्शितम् । अस्य प्रयोजनस्य प्राणिमात्रस्या-भीष्टस्यावाप्तौ विभिन्नदर्शनानां तत्तदाचार्यप्रतिपादितानां दिग्दर्शनमप्यकारि । वेदान्तदर्शनस्य सर्वदर्शनमूर्धन्यत्वं समर्थितम् । तत्रापि विभिन्नाचार्याणां मतवैभिन्यञ्च स्थाने स्थान उपवर्णितम् । तेषां सिद्धान्तानां तथ्यातथ्यत्वमपि संयुक्तिकं विचारितम् अन्ततो यथाशक्ति तेषां सिद्धान्तानां समन्वयेऽपि प्रयासो विहितः । वेदान्तज्ञानस्यैहिकामुष्मिकानन्दप्रदत्वमपि समर्थितम् । इतीमे विषयाः शिरस्यापतितभारस्यापनयनार्थंनातिदाढ्र्येन विषयस्य दुर्ज्ञेयत्वाद्, यथाकथञ्चित् अस्पष्टभाषया 'विनायकं प्रकुर्वाणो रचयामास वानरमिति', न्यायेनायथावद्रूपेण विदुषां समक्षं समुपस्थापिताः । आशास्यते, पिपीलिकायास्तण्डुलकणभारवहन-वन्ममाप्ययमायासोऽध्येतृवर्गस्य प्रशस्यः सुखावहश्च भविष्यतीति ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्ववेदान्तसिद्धान्तसमन्वयः

तत्र तावत् श्रीमच्छङ्कराचार्याणां मते ब्रह्मजीवजगतां विषयेऽस्त्ययं सर्वथा निर्णीतोऽर्थे यत् केवल ब्रह्मैव सत्यमस्त्यन्यत् सर्वं मिथ्याभूतं मायिकं प्रतीतिमात्रविषयं ब्रह्मणि रज्जौ सर्प इव शुक्तिकायां रजतमिव च भ्रान्त्या प्रतीयते। यथा च रज्जुज्ञानात् सर्वबुद्धिः, शुक्तिकाज्ञानाद्वा रजतबुद्धिः सर्वथा व्यपैति एवमेव जाते सति ब्रह्मज्ञाने जगज्जीवादिसर्वोऽपि प्रपञ्चः प्रविलीयते जाग्रदवस्थायां स्वाप्निकीसृष्टिरिव। सर्वाश्चर्यमयस्य सर्वशक्तिसम्पन्नस्य सर्वभवनसमर्थस्य च कृते नास्त्येतद् घटमिति। तदनुयायिनां तेषाञ्चास्त्ययमुद्घोषो यत्—

श्लोकार्द्धेन प्रवक्ष्यामि, यदुक्तं ग्रन्थकोटिभिः।
ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः॥

तद्विरचितायांदशश्लोक्यां तैः स्पष्टमेवाभिहितं—अस्यायमाशयः—

ब्रह्म पृथिव्यादिभ्यः पञ्चमहाभूतेभ्यो भिन्नमेवास्ति।
पृथिव्यादिः समस्तोऽपि प्रपञ्चो मिथ्यैव भासते॥

सिद्धान्तबिन्दुप्रणेत्रा श्रीमधुसूदनसरस्वतीस्वामिना दशश्लोक्याः प्रथमश्लोकस्यावतरणिकायामनात्मनोऽध्यासाधिष्ठानानुपपत्तौ प्रपञ्चस्य मिथ्यात्वं स्पष्टमेव प्रतिपादितं यद्—"मन्वध्यासोऽपि नोपपद्येत। तथा हि—आत्मनि वाऽनात्माऽध्यस्यतेऽनात्मनि वात्मा। नाद्यः, तस्य निःसामान्यविशेषत्वेन सर्वदाभासमानत्वेन-सादृश्यादिरहितत्वेन चाधिष्ठानासम्भवात्। नापि द्वितीयः, तस्य मिथ्यात्वाभ्युपगमात्। मिथ्यावस्तुनोऽधिष्ठानत्वे शून्यवादप्रसङ्गात्, तस्य च सत्यत्वे तदनिवृत्तेरनिर्मोक्षप्रसङ्गाच्च। नहि सत्यं क्वचिन्निवर्तते। निवर्त्यमानं वा ज्ञानेन ज्ञानात् सर्वसंसारनिवृत्ति दर्शयन्त्यः श्रुतयः प्रपञ्चस्य मिथ्यात्वं सूचयन्ति। तथा हि—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥

(मु० 2.2.8)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ।(श्वे० 3.8)

तरति शोकमात्मवित् (छा० 7.1.3) एवञ्च

एकमेवाऽद्वितीयम् (छा० 6.2.1)

अतोऽन्यदार्तम् (बृ० 3.4.2)

नेह नानास्ति किञ्चन (बृ० 4:4.19)

अथात आदेशो नेति नेति (बृ० 2.3.6)

इत्याद्याः श्रुतयः प्रपञ्चस्यास्य साक्षादेव मिथ्यात्वं प्रतिपादयन्ति । दृश्यत्वेन शुक्तिरजतादिवन्मिथ्यात्वानुपानाच्च ।

एतेनोपर्युक्तप्रकारेण शाङ्करमतानुयायिभिः संसारस्य मिथ्यात्वं प्रतिपाद्यते ।

जगत्तुच्छमेतत्समस्तं तदन्यत् ।
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ (दशश्लोकी 9)

इत्येतच्छ्रीशङ्कराचार्यप्रतिपादितवाक्यमवलम्ब्यापि संसारस्य मिथ्यात्वं प्रतिपादयन्ति । 'द्युतिगमि जुहोतीनां द्वे च' इति वार्तिकान्निष्पन्नो 'जगत्‌छब्दो गच्छतीति जगदिति व्युत्पत्या यस्योत्तरकाले बाधो भवति स सर्वोऽपि जगच्छब्देन व्यपदिश्यते । ब्रह्मातिरिक्तस्य सर्वस्याप्युतरकाले बाधदर्शनाद् ब्रह्मातिरिक्तस्य समस्तस्य जगतस्तुच्छत्वञ्चेच्छ्रीशङ्कराचार्यस्याभिमतं स्यात् तदेतेन जगतस्त्रैकालिकासत्त्वं वक्तुं न शक्यते एवञ्च क्वचित् प्रमितं क्वचिदन्यत्रनिषिध्यते चेत् जगत् क्वचित् प्रमितं न स्यात्, तदा तस्य निषेधो नोपपद्यते अतो जगतः क्वचित् प्रमितत्वमङ्गीकार्यमेवेति सर्वं मनसि निधायैव कदाचित्‌च्छ्रीमच्छङ्कराचार्येणैवमुक्तं यद्—

न चैकं तदन्यद्द्वितीयं कुतः स्यात्,
न वा केवलत्वं न चाकेवलत्वं ।
न शून्यं न चाशून्यमद्वैतकत्वात्,
कथं सर्ववेदान्तसिद्धं ब्रवीमि ॥ (दशश्लोकी 10)

कथं सर्ववेदान्तसिद्धं ब्रवीमि; इति वाक्येन ब्रह्मणोऽनिर्वचनीयता तेनाङ्गीकृता' ।

केनचिदपि विचारपरायणेन शुक्लनीलादिसप्तवर्णा काचित् चित्राशाटी 'इयं शुक्ला' अथवेयं पीते' त्येवं रूपेण किंचिद्वर्णविशेषविशिष्टा नैववक्तुं शक्यते

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्याः सर्ववर्णात्मकत्वात् । न च शुक्लादिवर्णराहित्यं वा तत्र वक्तुं शक्यते, तत्र तेषां सर्वेषां विद्यमानत्वात् । एवमेव समस्तस्य प्रपञ्चस्य ब्रह्मणि स्थितत्वात् विशिष्य नैवं वक्तुं शक्यते यद् ब्रह्मणः स्वरूपमीदृका न वैतदपि वक्तुं शक्यते यद् 'अनीदृगि' ति । अतः प्रतीयते यत् श्रीमच्छङ्कराचार्येणापि विचारकधौरेयेणैवमालोच्यैवोक्तं यद—"न चैकमित्यादि' । अतः प्रतीयते यत् तेषामपि श्रीशङ्कराचार्याणां कदाचिदयमेवाभिप्रायः स्यात् । मिथ्यात्वशब्दस्य तुच्छत्वशब्दस्य वा प्रयोगस्तैः घटशरावादिशब्दानां मृत्तिकाभिन्नत्वेन मिथ्यात्वं, मृत्तिकैव सत्यमिति मृत्तिकात्वेन सत्यत्वम् । एवं ब्रह्मभिन्नत्वेन जगतो मिथ्यात्वं, सत्यत्वञ्च ब्रह्मत्वेनेति जगति मिथ्याशब्दस्य प्रयोगः कृतः स्यात् । सर्वथा जगतो मिथ्यात्वमसत्त्वञ्च कथं केनचिद् वक्तुं शक्यते । 'कथमसतः सज्जायेत' (छा० 6.2.2) इति श्रुत्या जगतः सद्भावस्वीकरणात् ।

सदैव सौम्येदमग्र आसीदेकमेवाद्वितीयम् ।
तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत' (छा० 6.2.1)

इत्यत्रापि जगतः सच्छब्देनाभिधानात् । अतो जगतः सत्ताश्रुतिसम्मतेत्यत्र नास्ति काचिद् विचिकित्सा । श्रीमच्छङ्कराचार्यैरपि स्वकीये 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमित्यस्य भाष्ये लिखितं यत् 'कदा सदेवेदमासीदित्युच्यते 1. अग्रे, जगतः प्रागुत्पत्तेः । किं नैदानीमिदं सद् येनाग्र आसीदिति विशिष्यते 1. न । कथं तर्हि विशेषणम् 1. इदानीमपीदं सदेव, किन्तु नामरूपविशेषणवदिदं शब्दबुद्धिविषयं चेतीदं च भवति । प्रागुत्पत्तेस्तु अग्रे केवलसच्छब्दबुद्धिमात्रगम्यमेवेति सदेवेदमग्र आसीदित्यवधार्यते ।

न हि प्रागुत्पत्तेर्नामवद्रूपवद्वेदमिति ग्रहीतुं शक्यं वस्तु, सुषुप्तकाल इव । यथा सुषुप्तादुत्थितः सत्त्वमात्रमवगच्छति । सुषुप्ते सन्मात्रमेव केवलं वस्त्विति तथा प्रागुत्पत्तेरित्यभिप्रायः । तैरेतदपि स्वभाष्ये लिखितं यद्—यथेदमुच्यते लोके पूर्वाह्णे घटादिसिसृक्षुणा कुलालेन मृत्पिण्डं प्रसारितमुपलभ्य ग्रामान्तरं गत्वा प्रत्यागतोऽपराह्णे तत्रैव घटशरावाद्यनेकभेदभिन्नं कार्यमुपलभ्य मृदेवेदं घटशरावादिकेवलं पूर्वाह्ण आसीदिति तथेहाप्युच्यते सदेवेदमग्र आसीदिति ।' (छा० 6.2.1 शाङ्करभाष्य)

इत्युपर्युक्तभाष्यात् प्रतीयते यद् यथा घटशरावादीनां सर्वथाऽसत्त्व नास्ति, तथापि घदशरावादयो 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सत्यम्'. (छा० 6.1.4) इति मृत्तिकात्वेन सत्यत्वेऽपि तत्तदाकारनामरूपादिना मिथ्या, न तु वस्तुतो मिथ्या। मृद्रूपेण तेषां सत्यत्वात् एवमेवेहापि कार्यवर्गे पतिता अपि आकाशादयः समस्तञ्च जगत् सर्वथा मिथ्या सत्ताशून्या चेति नैव वक्तुं शक्यते। यथा घटशरावादयो नामरूपादिना मिथ्या न तु वस्तुतो मृद्रूपेणापीत्येतच्छ्रीशङ्कराचार्यस्याप्यभिमतमेव।

यदि नैतादृशं मिथ्यात्वं तेषामभिमतं स्यात् तदा कथं स्वकीये भाष्ये मृद्विकारा घटशरावादय उदाहरणत्वेनोदाहृता भवेयु-। अन्यथा शशविषाणवत् सर्वथा शब्दानुपातिज्ञानत्वे समस्तस्य जगतो मिथ्यात्वेऽभिमते तदन्तः पातित्वात् स्वयं श्रीमच्छङ्कराचार्याणामपि मिथ्यात्वं स्यात्। तत्प्रतिपादितसिद्धान्तस्यापि मिथ्यात्वं च प्रसज्जेत। किं बहुना, जगदन्तः पातित्वात् प्रमाणप्रवरत्वेनाभिमता-वेदा अपि मिथ्या, तत्प्रतिपादितं ब्रह्मापि मिथ्या, सम्पूर्णः क्रियाकलापः सन्मार्गोऽपि सर्वो मिथ्यैव स्यात्। अतो मिर्वेयाशब्देन जगतोऽसत्त्वेनग्रहणमस्माकं भ्रान्तिरेव।

अतः प्रतीयते यत् श्रीमच्छङ्कराचार्यस्याभिमतं मिथ्यात्वं किमप्यन्यत्। अस्माभिस्तदनुयायिभिरवगतं मिथ्यात्वं तद्विपरीतं किमप्यन्यदेव अत एव च परस्परं सम्प्रदायेषु विरोधोऽवभासते। ज्ञानोत्तरकाले तु सर्वत्रैव ब्रह्मणो भाने समस्तं जगत्तत्रैव प्रविलीयते। अतो नास्ति किञ्चिदसामञ्जस्यमिति।

यत्र तत्र सर्वत्रैव पुराणादिषु श्रीमन्मर्यादापुरुषोत्तमस्य श्रीरामचन्द्रस्य भगवतो वासुदेवकृष्णस्य चान्येषामपि मत्स्य-वाराह-नृसिंह-वामनादीनां साक्षात् ब्रह्मत्वं सुस्पष्टशब्दैः प्रतिपादितम् यदि तत्सर्वमलीकं स्यात् तर्हि संसारस्य सर्वथाऽभावः स्वीक्रियेत।

यैर्व्यासपादैर्ब्रह्मसूत्राणि विरचितानि, यैरेव मध्ये महाभारतं श्रीमद्भगवद्गीता गुम्फिता, तैरेव विरचितान्यन्यान्यपि पुराणानि कथन्नामाप्रमाणानि भवितुमर्हन्तीति तत्तत्पुराणप्रतिपादितवचनान्यपि प्रमाणत्वेन ग्राह्याण्येव। अन्यथा श्रीकृष्णादीनां ब्रह्मत्वं तत्प्रतिपादितगीतायाश्चाप्रामाण्यं प्रसज्जेतैव।

अतः प्रसङ्गवशात् पुराणोक्तवचनान्यपि कानिचिद् ब्रह्मजीवजगद्विषयाणि विषयविस्पष्टीकरणार्थं समुद्ध्रियन्ते। तथा हि—

भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः।
आक्रान्ता भूरिभारेण ब्रह्माणं शरणं ययौ॥
(श्रीमद्भा० 10.1.17)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मा तदुपधार्याथ सहदेवैस्तया सह।
जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः॥

तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिम्।
पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः॥
(श्रीमद्भा० 10.1.19-20)

समाधौ च ब्रह्मणायापौरुषीगीराकर्णितातां त्रिदशानुवाच आश्वासिताश्च ते सर्वे देवा यद्—

वसुदेवगृहे साक्षाद् भगवान् पुरुषः परः।
जनिष्यते तत्प्रियार्थं सम्भवन्तु सुरस्त्रियः॥
(श्रीमद्भा० 10.1.23)

इति श्रीमद्भागवतपुराणात् सम्यगवगम्यते यद् वसुदेवात्मजत्वेन श्रीकृष्णरूपेण साक्षात् परब्रह्मैव पृथिव्यामवतीर्णं इति। चेज्जगतोऽसत्तास्वीक्रियेत, मायिकी-प्रतीतिरेवाभिमन्येत, तदोपर्युक्तश्रीमद्भागवतवाक्यस्य का गतिः स्यात्। एवञ्चान्येषामपि मत्स्यावतारादीनां विषयेऽपि तत्रैव श्रीमद्भागवतपुराणे स्पष्टमेव प्रतिपादितं यत्—

स एव प्रथमं देवः कौमारं सर्गमास्थितः।
चचारदुश्चरं ब्रह्मा ब्रह्मचर्यमखण्डितम्॥

द्वितीयं तु भवायास्य रसातलगतां महीम्।
उद्धरिष्यन्नुपावत्तयज्ञेशः सौकरं वपुः॥

तृतीयमृषिसर्गञ्च देवर्षित्वमुपेत्यसः।
तन्त्रं शाश्वतमाचष्टनैष्कर्म्यं कर्मणां यतः॥

तुर्ये धर्मकलासर्गे नरनारायणावृषी।
भूत्वात्मशमोपेतमकरोद् दुश्चरं तपः॥

पञ्चमः कपिलोनामसिद्धेशः कालविप्लुतम्।
प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम्॥

षष्ठेऽत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया।
आन्विक्षिकीमलर्काय प्रह्रादादिभ्य ऊचिवान्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत ।
स यामाद्यैः सुरगणैरपात्स्वायंभुवान्तरम् ॥

अष्टमे मेरुदेव्यान्तु नाभेर्जात उरुक्रमः ।
दर्शयन् वर्त्मधीराणां सर्वाश्रमनमस्कृतम् ॥

ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः ।
दुग्धेमामोषधीर्विप्रास्तेनायं स उशत्तमः ॥

रूपं स जगृहे मात्स्यं चाक्षुषोदधिसम्प्लवे ।
नाव्यारोप्यमहीमय्यामपाद् वैवस्वतं मनुम् ॥

सुरासुराणामुदधिं मथ्नतां मन्दराचलम् ।
दध्रे कमठरूपेण पृष्ठ एकादशे विभुः ॥

धान्वन्तरं द्वादशमं त्रयोदशममेव च ।
अपाययत् सुरानन्यान्मोहिन्या मोहयन् स्त्रिया ॥

चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्जितम् ।
ददारकरजैर्वक्षस्येरकां कटकृद्यथा ॥

पञ्चदशं वामनकं कृत्वागादध्वरं बलेः ।
पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपम् ॥

अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान् ।
त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम् ॥

ततः सप्तदशे जातः सत्यवत्यां पराशरात् ।
चक्रे वेदतरोः शाखादृष्ट्वा पुंसोऽल्पमेधसः ॥

नरदेवत्वमापन्नः सुरकार्यचिकीर्षया ।
समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परम् ॥

एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ।
रामकृष्णाविति भुवो भगवानहरद्भरम् ॥

ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम् ।
बुद्धोनाम्ना जनसुतः कीकटेषुभविष्यति ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु ।
जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः ॥

अवताराह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः ।
यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥

ऋषयो मनवो देवामनुपुत्रामहौजसः ।
कलाः सर्वे हरेरेव स प्रजापतयस्तथा ॥

एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥
(श्रीमद्भाग० 1.3.6-28)

भगवतो मर्यादापुरुषोत्तमस्य श्रीमद्रामचन्द्रस्य विषयेऽपि श्रीमदध्यात्म-रामायणे साक्षात् पूर्णब्रह्मत्वं बहुत्र प्रतिपादितम् । तद्यथा—

यः पृथ्वीभरवारणाय दिविजैः संप्रार्थितश्चिन्मयः,
संजातः पृथिवीतले रविकुले मायामनुष्योऽव्ययः ।
निश्चक्रं हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां-
कीर्तिं पापहरां विधाय जगतां तं जानकीशं भजे ॥
(अध्यात्म० बा० 1.11)

विश्वोद्भवस्थितिलयादिषु हेतुमेकं,
मायाश्रयं विगतमायमचिन्त्यमूर्तिम् ।
आनन्दसान्द्रममलं निजबोधरूपम्,
सीतापतिं विदिततत्त्वमहं नमामि ।
(अध्यात्म० बा० 1.1)

अत एभिः प्रमाणैः सिद्धमेतद्यज्जगतो मिथ्यात्वप्रतिपादनं सर्वथा निर्मूल-मेव । शंकराचार्यप्रयुक्त मिथ्या शब्दो नासत्त्ववाचीति ।

रामः परात्मा प्रकृतेरनादिरानन्द एकः पुरुषोत्तमो हि ।
स्वमाययाकृत्स्नमिदञ्च सृष्ट्वा नभोवदन्तर्बहिरास्थितो यः ॥
(अध्यात्म० 1.1.17)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वान्तरस्थोऽपि निगूढ आत्मा स्वमायया सृष्टमिदं विचष्टे।
जगन्ति नित्यं परितो भ्रमन्ति यत्सन्निधौ चुम्बकलोहवद्धि।
एतन्न जानन्ति विमूढचित्ताः स्वाविद्यया संवृतमानसा ये ॥
(अ० 1.1.19)

एभिर्वाक्यैः स्पष्टमेव विज्ञायते यद् भगवान् परब्रह्मपरमात्मा स्वकीयया मायाख्यया शक्त्येदं कृत्स्नं दृश्यमानं जगत् सृजति, सृष्ट्वा च नभोवद् अन्तर्बहिश्च सर्वत्रैव स्वयं तिष्ठति। किन्तु मायासंवृतचित्तानां न तथा प्रतीयते। अत एव 'सर्वं खल्विदं ब्रह्म' इत्यादिश्रुतिसहस्रैरुच्चस्वरेण सम्पूर्णस्य जगतो ब्रह्माभिन्नत्वं ब्रह्मरूपता च प्रतिपाद्यते।

स आत्मानं स्वयमकुरुत (तै० 2.7.1)
स हैतावानास (बृ० 1.4.3)
स वै सर्वमिदं जगत् (ना० 23.1)
पुरुष एवेदं सर्वं (ऋ० 10.90.2)
नेह नानास्ति किंचन (बृ० 4.4.19)
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति (क० 2.1.10)

इत्यादिश्रुतिवचनानामवहेलनां कृत्वा स्वेच्छया 'शब्दाः कामधेनवः', 'सर्वे सर्वार्थवाचकाः' इत्यादिन्यायमनुसृत्य यथेच्छं निष्प्रमाणञ्च यत्किमपि ये प्रतिपादयन्ति; प्रतिपादयन्तु।' जनानने कः करमर्पयिष्यति'। किन्तु श्रुतिवाक्येभ्यो झटिति सुबोधश्च योऽर्थः प्रतीयते स एव ग्राह्यो विद्वद्भिः। सारांशस्त्वयं यत् प्रतीयमानं जगदेतत् साक्षात् ब्रह्मैव। 'एकमेवाद्वितीयं ब्रह्म' (छा० 6.2.1), 'यत् साक्षाद् अपरोक्षाद् ब्रह्म' (बृ 3.4.1) इत्यादि श्रुतयोऽत्र प्रमाणम्।

अन्यान्यपि पुराणवाक्यानि जगतो ब्रह्मरूपतां स्फुटमभिदधते। तद्यथा—

खं वायुमग्निं सलिलं महीञ्च ज्योतींषि सत्त्वानि दिशो द्रुमादीन्।
सरित् समुद्रांश्च हरेः शरीरं यत्किञ्चभूतं प्रणमेदनन्यः ॥
(भाग० 11.2.41)

मामेव सर्वभूतेषु बहिरन्तरपावृतम्।
ईक्षेतात्मनिचात्मानं यथा खममलाशयः ॥

इति सर्वाणिभूतानि मद्भावेन महाद्युते।
सभाजयन् मन्यमानो ज्ञानं केवलमाश्रितः ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्राह्मणे पुल्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिङ्गके ।
अक्रूरे क्रूरके चैव समदृक्पण्डितो मतः ॥

नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात् ।
स्पर्धाऽसूयातिरस्काराः साहंकारा वियन्ति हि ॥
विसृज्य स्मयमानान् स्वान् दृशं व्रीडांच दैहिकीम् ।
प्रणमेद्दण्डवद्भूमावाश्वचाण्डालगोखरम् ॥
यावत् सर्वेषु भूतेषु मद्भावो नोपजायते ।
तावदेवमुपासीत वाङ्मनः कायवृत्तिभिः ॥
सर्वं ब्रह्मात्मकं तस्य विद्ययात्ममनीषया ।
परिपश्यन्नुपरमेत् सर्वतो मुक्तसंशयः ॥

अयं हि सर्वकल्पानां सध्रीचीनो मतो मम ।
मद्भावः सर्वभूतेषु मनोवाक्कायवृत्तिभिः ॥

(श्रीमद्भा० 11.29.12-19)

एषतेऽभिहितः कृत्स्नो ब्रह्मवादस्य संग्रहः । समासव्यासविधिना देवानामपि दुर्गमः । (श्रीमद्भा० 11।29।23)

इमानि श्रीमद्व्यासचरणैर्विरचितानि भागवतीयानि पद्यानि किं जगतो मिथ्यात्वं वर्णयन्ति, ब्रह्मात्मकत्वं वेति सुधीभिः स्वयं विभावनीयम् ।

स्वनिष्ठापकृष्टत्वप्रकारकबोधजनकानुकूलव्यापारस्य नमः पदार्थत्वात् 'प्रणमेद्दण्डवद् भूमावाश्वचाण्डालगोखरम्' इति वाक्यं किं श्वचण्डालगोखरबुद्ध्या घटते; उत तेषां ब्रह्मत्वबुद्ध्या वा । 'सरित् समुद्रांश्च हरेः शरीर'मिति वचनान्न केवलं जीवानामपि तु जडानामपि ब्रह्मत्वं सम्यक् प्रतिपादितं भवति । सत्स्वेतादृशेषु प्रमाणभूतेषु वाक्यकदम्बेषु को नाम विद्वान् जगतो मिथ्यात्वं समर्थयितुं शक्नोति । अतः प्रतीयते यच्छ्रीमच्छङ्कराचार्याभिमतमपि मिथ्यात्वं मृदतिरिक्तघटशरावादीनामिव सुवर्णातिरिक्तकटककुण्डलादीनामिवैव । न तु सर्वथा वस्तुतोऽपि मिथ्यात्वम् । अत एव तैरपि 'न वा केवलत्वं न चाकेवलत्वं, न शून्यं न चाशून्यमवद्वैतकत्वात्' इत्युक्त्वा 'कथं सर्ववेदान्तसिद्धं ब्रवीमीत्युक्तम् । अत्र द्वैतकत्वादिति हेतुप्रदर्शनेन, अपि व्यापकत्वादिति हेतुप्रदर्शनेन च ज्ञायते यत् 'सर्वं खल्विदं ब्रह्म' (छा० 3।14।1) इति श्रुतिप्रतिपादितसर्वस्य जीवजडात्मस्य प्रपञ्चस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मत्वं तेषामपीष्टमेव। किन्तु परिच्छिन्नभाषया विशिष्य विषाणे धृत्वा अयं गौरितिवन्नैव वक्तुं शक्यते। विशिष्य कथनेन यद्भिन्नस्याब्रह्मत्वापत्तेः। अत एव किं वक्तव्यविमूढ इव स कथयति यत् कथं सर्ववेदान्तसिद्धं ब्रवीमीति।

मातृत्वपितृत्वादीनां कल्पितत्वेन 'न माता पिता वा न देवा न लोकाः' तथा 'न वर्णा न वर्णाश्रमाचारधर्मा' इत्यादि 'अनात्माश्रययाहंममाययासहाना' दिति हेतुमुपन्यस्य तैरभ्यधायि। वस्तुतो 'यदल्पं तन्मर्त्यम्' (छा० 7।24।1) इतिश्रुतेः परिच्छिन्नत्वतुच्छत्वयोः समव्याप्तत्वाद् वर्णादीनां वर्णाश्रमाचारधर्माणाञ्च परिच्छिन्नत्वात् तुच्छत्वं नैवविरुद्धम्। किन्तु व्यावहारिकसत्तायान्तु सर्वेऽपि व्यवहारा यथाशास्त्रं व्यवहार्या एव अन्यथा शिरसि पातित्यमापतेत्।

तस्माच्छास्त्रं प्रमाणन्ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्र विधानोक्तं कर्म कर्तुमिहार्हसि॥

(श्रीमद्भगवद्गीता 16.24)

यद्यपि— यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते॥

(गीता० 3.17)

इत्यात्मारामाणां कृते पुण्यपापजनकतया कार्यं न विद्यते। तथापि लोकसंग्रहार्थं तैरपि शास्त्रविहितं कर्माचरणीयमेव। भगवता श्रीवासुदेवेन स्वयमेवोक्तं—

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि॥

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥

(गीता 3.22-23)

'न वर्णा न वर्णाश्रमाचारधर्मा' इत्यादीनि श्रीशङ्कराचार्यवचनानि कृतब्रह्मसाक्षात्काराणां ब्रह्मभूतानां महात्मनां स्थितिं प्रदर्शयन्ति न तु सर्वथा तेषां वर्णाश्रमादीनामभावं प्रतिपादयन्ति। तथा च सुषुप्तिमाश्रित्य श्रुतिः 'अत्र पिता अपिता भवति माता अमाता लोका अलोका देवा अदेवा वेदा अवेदा अत्र स्तेनोऽस्तेनो भवति भ्रूणहा अभ्रूणहा चाण्डालोऽचाण्डालः पौल्कसोऽपौल्कसः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य भवति (बृ० 4.3.22) अस्यां श्रुतावत्रेतिपदेन सुषुप्तेरेवैतादृशी स्थितिर्भवतीति निश्चीयते न तुजाग्रदवस्थायामपि। ब्रह्मविदामपि तुर्यावस्थायामीदृशी स्थितिर्भवति। अत एव तद्विषयकत्वनैव 'निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेध' इत्यादिवाक्यानि सावकाशनि भवन्ति। अस्तु! श्रीमद्भागवते ब्रह्मणः स्वरूपं पदे पदे ब्रह्मादिकर्तृकस्तुत्यादौ सर्वत्रैव श्रीव्यासपादैर्बहुभिः प्रकारैः प्रतिपादितमेव। अन्यत्रापि श्रीमदध्यात्मरामायणादौ कीदृशं ब्रह्मणः स्वरूपं स्वीकृतं कीदृशञ्च जगत इत्यपि नोपेक्षणीयमिति तदपि किञ्चित् प्रदर्श्यते।

भगवान् मर्यादापुरुषोत्तमः श्रीरामचन्द्रः साक्षात् परब्रह्मपरमात्मत्वेन श्रीमदध्यात्मरामायणे निगद्यते। यथाह भगवान् महादेवः पार्वतीं प्रति—

रामः परात्मा प्रकृतेरनादिरानन्द एकः पुरुषोत्तमोहि।
स्वमाययाकृत्स्नमिदं हि सृष्ट्वा नभोवदन्तर्बहिरास्थितो यः॥
सर्वान्तरस्थोऽपि निगूढ आत्मा स्वमायया सृष्टमिदं विचष्टे॥
जगन्ति नित्यं परितो भ्रमन्ति यत् सन्निधौ चुम्बकलोहवद्धि।
एतन्न जानन्ति विमूढचित्ताः स्वाविद्ययमासंवृतमानसा ये॥
(अध्या० 1.17.19)

अतः श्रीमदध्यात्मरामायणे यत्र कुत्रापि ब्रह्मणो धर्माः प्रतिपाद्यन्ते, तत्र रामशब्देन परब्रह्मणार्थो ज्ञेय इति।

नाहो न रात्रिः सवितुर्यथा भवेत् प्रकाशरूपाव्यभिचारतः क्वचित्।
ज्ञानं तथाऽज्ञानमिदं द्वयं हरौ रामे कथं स्थास्यति शुद्धचिद्घने॥
(अध्या 1.1.23)

रामं विद्धि परं ब्रह्म सच्चिदानन्दमद्वयम्।
सर्वोपाधिविनिर्मुक्तं सत्तामात्रमगोचरम्॥
(अध्या० 1.1.23)

आनन्दं निर्मलं शान्तं निर्विकारं निरञ्जनम्।
सर्वव्यापिनमात्मानं स्वप्रकाशमकल्मषम्॥
(अध्या० 1.1.33)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततो रामः स्वयं प्राह हनूमन्तमुपस्थितम् ।
शृणु तत्त्वं प्रवक्ष्यामि ह्यात्मानात्मपरात्मनाम् ।।

आकाशस्य यथाभेदस्त्रिविधो दृश्यते महान् ।
जलाशये महाकाशस्तदवच्छिन्न एव हि ।।

प्रतिबिम्बाख्यमपरं दृश्यते त्रिविधं नभः ।
बुद्ध्यवच्छिन्नचैतन्यमेकं पूर्णमथापरम् ।।

आभासस्त्वपरं बिम्बभूतमेवं त्रिधाचितिः ।
साभसबुद्धेः कर्तृत्वमविच्छिन्नेऽविकारिणि ।।

साक्षिण्यारोप्यते भ्रान्त्या जीवत्वञ्च तथाऽबुधैः ।
आभासस्तु मृषाबुद्धिरविद्याकार्यमुच्यते ।।

अविच्छिन्नं तु तद्ब्रह्म विच्छेदस्तु विकल्पतः ।
अविच्छिन्नस्य पूर्णेन एकत्वं प्रतिपाद्यते ।।

तत्त्वमस्यादिवाक्यैश्च साभासस्याहमस्तथा ।
ऐक्यज्ञानं यदोत्पन्नं महावाक्येन चात्मनोः ।।

तदाऽविद्या स्वकार्यैश्च नश्यत्येव न संशयः ।
एतद्विज्ञाय मद्भक्तो मद्भावायोपपद्यते ।।

(अध्या० 1.1.44-50)

शुद्धाद्वैतवेदान्तसम्मतब्रह्मस्वरूपप्रतिपादनपरेऽस्मिन्निबन्धे यत्र क्वचिदुपलब्धे ब्रह्मस्वरूपं निःसंकोचमुल्लेखनीयमेव । नैवं कदापि भेतव्यं यदेकस्यैव विषयस्य मुहुर्मुहुः प्रतिपादनं कदाचित् पिष्टपेषणं पुनरुक्तिदोषश्च न ज्ञायेत । प्रत्युत बहूनामाप्तवचनानमेकत्रसंग्रहो ब्रह्मस्वरूपोद्बोधको गुण एव निबन्धस्य मन्तव्यः अन्यथैकेनैव 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० 2.1.1) अनेन श्रुतिवाक्येन ब्रह्मस्वरूपप्रतिपादकेन जातायां ब्रह्मावगतौ विस्तृतकलेवरेण निबन्धेनालम् ।

यथानेकेषां पुष्पाणां रसानाहृत्य मधुमक्षिकाभिः परमसुस्वादुमधु सम्पाद्यते, तथैवानेकैः प्रमाणभूतैर्वाक्यैर्ब्रह्मणः स्वरूपमपि यावच्छक्यं निर्धार्यते । वस्तुतस्तु ब्रह्मणो विषये मनोवाचामगोचरे यत्किमपि प्रतिपादनमपूर्णमेव भविष्यति । उक्तञ्च—

नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा (क० 2.3.12)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यद्वाचानभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते ।। (के० 1.1.4)

यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते ।। (के० 1.1.5)

यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति ।
तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते ।। (के० 1.1.6)

यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् ।
तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते ।। (के० 1.1.7)

यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ।। (के० 1.1.7-8)

अन्ततः श्रुतिर्ब्रह्मणोऽज्ञेयाऽनिर्वचनीयता च स्फुटमभिधत्ते—

यस्यामतं तस्य मतं मतं यस्य न वेदसः ।
अविज्ञातं विजानतां विज्ञातमविजानताम् ।। (क० 2.2.3)

भावार्थस्त्वयं यद् ब्रह्म वस्तुतस्तु देवानां शुकसनकादिमहर्षीणामप्यज्ञेयं दुर्ज्ञेयं वास्ति, तद्विषये यत्किमपि केनापि प्रतिपाद्यते तत्सर्वमपि न्यूनातिन्यूनमपूर्णञ्च भवति । ब्रह्मादीनामपि स्तुतिरसदृश्यैव भवति ।

महिम्नः पारन्ते परमविदुषो यद्यसदृशी ।
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्वः स्वमतिपरिणामावधि गुणन्,
ममाप्येषस्तोत्रे हर निरपवादः परिकरः ।। (महिम्न० 1)

अतो 'नमः पतन्त्यात्मसमं पतत्रिणः' इति न्यायमनुसृत्य येन यथा यावद्वाविज्ञायते तथा तावच्च वदन् सोऽप्यवाच्य एव । अत एव ब्रह्मणो दुर्ज्ञेयत्वाद् आचार्याणां सिद्धान्तेषु मिथो विरोधः प्रतीयते । वस्तुतस्तु येन स्वमतिपरिणामावधि यथावगतं तथा ब्रह्मणो निरूपणं कृतम् । सर्वस्वरूपिणः सर्वभवनसमर्थस्य सर्वविरुद्धधर्माश्रयस्य ब्रह्मणो विषये सर्वमपि भवितुमर्हति । श्रीमद्भागवते गजेन्द्रमोक्षप्रकरणे श्रीव्यासपादैरुक्तं गजेन्द्रस्तुतौ—

न यस्य देवा ऋषयः पदं विदुर्जन्तुः पुनः कोऽर्हति गन्तुमीरितुम् ।
यथा नटस्याकृतिभिर्विचेष्टतो दुरत्ययानुक्रमणः समावतु ।।
(श्रीमद्भा० 8.3.6)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्रैव स्तुतौ ब्रह्मस्वरूपविषयेऽपि यत्किञ्चिदभिहितम् । तथा हि—

ॐ नमो भगवते तस्मै यत एतच्चिदात्मकम् ।
पुरुषायादिबीजाय परेशायाभिधीमहि ,।

यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम् ।
योऽस्मात् परस्माच्च परस्तं प्रपद्ये स्वयंभुवम् ॥

(श्रीमद्भाग० 8.3.2-3)

न विद्यते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा ।
तथापि लोकाप्ययसम्भवाय यः स्वमायया तान्यनुकालमृच्छति ॥

तस्मै नमः परेशाय ब्रह्मणेऽनन्तशक्तये ।
अरूपायोरूपाय नम आश्चर्यकर्मणे ॥

(श्रीमद्भाग० 8.3.8-9)

यत्स्वरूपावगतौ ब्रह्मादिदेवानामपि गतिर्नास्ति, तत्स्वरूपनिरूपणमन्येषां कृते त्वत्यन्तं दुष्करमेव । यस्मिन्निदं यतश्चेदमित्युपर्युक्तश्लोके 'य इदं स्वयम्' अयं श्लोकांशो जगतो ब्रह्मत्वं स्फुटमभिधत्ते, तथापि चित्रमेतद् यद् बहुभिर्न जाने कथं जगत स्तुच्छत्वं मिथ्यात्वं चोच्यते । 'अरूपायोरुरूपाय' अयमपि 'तस्मै नमः परेशाय ब्रह्मणेऽनन्तशक्तये' (भाग० 8.3.9) अस्य श्लोकस्यांशभूतो-ध्यानपूर्वकं भवलोकनीयः अरूपस्योरूपता तस्य जगद्रूपत्व एव सम्भवति नान्यथेति स्फुटमेव जगतो ब्रह्मत्व अतः शुद्धाद्वैतवेदान्त सम्मतं 'सर्वं खल्विदं ब्रह्म' (छा० 3.14.1) 'नेह नानास्ति किञ्चन' (वृ० 4.4.19) इत्यादिश्रुतिमृत्यादि-प्रतिपादितं समीचीनं प्रतिभाति । प्रतिभाति च यत्तत्रैव प्रधानतयाऽन्येषामपि मिथ्यावादिनामपि तात्पर्यमस्ति । मिथ्यात्वप्रतिपादनन्तु तेषामपि 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति' (छा० 6.1.4) श्रुत्या विकाराणां स्वदोषेण प्रतीतानां मिथ्यात्वमत्रैव तात्पर्यं, न तु वस्तुत्वेन मिथ्यात्वमिति । को नाम विकाराणां घटशरावादीनां स्वदोषेण प्रतीतानां मिथ्यात्वेऽपि मृत्तिकाया अपि मिथ्यात्वं वक्तुं शक्नोति ।

एवञ्चोपाधिकृतं भेदमश्रित्य नानात्वप्रतीतावपि न वस्तुतो नानात्वम् ।

यदेवेह तदमुत्र यदमुत्र तदन्विह ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥

(क० 2.1.10)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यदिहशरीरेऽविवेकिनां संसारधर्मवदवभासते, तदेवात्मस्थं चेतनं जीवशब्द-वाच्यं वस्तु नित्यविज्ञानघनस्वभावं सच्चिदानन्दवाच्यं ब्रह्मैव, न तु तद्भिन्नम्। अत एव श्रुतिर्भेददर्शिनां निन्दां वदति 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इह ब्रह्माख्यवस्तुनि यो नानेव पश्यति स नानात्वदर्शी मृत्योर्मृत्युं प्राप्नोति पुनः पुनः जन्ममरणादीननुभवतीत्यर्थः। फलितार्थस्त्वयं यन्नानात्वप्रतीतिर्ब्रह्मभिन्नत्वेन वा प्रतीतिर्मिथ्या, न तु वस्तुनि ब्रह्मभूते तत्तदाकारेण परिणतेऽप्यविकृते मिथ्यात्वम्। अतः सुसिद्धमेवैतद् यत् प्रतीयमानमेतत्सर्वमपि जड-जीवात्मकं जगत् साक्षाद् 'एकमेवाऽद्वितीयं ब्रह्मैव' (छा० 6.2.1) न ततो भिन्नमन्यद्।

यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः।
नामरूपविभेदेन फल्ग्व्या च कलया कृताः॥

यथार्चिषोऽग्नेः सवितुर्गभस्तयो,
निर्यान्ति संयान्त्यसकृत् स्वरोचिषः।
तथा यतोऽयं गुणसम्प्रवाहो,
बुद्धिर्मनः खानि शरीरसर्गाः॥

स वै न देवाऽसुरमर्त्यतिर्यङ्,
न स्त्री न षण्ढो न पुमान् न जन्तुः।
नायं गुणः कर्म न सन्न चासन्,
निषेधशेषोजयतादशेषः॥
(श्रीमद्भाग० 8।3।22-24)

सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदसम्।
विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम्॥
(श्रीमद्भाग० 8.3.26)

इयमपि श्लोकचतुष्टयी दत्तावधानमवलोकनीया। प्रथमश्लोके ब्रह्मादिसर्व-देवानां तथा ऋग्वेदादीनां सर्वेषां वेदानाम् एवञ्च सचराचराणामनन्तलोकानां रचना यस्य भगवतः परब्रह्मणः क्षुद्रातिक्षुद्रकलयांशेनानायासेन क्षणेनेच्छामात्रेणैव निष्पाद्यते, स एव भगवान् तदेव परब्रह्म, नारायणादिपदवाच्यः सर्वाराध्यः शिवः। तस्मादेवानन्तशक्तिसम्पन्नात् सर्वभवनसमर्थाद् 'अग्नेरर्चिष इव सवितुः गभस्तय

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इव गुणसम्प्रवाहः प्रपञ्चो बुद्धिमनइन्द्रियादिविशिष्टान्यनेकविधानि शरीराणि प्रादुर्भवन्ति, तिरोदधते च तत्रैव। स देवा देवासुरादिशब्दैः स्त्रीपुंसादिशब्दैः सदसदादि शब्दैश्च विशिष्य निर्देष्टुं नैव शक्यते, सर्वस्यापि तन्मयत्वात् 'पादोऽस्य विश्वाभूतानि' (ऋ० 10.90.3)। अतो निषेधशेषोऽशेषश्च ब्रह्मपदवाच्यो भगवान् इत्यवगन्तव्यम्। चतुर्थश्लोकेऽपि 'सोहं विश्वसृजं विश्वमविश्वमित्यत्रापि' ब्रह्मणि विश्वस्रष्टृत्व, विश्वरूपत्वा विश्वत्वशब्दैः 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीति श्रुत्यर्थः (तै० 3.1) प्रदर्शितः।

देवर्षिनारदेन

देवदेव नमस्तेऽस्तु, भूतभावनपूर्वज,
तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनम्॥
यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो।
यत्संस्थं यत्परं यच्च तत्तत्वं वद तत्त्वतः॥

(श्रीमद्भाग० 2.5.1-2)

इत्येवं पृष्ठः सन् ब्रह्मा तं प्रति—

सम्यगात्मतत्त्वं ब्रह्मणः स्वरूपञ्च प्रोक्तवान्। विस्तरभियात्सर्वं नात्र लिख्यते। किन्तु अपेक्षिताः प्रसङ्गानुकूलाः केचिच्छ्लोका अनुपेक्षणीया इति तेषां परित्यागोऽपि नोचित इति कृत्वा समुपन्यस्यन्त एव। तथा हि—

यस्यैहावयवैर्लोकान् कल्पयन्ति मनीषिणः।
कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः॥

(श्रीमद्भाग० 2.5.36)

नारायणे भगवति तदिदं विश्वमाहितम्।
गृहीतमायोरुगुणः सर्गादावगुणः स्वतः॥
सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः।
विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्॥

(श्रीमद्भाग० 2.6.30-31)

इति तेऽभिहितं तात यथेदमनुपृच्छसि।
नान्यद्भगवतः किञ्चिद्भाव्यं सदसदात्मकम्॥

(श्रीमद्भाग० 2.6.32)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्रापि 'भगवतोऽवयवेष्वेव लोकानां कल्पना' इत्युच्यते तथा नारायणे भगवति वासुदेवे परब्रह्मस्वरूपिणि विश्वमाहितम् इत्यपि प्रतिपादितम् । निष्कर्ष-रूपेण स्पष्टमभिहितम् यद्—'नान्यद् भगवतः किञ्चिद्भाव्यं सदसदात्मकम्' । अतोऽपि सिद्धमेतद्यत् 'सर्वं खल्विदं ब्रह्म' इति ।

साक्षाद् भगवता परब्रह्मणा ब्रह्मणे चतुर्मुखाय श्रीमद्भागवतस्य बीजभूताया चतुःश्लोकी समुपदिष्टा तत्रापि विस्पष्टमुक्तम्—

अहमेवासमेवाग्रे, नान्यद् यत् सदसत्परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥
(श्रीमद्भाग० 2.9.32)

भावार्थस्तु स्पष्ट एवास्ति यद् भगवानेवाग्रेऽर्थात् सृष्टेः प्रागासीदन्यत् स्थूल-सूक्ष्मप्रधानादिकं किमपि नासीत् । पश्चादहं यदेतद्विश्वं चाहमेवास्मि । प्रलया-वस्थायां योऽवशिष्येत सोऽप्यहमेव अर्थात् कालत्रयेऽपि सृष्टेः प्राग्मध्येऽन्ते चान्वयव्यतिरेकाभ्यां यद्वस्तु सर्वत्र सर्वदा स्यात् । तदेवाहं प्रत्यगभिन्नाद्वितीयं ब्रह्मेति भावः । उक्तञ्च—

एतावदेव जिज्ञास्यं, तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां, यत् स्यात् सर्वत्र सर्वदा ॥
(श्रीमद्भाग० 2.9.35)

यथा महान्ति भूतानि, भूतेषूच्चावचेष्वनु ।
प्रविष्टान्यप्रविष्टानि, तथा तेषु न तेष्वहम् ॥
(श्रीमद्भाग० 2.9.34)

ब्रह्मस्वरूपविषय इतोऽधिकं विस्पष्टं को वक्तुं शक्नोति । अतो निर्विवाद-मेतद् यद् विश्वरूपेण विश्वात्मा भगवान् परब्रह्म वासुदेव एवावभासत इति । वासुदेवशब्दस्य निर्वचनमप्येतदेव—

सर्वत्रासौ समस्तं च वसत्यत्रैव वै यतः ।
तस्मात् स वासुदेवेति विद्वद्भिः परिभण्यते ॥
(विष्णुपुराण 1 अंशे 2 अध्यायः)

वासुदेवः सर्वमिति (गी० 7.19)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वय्यग्र आसीत्त्वयिमध्य आसीत्त्वय्यन्त आसीदिदमात्मतन्त्रे ।
त्वमादिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्मात् ॥
(श्रीमद्भाग० 8.6.10)

जगतामादिभूतस्त्वं, जगत्त्वं जगदाश्रयः ।
सर्वभूतेष्वसंयुक्त एको भाति भवान् परः ॥
(ब्र० 1.5.52)

न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम् ॥
पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च यः ॥
(श्रीमद्भाग० 10.9.13)

एभिः पुराणोक्तवचनैर्जगतः सत्यत्वं ब्रह्मरूपत्वञ्च विस्पष्टं विज्ञायते । तथापि श्रीमच्छङ्कराचार्यैस्तदनुयायिभिश्च बहुभिर्जगतो मिथ्यात्वमसत्यत्वञ्च प्रतिपाद्यते । किन्तु तेषामभिप्रायमज्ञात्वैव प्रायः साम्प्रदायिका मिथो विवदन्ति । यदि तेषां श्रीमच्छङ्कराचार्यादीनामभिप्रायः सम्यगवगतः स्यात् तदा नाममात्र एव विवादः स्यात् । विरोधाभासः किमप्यन्यद्वस्तु भवति, विरोधश्च किमप्यन्यदिति तु सर्वैरपि स्वीक्रियत एव । वस्तुतस्तु सम्प्रदायेषु यो विरोधः प्रतीयते स केवलं विरोधाभास एव न तु वास्तविको विरोध इति सप्रमाणं सयुक्तिकञ्च समर्थितम् । एतस्मिन्विषये निबन्धेऽस्मिनग्रे यथास्थानं किमपि समीक्षणं समन्वयप्रयासश्च विधास्यते । साम्प्रतन्तु शुद्धाद्वैतवेदान्तसम्मतं ब्रह्मस्वरूपविषय एवास्ति विचारणा कार्या । तत्रतावत् 'सर्वं खल्विदं ब्रह्म' (छा० 3.14.1)

स हैतावानास (वृ० 1.4.3)
स वै सर्वमिदं जगत् (ना० 23.1)
स आत्मानं स्वयमकुरुत (तै० 2।7।1) इत्यादि

बहुभिः श्रुतिवाक्यैर्जगतो ब्रह्मत्वं प्रतिपादितम् । तत्र जायते यद्यपीयं शङ्का यच्चेज्जगत्साक्षाद् ब्रह्मैवास्ति, तदा ब्रह्मत्वेन प्रतीतिः कथन्न जायते । एतस्मिन् विषये 'प्रमेयरत्नार्णव' नामकग्रन्थे सुचारुरूपेण विविच्य प्रतिपादितं यद् 'आविर्भावतिरोभावाभ्यां भगवतः शक्तिभ्यां क्रीडार्थं तदिच्छयैव चिदानन्दांशद्वयं तिरोभाव्य भगवान् स्वयं जडरूपेणाविर्भवति, तथा चानन्दांशमात्रं तिरोभाव्य जीवात्मना चाविर्भवति । एवञ्च यद्यपि जडजीवान्तर्यामिरूपेण स्वयं साक्षाद् भगवान् परब्रह्मैव प्रपञ्चरूपेण विद्योतते, तथापि ब्रह्मत्वेनाप्रतीतौ

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यामोहिका तन्मायैव कारणं भवति यया व्यामोहिता जीवा पदार्थानन्यथा मन्यन्ते, न तु पदार्था अन्यथा भवन्ति ।

प्रमेयरत्नार्णवकारेण श्रीमद्बालकृष्णभट्टेन स्वयं ग्रन्थादौ लिख्यते यत् 'सुबोधिनीनिबन्धभाष्यविद्वन्मण्डनादिषु स्थितानि प्रमेयानि रत्नानीवसञ्चिनोमि'। अतः स्फुटमेतद् यत् तत्र प्रतिपादिताः सिद्धान्ता आकरग्रन्थप्रतिपादितसिद्धान्तसारभूता इति । शुद्धाद्वैतवेदान्तसिद्धान्तानां संग्रहः प्रकाशश्च परममनोरमसरण्या तत्र कृतोऽस्ति । अतस्तत्रत्यानि कानिचित्स्थलानि निबन्धोपयोगीन्यावश्यकानीति मत्वा निबन्धेऽस्मिन्निवेश्यन्ते । तत्र तेन प्रपञ्चविषयोलिखितम्—

'ब्रह्मात्मकः प्रपञ्चो ब्रह्मकार्यं इति सिद्धान्तः । अविकृतपरिणामवादस्वीकारात्' । प्रमाणत्वेन चोद्धृताः—

स आत्मानं स्वयमकुरुत' (तै० 2.7.1)
स हैतावानास (बृ० 1.4.3)
स वै सर्वमिद जगत् (ना 23-1)
इदं सर्वं यदयमात्मा
आत्मैवेदं सर्वं
स सर्वं भवति

पुरुष एवेदं सर्वमित्यादि श्रुतयः 'आत्मकृतेः परिणामाद्' इत्यत्रमणुभाष्यञ्च । 'अतो न मायिको, न वा भगवद्भिन्नः, किन्तु सत्यत्वादाविर्भावतिरोभावशाली, नोत्पत्तिविनाशवान् । नासतो विद्यते भावो नाभावो विद्यते सत (गी० 2.16) इति वाक्यात्' ।

एवञ्च प्रमाणसिद्धाभ्यामाविर्भावतिरोभावाभ्यां सकलकार्यसिद्धौ प्रागभावादिचतुष्टयमपि शुद्धाद्वैतवेदान्तमते नाङ्गीक्रियते । खण्डनप्रकारस्त्वित्थं प्रदर्शितः । तथा हि—'ननु प्रपञ्चस्य ब्रह्माभिन्नत्वेऽपि प्रापञ्चिकघटपटादीनां घटः पटो नेत्यादि प्रतीतिसिद्धोऽन्योन्याभावो दुर्निवारः अन्यथा घटेनावरणरूपं पटकार्यं स्यात् इति चेन्न । 'बहुस्यामिति श्रुतिसिद्धयेश्वरेच्छया घटे पटत्वादीनां सर्वेषामेव तिरोभावात् । एकस्य घटत्वस्यैव घटे आविर्भावान्न कार्यान्तरसंकरः । एवं सति सर्वत्र सर्वे ब्रह्मधर्माः सन्तोऽपि तत्तद् व्यक्तौ तत्तत्कार्यकर्तृत्वस्य भगवता नियमितत्वान्नकार्यान्तरं कर्तुं क्षमा भवन्ति । 'सर्वं सर्वमयम्' इति तापनीयश्रुतेः (नृसिंहोत्तरता० 9 मखण्डः) । अत एव, 'तद्वैतत् पश्यन्नृषिर्वामदेवः प्रतिपेदे—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'अहं मनुरभवं सूर्यश्चे' त्यादावुक्तः सर्वभावो युज्यते। एवं 'सर्वं सर्वमयम्' इति श्रुतिमाश्रित्यान्योन्याभावे निराकृते पदार्थमात्रस्य सर्वरूपत्वेनात्यन्ताभावोऽपि दूरीकृतोज्ञेयः तथाहि—भूतले घटो नास्तीत्यत्र हि घटानुपलम्भेऽपि तद्भूतले वस्त्वन्तरस्य तृणादेराकाशस्य वा विद्यमानत्वात् तृणादिनाऽऽकाशेन वा घटस्यापि सत्त्वान्नात्यन्ताभावः। अतः सर्वस्य सर्वरूपत्वात् सर्वस्य सर्वत्र विद्यमानत्वाच्च सर्वस्य ब्रह्मत्वमिति शुद्धो ब्रह्मवादः।

कारणरूपस्य ब्रह्मणः कार्यरूपेणाविर्भावात् तत्प्रयुक्तं कार्यत्वं निखिलप्रपञ्चे, 'आत्मकृतेः परिणामात्' (ब्र० सू० 1.4.26), 'पटवच्चेति' (ब्र० सू० 2.1.19) सूत्राभ्याम्। एतदुक्तं निबन्धस्थे सर्वनिर्णयप्रकरणे 'प्रपञ्चभावो भगवत्येव लीनः प्रकटीभवतीति। अवान्तरकार्येषु घटपटादिषु भगवदिच्छया कारणरूपायां मृदि विद्यमानस्य भगवद्रूपघटस्याविर्भावः। तथोक्तं निबन्धे 'मृदादिभगवद्रूपं घटाद्याकारसंयुतम्' इति। अतः 'सर्वं खल्विदं ब्रह्म' (छा० 3.14.1) इति श्रुत्युक्तं प्रपञ्चस्य ब्रह्मात्मकत्वं निराबाधमेव।

मनसा वचसा दृष्ट्या गृह्यतेऽन्यैरपीन्द्रियैः।
अहमेव न मत्तोऽन्यदिति बुध्यध्वमञ्जसा॥

(श्रीमद्भाग० 11)

पुराणादौ मायिकत्वोक्तिस्तु वैराग्योत्पादनार्थमिति व्यवस्थापितं तत्त्वदीपे। व्यामोहिकया मायया जीवानां बुद्धौ प्रापञ्चिकसद्वस्तुसदृशं मायिकं वस्तूत्पाद्य पुरः स्थितविषये प्रक्षिप्यते। तदावस्तुग्रहणे तस्यापि ग्रहणात् तद्विशिष्टं ज्ञानं भ्रमात्मकं भवति। अतस्तन्मायिकधर्मविशिष्टज्ञानमाश्रित्यैव पुराणादौ मायिकत्वोक्तिः सावकाशा भवति। तथा हि—

यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः।
नश्वरं गृह्यमाणञ्च विद्धि मायामनोमयम्॥

(श्रीमद्भाग० 11.7.7)

देहं मनो मात्रमिदं गृहीत्वा, स्वय्युद्भवाश्रयति यस्त्रिविधो विकारः।
मायाऽन्तरापतति नाद्यपवर्गयोर्यत्, स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम्॥

(श्रीमद्भागत० 11)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अतः प्रतीतिरेव मुग्धानां मायिकी न वस्तुनि कश्चिद्दोषः स्वाभाविकः। अत एव सुबोधिन्यां—

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि।
तद्विद्यादात्मनो मायां यथा भासो यथातमः॥
(श्रीमद्भाग० 2.9.33)

इत्येतद्व्याख्यायामुक्तं यत्—तया मायया व्यामोहिता बुद्धिः पदार्थानन्यथा मन्यते. न तु पदार्था अन्यथा भवन्तीति। अग्रे चोक्तं, प्रमाणभूतो वेदः सर्वं खल्विदं ब्रह्मेत्याह। ब्रह्मविदां प्रतीतिरपि तथा। भ्रान्तप्रतीतेस्तु नार्थ-नियामकत्वम्। अन्यथा भ्रमदृष्ट्यागृहीतं जगद् भ्रमरूपमेव स्यात्। अतो-विषयता काचित् स्वीकर्तव्या, यया दृष्टिर्निर्विषया स्यात्।

विषयता मायाजन्या विषयो भगवानिति। एवं सति अब्रह्मविदां विषये विषयता च प्रतीयते। यथा भ्राम्यतः पुरुषस्य, 'घटो भ्राम्यतीति प्रत्यक्षे घटगता-कृत्यादिर्वस्तुभूता प्रतीयते। भ्रमणन्तु विषयतारूपम्। विषयरूपं भगवदात्मकं वस्तुभूतम्, यत् पुनस्तत्रैवोत्पत्तिविनाशकुत्सितत्वान्योन्याभावादि प्रतीयते तद्विषयतारूपं भ्रमणवन्मायिकं भासते। तथा घटपटादिरूपं जगद् वस्तुभूतं प्रतीयते, न तु मायिकम्।

सुबोधिन्याम् 'ऋतेऽर्थं यत्प्रतीयेतैतस्य व्याख्यान उक्तम्—विषयताजनितं ज्ञानं भ्रान्तम्, विषयजनितं प्रमेति। सा विषयताद्विधेति सुबोधिन्यामुक्तम्। आच्छादिकैका, अन्यथा प्रतीतिहेतुरिति चापरा। तस्माद् दर्पणे मुखजननवत् तेजोऽभावेऽन्धकारजननवन्मायामोहितपुरुषबुद्धौ विषयताद्वयं जनयति। तत्रैव सुबोधिन्यामेवं प्रतिपादितं यत् एकाच्छादिकाविषयता ब्रह्मरूपतां न प्रकाशयति। द्वितीया तु जगद्रूपा विषयता। इह ब्रह्मरूपतां न प्रकाशयतीत्युक्त्याऽर्थो न प्रतीयत इतियदुक्त तत्प्रतिपादितम्। एक तु जगद्रूपा विषयतेत्युक्त्या ऋतेऽर्थं यत्प्रतीये-तेति पूर्वं यदुक्तं तत्समर्थितम्।

'जगद्रूपाविषयता' इत्यत्र जगदिवरूपं यस्या सा जगद्रूपेति विग्रहो ज्ञेयो न तु दृश्यमानस्य जगतो विषयतात्वमिति। अर्थाञ्जगत् समानाकारप्रापञ्चिक-वस्तुसदृशं विषयतारूपं नीलपीतादिरूपमाकारादिकञ्च प्रतीयते यत् सैव विषयता; न तु जगतो विषयतात्वमिति। इत्येतदर्थकेन सुबोधिनी व्याख्यानेन श्री बालकृष्णभट्टप्रतिपादितरीत्या 'सर्वं सर्वमयम्' इति सम्यक् समर्थितं भवति।

तत्रैवैतदपि प्रतिपादितं यत् प्रपञ्चोऽयमधिकारिभेदेन त्रिधा भासते।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(1) ब्रह्मभूतानां शुद्धो ब्रह्मात्मक एव भासते ।

(2) शास्त्रोत्पन्नज्ञानिनान्तु ब्रह्मधर्ममायाधर्मयुक्तस्तत्तद्धर्मसत्यत्वमिथ्यात्वविवेकपूर्वकं भासते । यथा पटस्वरूपौपाधिकहरितत्वयुक्तपटे गृहीतेऽपि पटगताकृत्यादीनां सत्यत्वं, हरितताया मायिकत्वं बुध्यते तद्वत् ।

(3) अविवेकिनान्तु ब्रह्मधर्ममायाधर्मयुक्तस्तत्तद्धर्माणामेकरूपज्ञानपुरस्सरं भासते । यथा हरितकाचोपनेत्रयुतचक्षुषा बालेन गृहीतः पटस्तद् गताकृत्यादेरौपाधिकहरितत्वादेश्च सत्यत्वावबोधपूर्वकं भासते, तथा । एवं सति भान एव भेदो, न स्वरूपे । अतः प्रपञ्चस्य ब्रह्माभिन्नत्वात् सत्यत्वमङ्गीकार्यं श्रुतिशरणैः । ये पुनरुत्पत्तिविनाशकुत्सितत्वभेदादयो धर्माः प्रतीयन्ते ते मायिका इति विभावनीयं सुधीभिः ।

ननु सर्वस्य ब्रह्मात्मकत्वे सर्वान्तःपातिनो देहस्यापि ब्रह्मात्मकत्वेन तत्र जायमानाया आत्मबुद्धेः प्रमात्वापातः न चेष्टापत्तिरितिवाच्यम् देहात्मबुद्धेराकरग्रन्थेषु श्रीमद्भागवतादिषु पुराणेषु च सर्वत्रैव निन्दितत्वाद् इति चेत्, सत्यम् । किन्तु शास्त्रेषु तस्या देहात्मबुद्धेर्निन्दा सा तु ब्रह्मज्ञानरहितानां देहं विकारित्वेन पश्यतां मायामोहवशाज्जाताया देहात्मबुद्धेरेव, न तु सर्वत्रब्रह्मदर्शिनां देहात्मबुद्धेः । सर्वत्र ब्रह्मत्वेन पश्यतां स्वे देहेऽपि ब्रह्मत्वप्रतीतिरूपा देहात्मबुद्धिः प्रमैव । तत्र निष्कर्षस्त्वयं यत् 'प्रपञ्चो ब्रह्मात्मकः, संसारस्तु अहंताममतारूपो मिथ्याभूतो मायिक' इति ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वेदान्तदर्शनजन्यब्रह्मज्ञानस्यैहिकोपयोगिता

अधीत्यचतुरो वेदान् धर्मशास्त्राण्यनेकशः ।
ब्रह्मतत्त्वं न जानाति दर्वी पाकरसं यथा ॥
(मुक्तिकोपनिषद्)

शब्दब्रह्मणि निष्णातो न निष्णायात् परे यदि ।
श्रमस्तस्य श्रमफलं ह्यधेनुमिव रक्षतः ॥
(श्रीमद्भाग० 11.11.18)

साम्प्रतं यत्र कुत्रापि दृष्टिपातः क्रियते, सर्वत्रैव दुःखस्य साम्राज्यमेवावलोक्यते । बहवो दीनाभिक्षुका जर्जरशरीरा विवस्त्रा जनाः प्रतिमार्गं प्रतिग्रामं भुवि क्षुधया पीडिताः सन्तो भुवि पतिता धूलिधूसरितवपुष्का विलुठन्तः स्वीयान् प्राणानपि त्यक्तुमिच्छन्ति किन्तु हा ! दैवदुर्विपाक ! अवश्यगन्तारोऽपि तेषां प्राणा न जाने तेषां कलेवरेऽस्थिचर्मविशेषे क्वकथञ्च संलग्नाः सन्ति, येऽधुनापि नैव निःसरन्ति । यानवलोक्य 'अपि ग्रावारोदित्यपि दलति वज्रस्य हृदयम्, (उत्तररामचरि०) वज्रस्यापि हृदयम् शतधा विदीर्णं भवति । एतेषां कथा तु तावद् दूरे तिष्ठतु । य उपरिष्टात् सुखिनोऽवलोक्यन्ते, तेऽपि पृष्टाः सन्तः स्वीयां दुःखगाथामेव श्रावयन्ति । कथयन्ति केचिद् यत् सन्ति मदीया बहवः शत्रवो ये मामहर्निशं पीडयन्ति । केचिद् स्वगृहकलहं वर्णयन्तो गत-प्राणा इव दृश्यन्ते । केचिद् परसम्पदुत्कर्षमसहमाना अहर्निशम् ईर्ष्या-स्पर्धादिवह्निना पुटपाकान्तर्गतमोषधिमिवान्तरेव भृशं ज्वलन्ति । पतिपत्न्योः पितृपुत्रयोस्तथा परस्परं भ्रातृष्वपि, प्रेम्णस्तु कथैव का, भयङ्करः कलहः प्रतिक्षणं प्रवर्धमानः समुपलभ्यते । रुग्णानां दशा तु चिकित्सालये गत्वा चेद् दृश्यते तदा सा रौरवदिनरकयातनातोऽप्यति भीषण प्रतीयते । एवमेव सर्वत्रैव दुःखदारिद्र्यसाम्राज्यं साम्प्रतं धरणीतले वर्तते । इयं दशा तु मनुष्याणामस्ति, यान् निर्माय ब्रह्मणोऽपि हृदये महानानन्दः समजनि ।

सृष्ट्वा पुराणि विविधान्यजया स्वशक्तया
वृक्षान् सरीसृप पशून् खगमत्स्यदंशान् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तैस्तैरतुष्टहृदयः पुरुषं विधाय
ब्रह्मावलोकधिषणं मुदमापदेवः ॥
(श्रीमद्भाग० 11.9.28)

इतरे जीवास्तु 'पच्यन्ते पापकर्मभिः' ।

उपर्युक्तां 'साम्प्रतिकीं दशामवलोक्य कस्य नाम सहृदयस्य चेतसि न जायते महान् खेदः । एकेन केनचिन्महात्मना तूक्तं यद्—

नत्वहं कामये राज्यं न स्वर्गं नापुनर्भवम् ।
कामये दुःखतप्तानां प्राणिनामार्तिनाशनम् ॥

भक्तशिरोमणिना प्रह्लादेनैवमप्युक्तम्—

नैतान् विहाय कृपणान् विमुमुक्ष एको
नान्यत्त्वदन्यशरणं भ्रमतोऽनुपश्ये ॥
(श्रीमद्भाग० 7.9.44)

प्रह्लादेन स्वकीयो मोक्षोऽपि निरादृत स्तावद्यावदेतेषां प्राणिनामार्तिनाशस्य कश्चित् समुचित उपायो न भवतीति । एवमेवान्यैरपि साधुपुरुषैः प्राणिनां दुःखहत्यै सुखावाप्त्यै च स्वस्वज्ञानानुसारमनेके सिद्धान्ता अन्वेषिताः प्रकटिताश्च लोके । येषां निर्मलेन चेतसाऽध्ययनेन सर्वेऽपि जीवाः सुखिनो भवितुमर्हन्ति ।

तत्र सर्वैरप्याचार्यैः ऋष्यादिभिश्च पूर्वन्त्वेतदालोचितं यदेतेषां दुःखानामहर्निशनिवार्यमाणानामपि कथमुत्पत्तिर्भवति, कथञ्च प्रतिपलमभीप्स्यमानानां सुखानाञ्चानुत्पत्तिरिति । उचितन्त्वेदं प्रतिभाति यद् निवार्यमाणानां निवृत्तिर्भवेद्, अभीष्टानान्चावाप्तिः । परन्तु वैपरीत्यमेव प्रायो दृश्यते अतोऽत्रावश्यमेव केनचित् कारणेन भाव्यम् । तत्र—

नाभुक्तं क्षीयते कर्मजन्मकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।

इत्यादिश्रुतिवाक्यैरेतदवधारितं यदेतेषां दुःखानामुत्पत्तिकारणं केवलं तत् कृतजन्मान्तरीयदुष्कृतान्येवेति । कृतप्रणाशस्याकृताभ्यागमस्यानौचित्यात् उक्तञ्चापि—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पूर्वजन्मकृतं पापं व्याधिरूपेण जायते ।
सुखस्य दुःखस्य न कोऽपि दाता परोददातीति कुबुद्धिरेषा ।

तानि च कर्माणि मनःप्रेरितैरिन्द्रियैः क्रियन्ते ।
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।।

नायं जनो मे सुखदुःखहेतुर्न देवतात्मा ग्रहकर्मकालाः ।
मनः परं कारणमामनन्ति संसारचक्रं परिवर्तयेद् यः ।।
(श्रीमद्भाग० 11.23.43)

सुखदुःखप्रदो नान्यः पुरुषस्यात्मविभ्रमः ।
मित्रोदासीनरिपवः संसारस्तमसः कृतः ।।
तस्मात्सर्वात्मनातात निगृह्याण मनो धिया ।
मय्यावेशितया युक्त एतावान् योगसंग्रहः ।।
(श्रीमद्भाग० 11.23.60-61)

फलितमेतद्यत् सुखदुःखयोरवाप्तिनिवृत्योः कारणं स्वकृतानि शुभाशुभानि कर्माण्येव । तानि च मनोऽधीनानि प्रेरकत्वात् । उक्तञ्च—

मनोवशेऽन्ये ह्यभवन् स्म देवा मनश्च नान्यस्य वशं समेति ।
भीष्मो हि देवः सहसः सहीयान् युञ्ज्याद् वशे तं सहि देवदेवः ।।
(श्रीमद्भाग० 11.23.48)

एषोऽहमन्योऽयमिति भ्रमेण दूरन्तपारे तमसि भ्रमन्ति ।
(श्रीमद्भाग० 11।23।50)

अतः प्रतीयते यद् 'एषोऽहम्,' 'अयञ्चान्यः' इति बुद्धिर्यावन्न नश्यति, तावच्छुक्लकृष्णानि कर्माणि भविष्यन्त्येव । तद्वशाच्च सुखदुःखान्यपि तत्तत्फलत्वेनावश्यं भावीन्येव । अतो द्वैतबुद्धिनिरासाय ब्रह्मज्ञानस्य नितान्तमावश्यकता वर्तते । अपगतायां द्वैतबुद्धौ सर्वत्र ब्रह्मस्फूर्त्या कथन्नाम केनचित् किमपि दुष्कर्म कर्तुं शक्यते । अनेन प्रकारेण दुःखानां समूलमुन्मूलनम् आत्यन्तिकनिवृत्तिश्च भवितुमर्हति । इतो नास्ति कश्चिदन्यः पन्था दुःखापहृत्यै सुखोपलब्धेश्च । तथा हि—

तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय (श्वेताश्वतर उ०

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

3.8) यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवास्तदादेवमविज्ञाय दुःखस्यान्तो भविष्यति (श्वेताश्वतर उ० 6 20)। तथा चर्मवदाकाशस्य वेष्टनं सर्वथाऽसम्भवं, तथैव ब्रह्मदर्शनमन्तरा दुःखाभावस्याशापि दुराशामत्रमेव।

'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानामुत्तरोत्तरापाये तदन्तरापायादपवर्गः, (न्या० सू० 1.1 2) इत्यनेन न्यायसूत्रेण विस्पष्टमेवैतदभिहितम् यद् अपवर्गस्य दुःखापायस्य च साधनं मुख्यतया मिथ्याज्ञानस्य निवृत्तिरेव। तत्तु मिथ्याज्ञानं केवलेन ब्रह्मज्ञानेनैवापाकर्तु शक्यते, नान्यथा।

अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः॥

(गीता 5.15)

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्॥

(गीता 15.16)

रज्जावहिमिवात्मानं जीवं मत्वा भयं भवेत्।
परात्माऽहमिति ज्ञात्वा भयदुःखैर्विमुच्यते॥

(अध्या० अयो० 1.26)

अज्ञानान्यस्यते सर्वं त्वयि रज्जौ भुजङ्गवत्।
त्वज्ज्ञानाल्लीयते सर्वं तस्माज्ज्ञानं सदाऽभ्यसेत्॥

(अ० अ० 1.28)

त्वत एव जगज्जातं त्वयि सर्वं प्रतिष्ठितम्।
त्वय्येव लीयते कृत्स्नं तस्मात्त्वं सर्वकारणम्॥

(अ० अ० (12) 1.25)

एतैरुपयुक्तैः कतिपयैर्वचनैः प्रमाणभूतैरेतत् सुनिश्चितं भवति यदज्ञानमूलककर्मनिबन्धनान्येव सर्वाण्याध्यात्मिकाधिदैविकाधिभौतिकदुःखजातानीति। तेषां दुःखानां निवृत्तये ब्रह्मज्ञानं नितान्तमावश्यकमिति।

अस्तीयमेकापरमसत्या घटना श्रीमद्भागवतस्यैकादशस्कन्धे त्रिंशतमेऽध्याये श्रीमद्वेदव्यासेन बादरायणेन ब्रह्मसूत्रगीतादिप्रमाणभूतग्रन्थनिर्मात्रोपवर्णिता यत् सम्पूर्णमपि यादवकुलमेकस्यामेवक्षपायां क्षयं गतमिति। तत्रास्त्येतद्विचारणीयं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यत् कोऽत्र हेतुस्तेषां यादवानां विनाशस्येति। 'बुद्धिनाशात् प्रणश्यति' (श्रीमद्भ० गी० 2.63) बुद्धिनाश एव तत्र कारणम्। स्वयं व्यासदेवेनोक्तं—

ततस्तस्मिन् महापानं पपुर्मैरेयकं मधु।
दिष्टाविभ्रंशितधियो यद्द्रवैर्भ्रश्यते मतिः॥

(श्रीमद्भाग० 11.30.12)

अतोमैरेयपानात् स्वपरज्ञानमूढा अज्ञानावृतचेतसो यादवाः परस्परमेव युध्यमानाः क्षणेनैव क्षयं गताः।

पुत्रा अयुध्यन् पितृभिर्भ्रातृभिश्च स्वस्त्रीयदौहित्रपितृव्यमातुलैः।
मित्राणि मित्रैः सुहृदः सुहृद्भिर्ज्ञातीस्त्वहन्ज्ञातय एव मूढाः॥

(श्रीमद्भाग० 11.30.19)

उपर्युक्त यादवकुलध्वंस कथानकेनैतत्सुस्पष्टं भवति यद् अज्ञानावृतचेतसो जनाः सर्वाननर्थान् कुर्वन्ति, कर्तुं च शक्नुवन्ति। पुत्राः पितॄन् घ्नन्ति, भ्रातरो भ्रातॄन्, शिष्या गुरून्, ज्ञातयो ज्ञातीरेवमादीनि सर्वाणि पापकर्माणि कर्तुं शक्नुवन्ति मूढजनाः। पूर्णतयेयमेव दशास्ति जगतः। सर्वेऽपि प्राणिनः सुरा असुरा मनुष्याश्च सुरां मोहमयीं पीत्वा यादवानामिव मत्ताः कर्तव्या-कर्तव्यज्ञानशून्या जाताः। भर्तृहरिणा सुभाषितशतकत्रये वैराग्यशतकस्य त्रिचत्वारिंशतमे श्लोके जगतः ईदृशी मदोन्मत्तता कर्तव्या-कर्तव्यज्ञानशून्यता च सम्यगुपवर्णिता। तथा हि—

आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं,
व्यापारैर्बहुकार्यभारगुरुभिः कालोऽपि न ज्ञायते।

दृष्ट्वाजन्मजराविपत्तिमरणं त्रासश्चनोत्पद्यते,
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत्॥

(सुभा० वै० 43)

यावदेतस्या मोहमदिराया दूरीकरणं नैव सम्पद्यते, तावत् संसारचक्र-भ्रमणम्, आध्यात्मिकादित्रिविधविविधतापज्वाला च प्रयत्नसहस्त्रैरपि कदापि नैव शान्तिमेष्यतीति निश्चप्रचमेव। दूरीकरणञ्चास्याः 'अज्ञानस्य ज्ञाननाश्य-त्वात्' 'तमसस्तेजोविनाश्यत्वादिव केवलेनात्मज्ञानेनैव भवितुमर्हति नान्यथा। अतो जगत एकात्मकत्व ज्ञानमैहिकसकलसन्तापानां समूलोन्मूलनाय परमा-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वश्यकमित्यत्र नास्ति कस्यचिदपि साधारणजनस्यापि काचिद्विप्रतिपत्ति । 'यत्र स्वस्य सर्वमात्मैवाभूत् तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (इशा० उ० 16) ।

अत ऐहिकसुखशान्त्युपलब्धयेऽपि वेदान्तदर्शनस्य तज्जन्य-ब्रह्मात्म्यैक्य-ज्ञानस्य नितान्तमावश्यकता वर्तते। यदा वेदान्तदर्शनानुशीलनेनैतत्सुदृढं ज्ञानमुत्पत्स्यते यद् ब्रह्मैव सर्वत्र सर्वात्मना वर्तते तदा :कथं कश्चिदात्मानं प्रत्येव किमपि पापकर्माचरिष्यति, कथञ्च तत्पापकृतदुःखमनुभविष्यति । अतो दुःखव्रातानामात्यन्तिकविनिवृत्तये परमर्षिभिर्दयाद्रहृदयैरनेके स्मृतिराणादिग्रन्था जीवानां परमकल्याणार्थं विनिर्मिता येषां सततमध्ययनमननादिना सन्तापशान्तिः सुखोपलब्धिश्च साधयितुं शक्यते ।

भाग्योदयेन लभते खलुमानुषत्वं, तत्रापि दुर्लभतरं खलु भो द्विजत्वम् ।
यो न पालयति लालयतीन्द्रियाणि तस्यामृतं क्षरति हस्तगतं प्रमादात् ॥

लब्ध्वासुदुर्लभमिदं बहुसम्भवान्ते मानुष्यमर्थदमनित्यमपीह धीरः ।
तूर्णं यतेत न पतेदनुमृत्युयावन्निःश्रेयसाय विषयः खलु सर्वतः स्यात् ॥
(श्रीमद्भाग० 11.9.29)

नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम् ।
मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिन्न तरेत् स आत्महा ॥
(इति श्रीभागवतम् 11.20.17)

उपसंहृतिः

आशासीद् यत् स्वास्थ्ये समुचित लब्धे सत्यपूर्णानि प्रकरणानि पुरयिष्यामीति । एतद्धियैव कानिचित् प्रकरणान्यर्धलिखितान्येव त्यक्तानि । किन्तु मन्दभाग्यत्वान्नतु तादृशं स्वास्थ्यमेवोपलब्धं न तु नेत्रविकारोप्यपगतः अतस्तानि प्रकरणानि साम्प्रतमप्यपूर्णान्येव विद्यन्ते । यद्यप्येतदर्थं भृषं दूये, किन्तु पश्चात्तापातिरिक्तं न किंचिदपि कर्तुं शक्नोमीति क्षमामेवाभ्यर्थये ।

क्षमापनम्

लिलिखिषा त्वनल्पास्ति शक्तिर्नैवास्ति लेखने ।
विषीदामि भृशं किन्तु विवशोऽहं करोमि किम् ॥1॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अक्षमोऽहं क्षमां याचे विद्वांसो दीनवत्सलाः ।
दयालवो विधास्यन्ति ममोपरि दयालवम् ॥2॥

प्रकरणसमाप्त्यर्थं लिख्यते यत्तवप्यहम्—
'इत्यलम्' लिखितुं नालमस्म्यन्यद्धि लिखामि किम् ॥3॥

कर्तुं संशोधनं नाहं समर्थोस्मि कथंचन ।
स्वयं संशोध्य विद्वांसः पठिष्यन्तीति प्रार्थये ॥4॥

लब्धाकृतिर्निबन्धोऽयं सर्वं ब्रह्मेति बोधकः ।
तुष्टये विदुषां भूयात् प्रीतये परमात्मनः ॥5॥

इतः परं शिवमहिम्नस्तोत्रीयं श्लोकद्वयं समुपस्थाप्य निबन्धाद् विरिरसामि—

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे,
सुरतरुवरशाखालेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं,
तदपि तव गुणानामीश पारं न याति ॥

तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर !
यादृशोऽसि महादेव तादृशाय नमो नमः ॥

पूर्णता समाप्तिः

कृष्णं साक्षात् परब्रह्म स्वेच्छया नररूपिणम् ।
भूयो भूयो नमस्कृत्य निबन्धाद्विरमाम्यहम् ॥

ओं शान्तिः शान्तिः शान्तिः

श्रीकृष्णं सच्चिदानन्दं, प्रणमामि निरन्तरम् ।
यत्कृपातो मया प्राप्तो, निबन्धाच्चिरमोक्ष ओम् ॥

(नित्यमोक्ष)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitized by eGangotri/Sarayu Trust. Funding IKS MoE-SamRpn

Jangamwadi Math, Srivastava Varanasi Collection. Equilibrium Heritage Foundation, Jalgaon